Smrityartha-Sarani	Title
	Author
	Editor
Saka. 1674	Year, Vols.
	Publisher
6	Remarks

स्मृत्यर्थसा॰ श्रीगणेशाय नमः॥ गणेशं ब्रह्मविष्ण्वीशान्वाग्व्योमालोकपान्ग्रहान्॥ दुर्गामन्वादिकान्वंदे व्याख्या
तॄंश्च महागुरून्॥ श्रीकंठश्रीकराद्यैश्च श्रुतिस्मृतिपुराणगैः॥ स्मृतिशास्त्रेष्वनेकेषु विप्रकीर्णं
२ ष्वनेकधा॥ अनुष्ठानुपकारार्थं स्मृतिछिद्रं प्रयत्नतः॥ पुराणन्यायमीमांसासांगवेदैः प्रपूरितं
कामधेनौ प्रदीपाख्ये कल्पवृक्षलतादिषु॥ शंभु द्रविडकेदार लोल्लटाद्यैश्च भाषितं॥ मन्वाद्यने
कस्मृतिषु व्याख्यातं प्रतिपादितं॥ स्मृत्यर्थसारं वक्ष्यामि सुखानुष्ठानसिद्धये॥ प्राचीदि
शामनुक्तैः स्यादुदीचीशानदिक्तथा॥ तिष्ठत्वं प्रक्ततानुक्तावासीनत्वं च कर्मसु॥ कर्त्रंगानाम्नु
क्तौ तु दक्षिणांगं भवेत्तथा। कुंचिते वामहस्तः स्याद्दक्षिणः स्यादकुंचिते। यज्ञोपवीतिना कार्यं
सर्वकर्मप्रदक्षिणं॥ मनःप्रसादात्सत्योक्त्या तपसा स्नानकर्मणा। आचांत्या चात्मनः शुद्धिं कृ
त्वा कर्म समाचरेत्। कर्मायथाकृतं ज्ञात्वा तावदेव पुनश्चरेत्। प्रधानः स्यात्क्रियायां तु सांगं
तत्क्रियते पुनः। तदंगाकरणे कुर्यात्प्रायश्चित्तं न कर्म तत्। प्रभुः प्रथमकल्पस्य योनुकल्पे
नुवर्तते। स नाप्नोति फलं तस्य परत्रेति श्रुतिः स्मृतिः। कर्मणा मनसा वाचा यत्नाद्धर्मं समाच १

रेत्। अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु। बहुल्पं वा स्वगृह्योक्तं यस्य कर्म प्रचोदितं। तस्य
तावति शास्त्रार्थे कृते सर्वः कृतो भवेत्। श्रौतेषु सर्वशास्त्रोक्तं सर्वस्यैव यथोचितं। स्मार्तं साधा
रणं तेषु ग्राह्यं श्रौतेषु कर्मसु। समयाचारिका धर्मा जातिदेशकुलोद्भवाः। ग्रामाचाराः परिग्रा
ह्यास्ते विध्यनुरोधिनः। युगधर्माः परिग्राह्याः सर्वत्रैव यथोचितं। यत्कृते दशभिर्वर्षैस्त्रेतायां हा
यनेन तत्। द्वापरे तच्च मासेन अहोरात्रेण तत्कलौ। देवराच्च सुतोत्पत्तिर्वानप्रस्थाश्रमग्रहः। दत्ता
क्षतायाः कन्यायाः पुनर्दानं परस्य हि। समुद्रयानस्वीकारे कमंडलुविधारणं। महाप्रस्थानग
मनं गोपशुश्च सुराग्रहः। अग्निहोत्रहवण्याश्च लेहो लीढापरिग्रहः। असवर्णासु कन्यासु वि
वाहश्च द्विजातिषु। वृत्तस्वाध्यायसापेक्षमघसंकोचनं तथा। अस्थिसंचयनादूर्ध्वमंगस्पर्श
नमेव च। प्रायश्चित्तविधानं च विप्राणां मरणांतिकं। संसर्गदोषः पापेषु मधुपर्के पशोर्वधः। दत्तौ
रसेतरेषां तु पुत्रत्वेन परिग्रहः। शामित्रं चैव विप्राणां सोमविक्रयणं तथा। दीर्घकालं ब्रह्मचर्यं नरमे
धाश्वमेधकौ। कलौ युगे त्विमान्धर्मान्वर्ज्यानाहुर्मनीषिणः॥ ७ विप्रक्षत्रियविट्शूद्राश्चत्वारो

स्मृत्यर्थसा० वर्णाः। तत्र विप्रक्षत्रियवैश्या द्विजास्त्रिजाश्च तेषां मातुः प्रथमं जन्म। उपनयनाद्द्वितीयं जन्म। तृतीयं यज्ञिय
२ दीक्षायामुत्तमं जन्म स्त्रीणां विवाह उपनयनस्थाने द्विजानां गर्भाधानादिकाश्चैत्याः क्रियाः मंत्रएवकार्याः
तत्र संस्काराः॥ गर्भाधानं पुंसवनानवलोभनसीमंतोन्नयनजातकर्मनामकरणानिष्क्रमणान्नप्राशन
चौलोपनयनसावित्रीव्रतवेदव्रतानि [illegible] कव्रता निगोदानिकस्नातकविवाहाश्चेत्यावश्यकाः षोडशप्रा
याः संस्काराः। तत्र ऋतौ गर्भाधानं कार्यं। रजःप्रभृति षोडशरात्र्यंत ऋतुकालः। गर्भचलनात्पुरात्तृ
तीये चतुर्थे वा मासि पुंसवनं कार्यं। अनवलोभनं च चतुर्थे षष्ठेऽष्टमे मासे वा सीमंतोन्नयनं। जाते सु
ते पिता स्नात्वा रात्रौ संध्ययोर्ग्रहणे वा वृद्धिश्राद्धं सुवर्णेन कृत्वा जातकर्म दसनानि दुरितक्षयाय प्र
जापतिप्रीत्यै च कुर्यात्। जाताशौचांतरमध्ये न कुर्यात्। मृताशौचमध्ये जाते तु तदाशौचांते वा कु
र्यात्। निष्क्रमणं चंद्रदर्शनं सूर्यदर्शनं देवतानमस्कारं वा द्वादशेऽह्नि वा तृतीये मासे वा चतुर्थे मासे
वा कुर्यात्। अन्नप्राशनं षष्ठे मासेऽष्टमे दंते जाते वा कार्यं। चौलं प्रथमे तृतीये वर्षे वा कार्यं। बहुमतत्
वाद्यथाकुलधर्मं वा कार्यं। एते संस्कारा गर्भबीजदुरितक्षयार्थाय यथास्वाचारं कार्याः। स्त्रीणामम २
मकास्तूष्णीं स्युर्विवाहस्तु समंत्रकः। एते कालातिक्रमे व्याहृतिहोमं कृत्वा कार्याः। एते चैके क

लोपे पादकृच्छ्रः कार्यः। चौलेऽर्द्धकृच्छ्रः। मत्यालोपे अनापदि चेद् द्विगुणं। उपनयनात्प्राग्बाला उच्छिष्टदोषप्रत्य
वायता स्युः। कामचारकामवादभक्षणाः स्युर्महापातकवर्ज्यं। तेषां चंडालादिस्पर्शे सचैलं स्नानं। प्रागन्नप्राशनाद
भ्युक्षणं। प्राक्चौलादाचमनं। पश्चात्स्नानमित्येके। पित्रोः स्वधानिनयनादृते मंत्रान्न ब्रूयुः। उपनयनं जन्म
प्रभृति गर्भप्रभृति वा अष्टमे वर्षे एकादशे द्वादशे विप्रादीनां क्रमात्कार्यं। अत ऊर्ध्वं सावित्रीपतिता व्रात्याः स्युः।
तेषामचीर्णप्रायश्चित्तानामुपनयनाध्ययनयाजनविवाहादिकं न कार्यं। व्रात्यानां गुरुप्रायश्चित्तं वक्ष्यति। षंढां
धबधिरस्तब्धजडगद्गदपंगुषु। कुब्जवामनरोगार्तशुष्कांगविकलांगिषु। मत्तोन्मत्तेषु मूकेषु शयनस्थे निरिंद्रिये।
ध्वस्तपुंस्त्वेपि चैतेषु संस्काराः स्युर्यथोचितं। मूकोन्मत्तौ न संस्कार्यावित्येके। कर्मस्वनधिकारात्पातित्यं नास्ति।
तदपत्यं संस्कार्यं। ब्राह्मण्यां ब्राह्मणोत्पन्नो ब्राह्मण एवेति स्मृतेः। अन्ये संस्कार्या इत्यूचुः। होमं तावदाचार्यः
करोति। उपनयनं च विधिना आचार्यसमीपनयनं वा। सावित्रीवाचनं वा। अन्यदंगं यथाशक्ति कार्यं। विवाहश्च
कन्यास्वीकारोऽन्यदंगमिति। औरसः क्षेत्रजास्तेषां संस्कार्या भागहारिणः। औरसः पुत्रिकापुत्रः क्षेत्रजो गू
ढजस्तथा। कानीनश्च पुनर्भवो दत्तः क्रीतश्च कृत्रिमः। दत्तात्मा च सहोढश्च अपविद्धसुतस्तथा। पिंडदोंश
हरस्तेषां पूर्वाभावे परः परः। एते नैव दश पुत्रा [illegible] संस्कार्याः स्युर्द्विजातयः। केचिदाहुर्द्विजेतरौ तौ संस्कार्यौ कुंड

सर्थसा० गोलकौ। कार्पासक्षौमगोवालशणवल्कतृणादिकं। सदासंभवतो धार्यमुपवीतं द्विजातिभिः। शुचौ देशे शुचिः
३ सूत्रं संहतांगुलिमूलके। आवेष्ट्य षण्णवत्या तत्त्रिगुणीकृत्य यत्नतः। अब्लिंगकैस्त्रिभिर्मंत्रैः प्रक्षाल्योर्ध्ववृतं तु
यत्। अप्रदक्षिणमावृत्तं सावित्र्या त्रिगुणीकृतं। अधःप्रदक्षिणावृत्तं समं स्यान्नवसूत्रकं। त्रिरावेष्ट्य दृढं ब
ध्वा हरिब्रह्मेश्वरान्नमेत्। ततश्च यज्ञोपवीतमिति मंत्रेण धारयेत्। स्तनं सलोमकं वेत्स्यात्ततः कृत्वा विलोम
कं। सावित्र्या दशकृत्वाद्भिर्मंत्रिताभिस्तदुक्षयेत्। विच्छिन्नं वाप्यधो यातं भुक्त्वा निर्मितमुत्सृजेत्। यद्वा पृष्ठ
वंशे च नाभ्यां च धृतं यद्विंदते कटिं। तद्धार्यमुपवीतं स्यान्नातिलंबं न चोच्छ्रितं। स्तनादूर्ध्वमधो नाभेर्न धा
र्यं तत्कदाचन। ब्रह्मचारिण एकं स्यात्स्नातस्य द्वे बहूनि वा। तृतीयमुत्तरीयार्थं वस्त्राभावे तदिष्यते। ब्रह्म
सूत्रे पसव्ये सव्ये स्थिते यज्ञोपवीतिना। प्राचीनावीतिना सव्ये कंठस्थे तु निवीतिना। वस्त्रं यज्ञोपवीतार्थे त्रिवृ
त्सूत्रं च कर्मसु। कुशमुंजवालतंतुरज्वा वा सवर्णजातिषु इति यज्ञोपवीतविधिः कार्ष्णरौरवबास्तानि वि
प्रादेरजिनानि तु। अहतं वस्त्रयुग्मं शुभ्रं धृतं वस्त्रमथापि वा। मौंजी त्रिवृत्समा श्लक्ष्णा दक्षिणावृत्तमेखला।
मुंजाभावे तु कर्तव्या कुशाश्मंतकबल्बजैः। पालाशाद्यास्तु सर्वेषां दंडा याज्ञिकवृक्षजाः। ते केशभालनासां
तप्रमाणाश्च क्रमात्त्विमे। धार्याः श्लक्ष्णाः सदा धार्यं कौपीनं कटिसूत्रकं। कौपीनमहतं धार्यं खंडं वा वस्त्र ३

पार्श्वयुक्। यज्ञोपवीतमजिनं मौंजीं दंडं च धारयेत्। त्र्यंगुलं बहिर्लोमयद्वा तु चतुरंगुलं। एकखंडं त्रिखंडं वा धारये
दुपवीतवत्। नष्टे भ्रष्टे नवं मंत्राद्धृत्वा भ्रष्टं जले क्षिपेत्। उपनयनानंतरं त्रिरात्रं द्वादशरात्रं वर्षं वा क्षारलवणा
२ श्यधःशायी ब्रह्मचारी व्रतं चरेत्। सर्वव्रतांते नवानि यज्ञोपवीतानि धृत्वा जीर्णानि त्यजेत्। वस्त्राणां त्यागो नि
यमः। नित्यं स्वाध्यायाग्निकार्यब्रह्मयज्ञतर्पणानि कुर्वन्नर्भिक्षां विप्रगृहेभ्यः संगुर्वनुज्ञया याचयित्वा भोजनवि
धिना भुंजानो द्वादश वर्षं पं वा षट् वेदग्रहणांतं वा ब्रह्मचारी व्रतं चरेत्। सर्वत्र गुरुशुश्रूषा छंदसां साधनार्थं का
र्या। उपाकर्मांते सर्वेषां वेदानां व्रतं। तत्र स्त्रीमधुमांसोच्छिष्टशुक्तपर्युषित तांबूलदंतधावनावसिक्तकादि
वास्वापछत्रपादुकागंधमाल्योद्वर्तनानुलेपनांजनाजलक्रीडाद्यूतनृत्यगीतवाद्यालापाश्लीलपरिवादा
दीन्या समावर्तनाद्वर्जयेत्। तदेव वैद्ये व्याधौ मधुमांसं गुरूच्छिष्टं भक्ष्यं। श्राद्धं तु वर्जमेव। उपनयनव्रता
नंतरं सावित्रीव्रतमुपाकर्मांते। आरण्यकव्रतानि च तथैव उपाकरणमोषधिजनने सति श्रावण्यां पौ
र्णमास्यां कार्यं। श्रावणमासस्य श्रवणे वा पंचम्यां हस्तेन वा। पंचमीहस्तयोगे वा कार्यं। भाद्रपदमासस्य
पौर्णमास्यां वा। श्रवणे वा हस्ते वा। आषाढ्यां पौर्णमास्यां वा। यथास्वाचारं कार्यं। श्रवणे आदौ घटिकाचतुष्ट
यमभिजिन्नक्षत्रं त्रीं च वर्ज्या तिथिखंडे सति उदयव्यापिनी प्रयोगपर्याप्ता तिथिरुपाकरणे ग्राह्या। श्रवणे
खंडे सति धनिष्ठासंयुक्ता प्रयोगपर्याप्ता ग्राह्यं। नोत्तराषाढासंयुतं। हस्तादिषन्यनक्षत्रे शुक्लपक्षे उदय

स्म॰सर्वसा॰ व्यापिनी ग्राह्या। शुक्लपक्षे स्तमयव्यापि प्रयोगपर्याप्तं ग्राह्यं। सूतकादिविघ्नसंभवे वौषध्युत्सर्गाभावे न श्रावण
४ भाद्रपदयोः कस्मिंश्चिद्दिने ग्रहणसंक्रांतिवर्जिते कार्यं। कर्मलोपे न लोपो लक्ष्यः। नूतनब्रह्मचारिणो विशेषः। श्रा
वण्यां तु चतुर्दश्यां श्रावण्यां तु विशेषतः। उत्सर्जनं तु पर्वण्यामुपाकर्म न कारयेत्। मौंजीयज्ञोपवीतादि नवं दद्याद्
स्येञ्च। कटिसूत्रं च नूतनं वस्त्रं तथैव च। उपनयनादुपाकर्मांतं सावित्रीव्रतं तत्संपूर्त्यर्थं विप्रसंबंधिबांधव
भोजनं शक्त्या कार्यं। ततो वेदाख्यव्रतं प्रारभेत्। तत आरण्यकव्रतानि। प्रतिव्रतं वपनं। व्रतांते भोजनं
न सेऽक्षम हार्यं। एतेषु व्रतेषु लोपे तारतम्येन त्रीन् षट् द्वादश कृच्छ्रांश्चरित्वा पुनर्व्रतं प्रारभेत्। ततोऽनंत
रं वा उदगयने वा शुक्लपक्षे शुभे हनि स्वाध्यायं प्रारभेत्। पूर्वाह्णे गणेशं सरस्वतीमिष्टदेवं स्वं तं च संपूज्य
ब्रह्मचारिणो विप्रान् सुवासिनीः शिष्यश्चाशिषो गृहीत्वा ब्रह्मयज्ञवद्दर्भान् धारयमाणः। प्रणवव्याहृतीसावित्री
रुक्त्वा प्रणवपूर्वं स्वाध्यायं प्रारभ्य किंचिदधीत्य प्रणवेन समाप्य विरामोऽस्त्वित्युक्त्वा भूमिं स्पृष्ट्वा गुरूंश्च
द्वानमेयुः। ततो परेद्युः प्रभृति गणेशादीन्नत्वा गुरूंश्च नत्वा प्रणवेन प्रारंभं समाप्तिं च कुर्युः। आसमाव
र्त्तं संशयेनाध्याप्याः। ब्रह्मचारी संध्यामुपास्याग्निकार्यं कृत्वा गुरोरुपसंग्रहणं कृत्वा तदभिवादमंत्रेण नम
स्कारं कुर्यात्। उपसंग्रहणं नाम अमुकगोत्रो देवदत्तशर्मा अहं भो अभिवादये इत्युक्त्वा कर्णौ स्पृष्ट्वा दक्षिणा ४
त्तरपाणि दक्षिणेन गुरोर्दक्षिणं पादं सव्येन सव्यं गृहीत्वा शिरोवनमनं अभिवादने पादग्रहणं नास्ति। पा

दस्पर्शनं कार्यं न वा। आयुष्मान् भव सौम्य देवदत्ता ३ इति प्लुतांतमुक्त्वा अमुकशर्मन्निति प्रत्यभिवादः कार्यः। आयु
ष्मान् भव सौम्य देवदत्त शर्मन्। इति वा प्रत्यभिवादः आयुष्मान् सौम्येति वा प्रत्यभिवादः। अत्र गुरवो माता स्तन्य
धात्री च पिता पितामहादयो मातामहादयोऽन्नदाता भयत्राता आचार्यश्चोपनेता मंत्रविद्योपदेष्टा च तेषां पत्न्य
श्चोपसंग्राह्याः। समावृत्तेन च। बाले समवयस्केऽध्यापके गुरुवच्चरेत्। मातुलाश्च पितृव्याश्च श्वशुराश्च यवीयां
सोऽपि प्रत्युत्थेयाभिवाद्याः। उपाध्यायर्त्विजो ज्येष्ठभ्राता तेषां च सर्वेषां पत्न्यश्चैवं मातृष्वसा पितृष्वसा च सवर्णा
भ्रातृभार्या च नियममभिवाद्याः। विप्रोष्य तूपसंग्राह्याः ज्ञातिज्ञातिसंबंधियोषितः। विप्रोष्य विप्रं कुशलं पृ
च्छेन्नृपमनामयं। वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च। न वाच्यो दीक्षितो नाम्ना यवीयानपि सर्वदा। एकै
स्तमभिभाषेत भोभवत्कर्मनामभिः। परपत्नीमसंबंधां भगिनीमिति भाषयेत्। त्रिवर्षपूर्वः श्रोत्रियोऽभिवा
द्यः। अत्रिवर्षासंबंधिनश्च स्वल्पेनापि स्वयोनिजाः। अन्ये ज्ञानवृद्धाः सदा वा राजत्वाभिवाद्याः। उदक्यासूति
कां नारीं भर्तृघ्नीं भर्तृपातिनीं। पाषंडं पतितं व्रात्यं महापातकिनं शठं। नास्तिकं कितवं स्तेनं कृतघ्नं नाभिवाद
येत्। मत्तं प्रमत्तमुन्मत्तं धावंतमशुचिं नरं। वमंतं जृंभमाणं च कुर्वंतं दंतधावनं। अभ्यक्तशिरसं स्नानं कुर्वंतं
नाभिवादयेत्। जपयज्ञांगणान् स्कंधसमित्पुष्पकुशादिकान्। उदपात्रार्घभिक्षान्नं वहंतं नाभिवादयेत्।
अभिवाद्य द्विजश्चैतानहोरात्रेण शुध्यति। क्षत्रियवैश्याभिवादने च विप्रस्यैवं। शूद्राद्यभिवादने निराहारं कार्यं।

स्मृत्य॰ सार रजकादिषु चांडालादिषु तु रंडस्यादि संग्रह इत्यन्मतं। देवताप्रतिमां दृष्ट्वा यतिं चैव तपस्विनं। नमस्कारं न कुर्याच्चेदुप
५ वासेन शुध्यति। सर्वे वापि नमस्कार्याः सर्वावस्थासु सर्वदा। अभिवादो नमस्कारस्तथा प्रत्यभिवादनं। आशीर्वा
द्यानमस्कार्यैर्वयस्यं तु पुनर्नमेत्। स्त्रियो नमस्याः वृद्धाश्च वयसा पत्युरेव ताः। ततोधीयीत वेदांश्च स्वाध्यायेगु
रुणिक्षितः॥ अथानध्यायाः॥ अनध्याये प्रध्ययने प्रज्ञामायुः प्रजां तथा। ब्रह्मवीर्यं श्रियं तेजो निकृंतति
यमः स्वयं। मंत्रवीर्यक्षयस्तस्मादिंद्रो वज्रेण हंति च। ब्रह्मराक्षसस्ता यांते न रकं च भवेद्ध्रुवं। अष्टमी चतुर्दशी पर्व प्र
तिपत्सु नित्यमहोरात्रमनध्यायाः। अष्टकासु चैवं द्रश्रवण द्वादशी महाभरण्योश्च। सोपपदतिथ्योस्तद्वत् द
श्चशुद्ध द्वितीयाश्विन दशमी सिता। चतुर्थरि द्वादशी माघे च्युताः सोपपदाः स्मृताः। शयनोत्थान द्वादश्योश्च
क्षियार्क्षपरिवर्तने द्वादश्यां च। आषाढी कार्तिकी फाल्गुनी सप्तमी पक्षद्वितीया सु च। अयनपक्षांते प्रेतद्वि
तीयायां च। महानवम्यां रथसप्तम्यां च। युगादिषु च। शुक्लपक्षे द्वितीया वैशाखे प्रेतपक्षे त्रयोदशी कार्तिके न
वमी शुक्ला माघे दर्शेश्च पौर्णिमा। एता युगादयः प्रोक्ता दत्तस्याक्षयकारकाः। मन्वंतरादयः सर्वे नध्याया
इति केचन। आश्विने शुक्ल नवमी कार्तिके द्वादशी सिता। तृतीया चैत्रमासस्य सिता भाद्रपदस्य च। आ
षाढे शुक्लदशमी माघस्या शुक्लसप्तमी। श्रावणस्याष्टमी कृष्णा तथाषाढी च पूर्णिमा। फाल्गुनस्य त्व ५
मावास्या पौषस्यैकादशी सिता। कार्तिकी फाल्गुनी चैत्री ज्येष्ठी पंचदशी सिता। मन्वंतरादयश्चैता दत्तस्याक्षयका

रकाः। शवानुगमने परिवरणे वा काशशब्दे वर्षेण्या दहोरात्रं। श्राद्धिकं प्रतिगृह्य वा रण्यकमधीत्य च। मनुष्य
प्रभृतीनां नागादीनां च भुक्त्वा साहोरात्रं। स्वप्नांतमित्येके। नवश्राद्धं भुक्त्वान्नजरणांतं सूतकान्नभोजने
चैवं। महद्देकोद्दिष्टे त्रिरात्रं। गंधलेपक्षयांतं वा। महागुरुनिपाते द्वादशरात्रं। आचार्ये चोपाध्याये च प
क्षिणी समानविद्ये सब्रह्मचारिणि चाचार्यभार्यापुत्रशिष्येष्वहोरात्रं। ऋत्विग्याज्ययोनिसंबंधेष्वेवं।
विद्युत्पाते ग्न्युत्पाते गोविप्रमृतौ त्रिरात्रं। स्वशाखश्रोत्रियमरणे वाहोरात्रं। वेदसमाप्तौ प्रथमसंस्का
सु तदाहोरात्रं। अपरेद्युश्चानध्यायः। ग्रहणे तु रात्रौ मोक्षात् त्रिरात्रं। दिवा मोक्षे त्र्यहं। उपाकर्मणि
चोत्सर्गे त्र्यहं। अयने विषुवेषु पक्षिणी। निर्घात भूकंपोल्कापातादिसर्वाद्भुतेषु अकालिकोनध्या
यः। अग्न्युत्पाते न काल वृष्टौ च आर्द्रादि ज्येष्ठांतात्कालादन्यत्र काले अकालवृष्टिः। सायंसंध्या
गर्जने उदयांतोनध्यायः। अर्धरात्रादूर्ध्वं गर्जने अर्धरात्रे वा कालिकोनध्यायः। प्रातःसंध्यागर्जने वा
होरात्रं। काकोलूककुक्कुटमूषकमंडूकाद्यंतरागमने सति दिने चेद्दिनांतो रात्रौ चेद्रात्र्यंतमनध्यायः।
गवाश्वमहिषीपशुस्त्रीशूद्रावहोरात्रं। श्वमार्जारयोश्च। अरण्यमार्जारसर्पनकुलपवनस्वादौ त्रिरात्रं।
आरण्यपशुश्वसृगालवानरखंजकादौ द्वादशरात्रं। खरवराहोष्ट्रादिचंडालादिसूतकोदक्याशवादौ मा

स्मृत्यर्थ० ८

सं। गोखरव्याघ्रादिब्रह्महननास्तिकादौ त्रिमासं। शशमेषश्वपाकादौ षण्मासं। गजदंडभासर्सिंहव्याघ्र
महापापी कृतघ्नाद्यवधमनध्यायः। स्वाध्याये वा प्रवचने वर्तमाने तरागतो आधिव्याधिमृत्युविघ्नपा
पानिग्रगुरुशिष्ययोर्भेदवैति। आसन्नगृहे शोभनदिने वानध्यायः। विवाहमौंजीबंधप्रतिष्ठायापनादिषु
कर्मसमाप्तेः। सपिंडसगोत्राणामनध्यायः। यज्ञे वानुबंधे तक्रत्विजामाचार्याणां च श्वानध्याये सति त्रिरा
धरात्रावनध्यायः। एकानध्याययुग्मं वेस्यापररात्रे नानध्यायः। अनध्याययुग्मात्पूर्वदिनात्परस्य रात्राविसे
के। श्वक्रोष्टृगर्दभोलूकसामवीणार्त्तनिस्वने अमेध्यशवशूद्रांत्यस्मशानपतितांतिके। देशेषुवाल्म
निवाविद्युत्स्तनितसंप्लवे। भुक्त्वार्द्रपाणिरंभोंतः अर्द्धरात्रेतिमारुते। पांसुप्रवर्षे दिग्दाहे संध्यानीहारभी
तिषु। धावतः पूतिगंधे वा शिष्टे च गृहमागते। खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे। सप्तत्रिंशद
नध्यायानेतांस्तात्कालिकान्विदुः। सर्वकुत्सितगंधेषु परिवेषसक्षालुषु। अभ्यक्तः स्नानकालेषु महा
स्वेदेतिकंपने। गोविप्रराधने सर्वेशब्देषु श्राद्धपंक्तिषु। शाल्मलस्य कपित्थस्य कोविदारमधूकयोः
श्लेष्मातकस्य छायायामेतांस्तात्कालिकान्विदुः। चतुर्दश्यष्टमी पर्वप्रतिपत्स्वेव सर्वदा। दुर्मेधा ८
नामनध्यायस्त्वंतरायामनेषु च। तथा विस्मृतशीलानां बहुवेदप्रपाठिनां। चतुर्दश्यष्टमीपर्वप्रति

पद्वर्जितेषु च। वेदांगन्यायमीमांसाधर्मशास्त्राणि चाभ्यसेत्। उदयेस्तमये वापि मुहूर्तत्रयगामि यत्। तद्दिनंत
दहोरात्रं अनध्यायविधौ विदुः। केचिदाहुः कचिद्देशे यावत्तद्दिननाडिकाः। तावदेव त्वनध्यायो न तस्मिंश्च दिना
तरे। उपवासव्रतादीनां तिथिमाहुस्तथैव ते। चतुर्थ्यां पूर्वरात्रेषु तु नवनाडीप्रदर्शने। नाध्येयं पूर्वरात्रे स्या
त्सप्तमीत्रयोदशी। अर्द्धरात्रात्पुरस्ताच्च नाध्येयं पूर्वरात्रकं। प्रणवव्याहृतीनां च सावित्र्याः शिरसस्त
था। नित्यनैमित्तिके कार्ये व्रते यज्ञे कृते सदा। प्रवृत्ते काम्यकार्ये च नानध्यायाः स्मृतास्तथा। दैवतार्चन
मंत्राणां नानध्यायाः स्मृताः सदा। अथोत्सर्जनं ततः सार्द्धचतुरो मासान्षण्मासान्वाधीत्य पौषमा
सरोहिण्यां अष्टकायां पौषे माघे फाल्गुने वा शुक्लपक्षप्रतिपद्यन्यस्मिन्वाह्नि पौर्णमास्यां वा सह शिष्यै
र्ग्रामाद्बहिर्जलांत उत्सर्जनं कार्यं। तर्पणं च वर्षं चाधीत्योपाकर्मदिने उत्सर्जनं कार्यं न वा। तर्पणं तु का
र्यमेव। एवं व्रतानि उभयं वा पारं नीत्वा ऽप्लुतब्रह्मचर्यो विप्लवे कृतप्रायश्चित्तो गुरुं संपूज्य तदनुज्ञ
यासमावर्त्य विवाहेत्॥ इति ब्रह्मचारीप्रकरणं ॥ अथ विवाहः मातृतः पितृतः शुद्धामाशिरू
पां गुणान्वितां। अदीर्घरोगसंचारीरोगपातित्यवर्जितां। असपिंडां तु पितृतः सप्तमात्पुरुषात्परं
मातृतः पंचमादूर्ध्वम समानार्षगोत्रजां। अनन्यपूर्विकां भ्रातृमतीं श्रियं कान्यां यवीयसीं। पुमान्धी

स्मृ॰ स॰ सा॰ मान्यरोधिरोद्विजोवर्णानुपूर्वतः। विवहेद्धर्ममार्गेण ब्राह्मादिषुयथाविधि। मातुलस्यसुतांकेचित्पितृ
७ ष्वसृसुतादिकं। विवहंतिकचिद्देशेसंकोच्यापिसपिंडतां। दद्यात्प्रतिगृह्णीयात्स्नातेवसुसमाहितः। ब्रा
ह्मोविवाहआहूयदीयतेशक्त्यलंकृता। दैवोविवाहःकन्यायाकर्त्विजेदानमुच्यते। आर्षोगोमिथुने
दत्तेकन्यादानंयदातदा। प्राजापत्यःसहधर्मंचरतामितिदानतः। आसुरोद्रविणादानाद्गांधर्वःसमया
न्मिथः। राक्षसोयुद्धहरणात्पैशाचःकन्यकाछलात्। ब्राह्मदैवार्षप्राजापत्याधर्म्याः। आसुरगांध
र्वराक्षसपैशाचाअधर्म्याः। तत्राद्यश्चत्वारोविप्रस्यैव। राक्षसःक्षत्रियस्यैव। इतरेत्रयःसर्वेषां। ब्राह्मा
दिषुपूर्वंहोमःकार्यः। पश्चात्कन्यास्वीकारः। आसुरादिषुपूर्वंकन्यास्वीकारःपश्चाद्धोमःकार्यः। पिता
पितामहोभ्रातापितृव्योगोत्रजोगुरुः। मातामहोमातुलोवाकन्यादाबांधवाःक्रमात्। पित्रादिदा
त्रभावेतुकन्याकुर्यात्स्वयंवरं। शुल्कंदत्वावरेयातेपंचर्तूंसंप्रतीक्ष्यतु। कन्यान्यस्मैप्रदातव्यावाग्दा
नेतुकृतेसति। वरेदेशांतरगतेत्रीनृतूंसंप्रतीक्ष्यसा। कन्यान्यस्मैप्रदातव्यावाग्दानेतुकृतेवरे। मृ
तेन्यस्मैतथादेयामृतेसप्तपदात्पुरा। पुरापुरुषसंभोगान्मृतेदेयेतिकेचन। ऋतावदृष्टेकन्यैवपुन ७
र्देयेतिकेचन। आगर्भधारणात्कन्यापुनर्देयेतिचापरे। देशकालादिमेधर्माअनुष्ठेयाविजानता।

कुलशीलविहीनस्यषंढादेःपतितस्य च। अपस्मारविकर्मस्थरोगिणांवेषधारिणां। दत्तामपिहरेत्कन्यां
सगोत्रोढांतथैव च। मंत्रसंस्काररहितादेयान्यस्मैवरायसा। कन्यावदूषितावर्ज्यादेयान्यस्मैवरायसा। अ
न्यथातुहरन्दंड्योव्ययंदद्याच्चसोदयं। षंढांधबधिरादीनांविवाहोस्तियथोचितं। विवाहासंभवेचैषांकनि
ष्ठाविवहेत्तदा। षंढांधबधिरस्तब्धजडगद्गदपंगुषु। कुब्जवामनरोगार्तशुष्कांगविकलांगिषु। ध्वस्तपुंस्त्वे
चमत्तेचशयनस्थेनिरिंद्रिये। मूकोन्मत्तेषुसर्वेषुनदोषःपरिवेदने। पितृव्यपुत्रसापत्नेपरदारसुतादिषु
विवाहाधानयज्ञादौपरिवेद्याद्यदूषणं। ज्येष्ठभ्रात्रानुज्ञातेपरिवेद्याद्यदूषणं। पितुःसत्यप्यनुज्ञाते
नादधीतकथंचन। आधानंनकुर्यादेव। पाणिग्राह्यःसवर्णासुगृह्णीयात्क्षत्रियाशरं। वैश्याप्रतोद
मादद्याद्विवाहेब्राह्मणस्यतु। सवर्णेभ्यःसवर्णासुजायतेहिसजातयः। अनिंद्येषुविवाहेषुपुत्रः
संतानवर्द्धनः। विप्रान्मूर्द्धावसिक्तोहिक्षत्रियायांविशःस्त्रियां। अंबष्ठःशूद्र्यांनिषादोजातः। पा
रसवोपिवा। वैश्याःशूद्रस्तुराजन्यान्माहिष्योग्रौसुतौस्मृतौ। वैश्यातुकरणःशूद्र्यांविन्नास्वे
षविधिःस्मृतः। एतेनुलोमजाःपुत्राःसंस्कार्याःस्युर्द्विजातिजाः। तथामूर्द्धावसिक्तादिजातिजा
श्चाद्विजातयः। ब्राह्मण्यांक्षत्रियात्सूतोवैश्याद्वैदेहिकस्तथा। शूद्राज्जातस्तुचांडालःसर्वधर्मब

स्मृत्यर्थसार ह्निःकृतः। क्षत्रियामागधौ वैश्याच्छूद्रात्क्षत्तारमेव च। शूद्रादायोगवं वैश्या जनयामास वै सुतं। माहिष्येण करण्यां
८ तुरथकारः प्रजायते। इत्याद्याः प्रतिलोमाः स्युर्द्विजधर्मबहिष्कृताः। विवाहात्परमाधाय जुहुयाद्वाग्निहोत्रकं।
दर्शपौर्णमासाग्रयणसोमयागान्क्रमाच्चरेत्। सर्वथा प्रथमः सोमयागः कार्यो द्विजोत्तमैः। यथासंभवि
नांगेन फलं दद्यात्स दक्षिणां। आत्मसुवर्णाहरणत्वादिमहादोषापशांतये। सूर्यग्रहे कुरुक्षेत्रे मेषीकृष्णा
जिनादिकं। चंडालात्प्रतिग्रहाद्यपि यजेतावश्यकैर्मखैः। अथ वोपासनं धृत्वा जुहुयाद्वा हविषा श्रयेत्। अर्द्धा
धानेन हद्व्येयो गार्हश्रौतोभयात्मकं। एकस्त्वं स्त्रीगता भर्तुः पिंडगोत्रेव सूतके। सत्यामन्यासवर्णायां धर्म
कार्यं न कारयेत्। सवर्णासु विधो धर्म्ये ज्येष्ठया न विनेतराः। अज्ञासंपादनी दक्षा पुत्रसूः श्रीप्रियाशु
चिः। निवेद्या धर्मकार्येषु नाधिवेद्या कथंचन। सकामः कामशुचि दक्षा नियोज्या धर्मकर्मसु। अशुद्धा
जारिणीं शूद्रां दूषितां च विवर्जयेत्। सुतरां व्याधिता धूर्ता वंध्यार्थघ्न्यप्रियंवदा। स्त्रीप्रसूश्चाधिवेत्त
व्या पतिद्विड्मृतप्रजा। गृहस्थश्चक्षडग्निः स्यात्पंचाग्निश्चतुरग्निकः। स्याद्वा त्र्यग्निरथैकाग्निरना
ग्निहीनः कथंचन। गार्हमोपासनं कुर्यात्सर्वाधाने तु लौकिके। स्मार्तं च लौकिके कार्यं श्रौतं चैतानिका ८
ग्निषु॥ ॥अथात्र गोत्राणि निर्णयो वर्ण्यते। जमदग्निर्भरद्वाजो विश्वामित्रात्रिगोतमाः। वसि

प्रवर

ष्ठकश्यपागस्त्या मुनयो गोत्रकारिणः। एतेषां योन्यपत्यानि तानि गोत्राणि मन्वते। भ्रियमाणे तथा चापि
सत्रयाचानुवर्तनं। एकस्य द्वत्र्य तयत्र तद्गोत्रं तत्र कथ्यते। समानमुनिस्त्रयस्त्वमेकप्रवरतामपि। समा
नप्रवरत्वं च द्वेधा बोधायनोऽब्रवीत्। मुनिप्रणीतप्रवरैरूनं पंचाशता वयं। अनंतान्यपि गोत्राणि वग्गरि
स्यामि संध्रमहे। जामदग्न्या वत्सविदा वार्ष्टिषेणाः परस्परं। नान्वीयुः प्रवरैक्येन सगोत्रत्वेन वा द्विमो।
पस्कामित्रयुवो वैन्याः शुनकाः प्रवरैक्यतः। स्वंस्वं हित्वा गणं सर्वे विवहेयुः परावरैः। उक्ताः सप्तश्च
गोवंशा वक्ष्यतेंगिरसां गणः। गोतमाः सप्तनायास्यात्र्यारद्वंशास्तथापरे। कोमंडा दीर्घतमसस्तत्
कारेणुपालयः। वामदेवा औशनसा गोत्रार्षैक्यान्नान्वियुः। भरद्वाजाः सकपयो गार्ग्यरौक्षा
यणा इति। चत्वारोपि भरद्वाजा गोत्रैक्यान्नान्वयुर्मिथः। कवल्यांगिरसस्त्वेते विष्णुवृद्धाः सकण्व
काः। हरितारथीतराश्च मुद्गलाः प्रवरैक्यतः। स्वंस्वं हित्वा गणं सर्वे विवहेयुः परावरैः। षोडशांगि
रसस्त्वेषां प्रोक्ताः संकृतयस्तथा। संकृतीनां द्विष्यत्वा द्वसिष्ठैश्च चतुर्विधैः। स्वगणीयैः सगोत्रत्वा
त्प्रवरैक्याच्च नान्वयः। चत्वारोत्रय आद्याद्विभा द्भलकगाविष्ठिराः। मुद्गलश्चेति गोत्रैक्यात्प्रवरै
क्याच्च नान्वियुः। त्रयश्च कश्यपगणा निध्रुवा रेभ शांडिलाः। गोत्रैक्यात्प्रवरैक्याच्च नोद्वहेयुः परस्प

स्मृ॰ सा॰ रं। वसिष्ठैः कश्यपैर्नित्यं लौगाक्षीणामनन्वयः। अहर्वसिष्ठ उत्योक्तिस्तु प्रज्ञात्यागादिगोत्रराः। वसिष्ठाः
९ कुंडिनश्चैवमुपमन्युपराशराः। वसिष्ठा इति चत्वारो गोत्रे चैक्यान्नान्वियुर्मिथः। कुशिकारौवितगणारो
त्थकाकोमकायनाः कताधनंजया आजा अघमर्षणपोरणाः। इंद्रकौशिका आश्रौतिविश्वामित्रगणा
दश। नोद्वहेयुः सगोत्रत्वात्कचित्प्रवरैक्यतः। अगस्तयः सांबवाहाः सोमवाहा इति त्रयः। गोत्रैक्यात्प्र
वरैक्याच्च नोद्वहेयुः परस्परं। वर्णा एकोनपंचाशत्प्रसिद्धा मुनिभिः स्मृताः। अप्रसिद्धाः परे चैंशा अं
तर्भूता इहैव ते। विश्वामित्रात्रिगोत्रैश्च नोद्वहेयुर्धनंजयाः। अत्रेस्तु पुत्रिकापुत्रा वामरथ्या दपस्त
था। तथैव जातूकर्ण्याश्च वसिष्ठैरत्रिभिः सह। भारद्वाजेन भृंगेण विश्वामित्रस्य शैशिरिः। क्षेत्रज्ञा
तो द्विगोत्रर्षिः प्रोच्यते शौंगशैशिरिः। विश्वामित्रभरद्वाजैस्तु ज्ञानां तेन नान्वयः। कपिज्ञानां भरद्वाजै
विश्वामित्रैश्च नान्वयः। गुरोः सगोत्रप्रवरा नोद्वाह्याः क्षेत्रविज्जनैः। स्वगोत्राद्यनभिज्ञैश्च विप्रैराचार्य
गोत्रजाः। दानादिनान्यगोत्रास्युरज्ञातगुरुगोत्रिणः। समानप्रवरोद्वाहनिषेधः क्षत्रवैश्ययोः। प्र
वरान्मानवात्ख्यात्प्रवराश्चान्यगोत्रतः। इत्थं सगोत्रसंबंधविवाहविषये स्थिते। यदि कश्चिदज्ञानात् ९
स्तां कन्यामुद्वोपगच्छति। गुरुतल्पव्रतां शुध्येद्गर्भस्तज्ज्ञो स्यतां व्रजेत्। सोमातस्तां परित्यज्य पालयेज्जन

नीमिव। अज्ञानाद्वेदं दद्यैस्तु शुद्ध्येद्गर्भस्तु कश्यपः। मदहृद्मिर्महतो यत्नात्कृतः प्रवरनिर्णयः। जामदग्न्या
वत्सबिदा आर्ष्टिषेणास्तथैव च। पंचावर्तिन एवान्ये सर्वे चतुरवत्तिनः। ॐ। विवाहे वितते तंत्रे होमकाल उ
पस्थिते। कन्यामृतुमतीं दृष्ट्वा कथं कुर्वीत याज्ञिकाः। स्नापयित्वा तु तां कन्यामर्चयित्वा तु यथाविधि। युंजा
नआहुतिं कृत्वा ततः कर्म प्रवर्तयेत्। यद्वा। विवाहहोमे प्रक्रांते यदि कन्या रजस्वला। त्रिरात्रं दंपती स्या
तां पृथक्शय्यासनाशनौ। चतुर्थेहनि सुस्नातौ तस्मिन्नग्नौ यथाविधि। विवाहहोमं यद्विवेकुर्यादित्या
दिस्मृतिसंग्रहः। विवाहे दंपती स्यातां त्रिरात्रं ब्रह्मचारिणौ। अलंकृता वधूश्चैव सहसस्यासना
शनौ। अधर्म्येषु विवाहेषु तां वृलम्नुमोदने। हायनं भोजनं नैव वर्जयेत्सर्वथा द्विजः। आसुरे तु पंचा
सस्या द्रांधर्वे तु त्रिरात्रकं। राक्षसे नैव पैशाचे कार्यं सां द्वायणं तथा। गर्भाधानादिसंस्कारे श्विष्टापू
र्तकृते चापि। वृद्धिश्राद्धं पुरा कार्यं कर्मारंभे स्वस्तिवाचनं। वृद्धमुख्यास्तु पितरो वृद्धिश्राद्धेषु भुंजते। चूडा
होमावसानेषु बाकुमुख्याः प्रभुंजयेत्। वसवो रुद्रा आदित्यास्त्रयस्त्वाः कामरूपिणः। बालायुवा
नो वृद्धाश्च पितॄणामाश्रयाः स्मृताः। प्रेतानामाश्रया रुद्वायमश्चेवीतरस्मृतः। असंस्कृतप्रमी
तानां प्रहारविश्रुक्षिबाश्रयाः। अनाश्रितानां जीवानां दत्तं नैवोपतिष्ठते। प्रारंभादूर्ध्वमाश्चौचे वि

वाहः कार्य एव तु। प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः। नांदीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया। निमंत्रणं
वा श्राद्धेषु प्रारंभः स्यादिति स्मृतिः। गणशः क्रियमाणानां मातॄणां पूजनं सकृत्। वृद्धिश्राद्धं तंत्रं स्याद्धोमं
कुर्यात्पृथक्पृथक्॥ इति विवाहप्रकरणं॥ अथाह्निकमुच्यते तत्र प्रभात उत्थाय इष्टदेवतामन
नसा ध्यात्वा तदहः कृत्यजातं स्मृत्वा संध्योपासनं कुर्यात्। तत्र मूत्रपुरीषोत्सर्गमेवं कुर्यात्। अंतर्धानस्य
त्यायाज्ञिकादि शुष्ककाष्ठतृणलोष्ठपर्णादिकं गृहीत्वा शिरः प्रावृत्य निवीतं पृष्ठतः कंठलंबितं धृत्वा एक
वस्त्रश्चेत्कर्णे दक्षिणे निधाय दिगवलोकनं कृत्वा काष्ठाद्यंतर्धानं मूत्रे कुर्वन्न वा। मौनं वा घ्राणस्य पिधा
नं क्रमात्कृत्वा दिवासंध्ययोरुदङ्मुखो रात्रौ दक्षिणामुखो मूत्रपुरीषोत्सर्गं कुर्यात्। फालकृष्टे जले चि
त्यां वल्मीके गिरिमस्तके। देवालये नदीतीरे दर्भपुष्पेषु शाद्वले। सच्छायेषु वृक्षेषु मार्गे गोष्ठांबुभस्म
सु। अग्नौ गर्ते श्वति ष्ठंश्च विष्ठां मूत्रं च नोत्सृजेत्। वाय्वग्न्यर्केंदुगोसोमसंध्यास्त्रीद्विजन्मनः। प
श्यन्नभिमुखं चैतान्विष्ठां मूत्रं न नोत्सृजेत्। सर्वे निषेधा नैव स्युः प्राणबाधभयेषु च। काष्ठादिनात्मपा
नसत्त्वममेध्यं निम्रज्जीत च। रथ्यावत्वरतीर्थेषु स्मशाने गोमये जळे। अगारोद्यम सप्राणियज्ञभूमिषु
नोत्सृजेत्। कंदमूलफलांगारे नामेध्यं निम्रज्जीत च इति मूत्रपुरीषोत्सर्गविधिः॥ अथ शौचविधिः॥

शौचे यत्नः सदा कार्यः शौचमूलो द्विजः स्मृतः। शौचाचारविहीनस्य समग्रं कर्म निष्फलं। शौचं तु द्विविधं प्रोक्तं बाह्य
माभ्यंतरं तथा। मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथांतरं। गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः। गं
धलेपक्षयकरं शौचं कुर्यादतंद्रितः। अंतर्गृहे जले देवगृहे वल्मीके मूषकस्थले। कृतशौचावसिष्टाश्च न
ग्राह्याः पंच मृत्तिकाः। मार्गी खरस्मशानस्थाः पांसुला मलिनाश्च न जेत्। कीटांगारास्थिरहिता माहरेच्छर्क
रान्विताः। वापीकूपतडागेषु नाहरेद्बाह्यमृत्तिकां। अंतर्जले गताग्राह्या दूरतो मणिबंधनात्। आरण्यके षु
त्वेवं स्याद्ग्राम्ये घ्याहरणं विदुः। मसे। एका तु मृत्तिका लिंगे तिस्रः सव्ये करे स्मृताः। करद्वये मृद्द्वयं स्यान्मृत्स
माणमनेकधा। त्रिपर्वपूरमात्रा वा मृत्तिकाक्षप्रमाणिका। आर्द्रामलकमात्रा वा मूत्रशौचे तु मृत्तिका
। मूत्राच्छुद्धिगुणा शुक्रे मैथुने त्रिगुणा स्मृता। पुरीषे तु। पंचापाने मृदः क्षेप्याः करे वामे दश स्मृताः। कर
योः सप्त दातव्याः पुरीषे मृत्प्रमाणकं। अर्द्धप्रसृतिमात्रा द्याद्दर्धार्द्धस्तततः परं। यद्वापाने मृदस्ति
स्रः प्रसृतस्य द्वित्रिभागिकाः। यद्वा प्रसृतिमात्रास्तिस्रः पाण्योः पाण्योः पृथक्पृथक्। एतच्छौचं गृहस्थानां
द्विगुणं ब्रह्मचारिणां। त्रिगुणं स्याद्वनस्थानां यतीनां तु चतुर्गुणं। यद्दिवा विहितं शौचं तदर्द्धं निशि कीर्ति
तं। तदर्द्धमातुरे प्रोक्तं मातुरस्यार्धमध्वनि। स्त्रीशूद्रादेरशक्तानां बालानां चोपनीतितः। गंधलेपक्ष

यकरं शौचं कार्यं न संख्यया। एकैकया मृदा पादौ हस्तौ प्रक्षालयेत् ततः॥ इति शौचविधिः ॥अथाचमनविधिः
तत्र पादौ हस्तौ प्रक्षाल्य यज्ञोपवीती पादौ भूमौ प्रतिष्ठाप्य निबद्धकच्छशिखः पुंडरीकाक्षमिष्टदेवं स्मृत्वा प्र
कृतिस्थं फेनबुद्बुदरहितं संहतांगुलिपाणिर्नाबुगृहीतांगुष्ठकनिष्ठिकाभ्यां शेषं वीक्षितं ब्रह्मतीर्थेन त्रि
श्चतुर्वा समाहितः पिबेत्। न पिब्रेण कदाचन। पीत्वा हस्तौ प्रक्षाल्य संहतांगुलिभिर्मुखं सकृद्वा निमृज्य
हस्तौ प्रक्षाल्य पादौ शिरश्चाभ्युक्षेन्नवा। संहतांगुलिभिरास्य प्रदेशं सलोम प्रदेशं स्पृष्ट्वा हस्तौ प्रक्षा
ल्यांगुष्ठप्रदेशिनीभ्यां घ्राणं स्पृशेत्। अंगुष्ठानामिकाभ्यां चक्षुषी श्रोत्रे च स्पृशेत्। अंगुष्ठकनिष्ठि
काभ्यां नाभिं हृदयं तलेन सर्वांगुलिभिः शिरो बाहुमूले सर्वांगुल्यग्रैः स्पृशेत्। सर्वत्र मध्ये मध्ये जलं स्पृ
शेत्। अशक्तौ त्रिः पीत्वा हस्तं प्रक्षाल्य मुखं प्रमृज्य खानि स्पृशेत्। अत्यशक्तौ पीत्वा हस्तं प्रक्षाल्य
श्रोत्रं स्पृशेत्। हृत्कंठतालुगाभिस्त्वद्भिः शुद्ध्यः क्रमाद्द्विजाः। स्त्रीशूद्रादयोंततः सकृत्स्पृष्टाभिः
शुद्ध्याः। नवर्षधारास्वाचमेत्। तप्ताभिश्चाप्यकारणात्। कनिष्ठादेशिन्यंगुष्ठमूलेषु नले करस्य पि
त्र्यब्रह्मतीर्थानि। कराग्रे दैवं। करमध्ये सौम्यमग्नितीर्थं च। निर्वापणं संस्रावणं काञ्जहोमं नित्य ११
होमान् कायेन तीर्थेन कुर्यात्। दैविकं च। अर्घ्यं न बलिप्रक्षेपणं पर्युक्षणमार्जनं भोजनं नित्यहो

मान् दैवेन। दैविकं च। पैत्रिकं पित्र्येण। कमंडलुस्पर्शनं दधिप्राशनं नवान्नप्राशनं मृद्ग्रहणं दैविकं सौम्येन कु
र्यात्। आग्नेयेन प्रतिग्रहं कुर्यात्॥ इत्याचमनविधिः ॥अथाचमननिमित्तानि। उच्छिष्टस्पर्शने पा
दावसेचने शिखामोक्षे। यज्ञोपवीतागमे च उदकमुत्तीर्यावतीर्य च सर्वेषु संदेहेषु आचमेत्। आस्यग
तश्मश्रुस्पर्शने। बालोमकोष्ठस्पर्शने दंतगमने च दंतसिक्तस्य जिह्वायां स्पर्शने च रथ्याप्रसर्पणे च
रोदने च अस्नेहदर्पणे च खास्थिस्पर्शने च विण्मूत्ररेतःशौचांते च पीत्वा चावलीढे दंतसिक्ते निष्ठीव्य देवता
विगमने च द्विराचामेत्। स्नात्वा पीत्वा चावलीढे च निष्ठीव्य सुप्त्वा धौतवासो विपरिधाय संपरिधा
य च अभ्यंगे कृते अहविर्भक्षणे च कृते द्विराचमेत्। भोजने दाने उपहारे प्रतिग्रहे। संध्यात्रया
बुपानेषु पूर्वं पश्चाद्द्विराचमेत्। स्वाध्याये च वस्त्रादि सहितं उच्छिष्टश्चेत् तदालस्यां के निधाय वासःस स्यां
हितः शुध्येत्। निधाय वा तं मृच्च वस्त्रादिकं प्रोक्षेत्। अतिपानादि सहितं उच्छिष्टश्चेन्निधायास्य
प्रोक्षेत्। अन्नादि रक्षाशक्तौ तु तदालभ्यां के पिनिधाय वासोम्यं च वस्त्रादिकं प्रोक्षेत्। न कुर्यात्।
परिवेषणं कुर्वन्नुच्छिष्टस्पर्शे अन्नपात्रं निधाय भूमावाचम्याभ्युक्ष्य परिविष्यात्। परिवेषणं
कुर्वन्मूत्राद्यशुचिश्चेद् अन्नादिकं निधाय शौचाचमने कृत्वा अन्नादिकं प्रोक्ष्य अग्निमर्कं वा सस्मृत्य

परिविषात् । परिवेषणे रजोदृष्टे तत्स्पृष्टस्यान्नस्य त्यागः । अन्नाधारे चांडालसूतिकोदक्यापतितादि
स्पृष्टे त्याग एव । रजकादिस्पृष्टे तु जलेनाप्लाव्याग्निमर्कं वा स्पर्शयेत् । उच्छिष्टोपहतस्त्रीशूद्रसं
भाषणे वा स्पृश्यदर्शने वापि त्र्यमंत्रानुश्रवणे आत्मालंभे च मोक्षणे अधोवायुसमुत्सर्गे आक्रंदे
क्रोधने क्षुते । मार्जारमूषिकास्पर्शे प्रहासे क्ष्वेडने तथा । अन्त्यजैः संभाषणे दर्शने च कर्म कुर्व
न्नाचमेत् । श्वकाकादिस्पर्शने चैवं । अकर्म कुर्वन्पूर्वेषु दक्षिणं श्रवणं स्पृशेत् । अनुष्ठाने त्वग्निगोवि
प्रस्त्रीप्रच्युतकेशनखस्पर्शने नीवीस्रंसने वापः स्पृशेत् । आर्द्रं तृणं गोमयं वा भूमिं वा ओषधीः
स्पृशेत् । कर्णं वा स्पृशेत् । स्त्रीकंकणरक्तपूयस्वेदस्पर्शने तु प्रक्षाल्य वा दिकं स्पृशेत् । आप
त्सु नैमित्तिककर्मांगाचमनस्थाने अब्वादिस्पर्शनस्याशुद्ध्यर्थे । अग्निस्तीर्थानि वेदाश्च वरुणार्केंदु
वायवः । विप्रस्य दक्षिणे कर्णे नित्यं तिष्ठंति पूजिताः । जपहोमप्रदानेषु पितृपिंडोदकादिषु । कृते श्वा
चमनं कार्यं पितृकार्येषु सर्वदा । नास्पृश्यं स्पृष्ट्वा नाचमेत् । न फलकाद्यासनमासीनो न त्रिपाद्यं
नान्यार्थ आसने न भोजनार्थ आसने भुक्त्वाचमेद्वा । नान्यदानान्यासने । न शयने । न पादुको
पानद्धस्थः न दुर्दर्शने पादाग्रस्थो न प्रह्वो न तिष्ठन्न व्रजन्नाप्रणतो नान्यमना न विलोकयन् । न
हसन्न रुदन्न जल्पन्न नग्नो नैकवस्त्रो नाजलिना न परं स्पृशन्न वामहस्तेन न बहिर्जानुकरो न

प्रौढपादो न प्रसारितपादो न बद्धासनो न गले बद्धो न वेष्टितशिरा यज्ञोपवीतमुत्तरीयं वान्यथा धृत्वा ना
चमेत् । तत्र सम्यग्धृत्वा पुनराचमेत् । यज्ञोपवीते नष्टे अन्यसूत्रं वस्त्रं वोपवीय नाचमेत् । वामहस्ते कु
शेन्य दर्भे वा स्थिते दक्षिणेन न पिबेत् । आपः करनखैः स्पृष्टा न पिबेत् । तत्सुरावद्दृष्टं । आचमनाद्यु
च्छिष्टेषु दूर्वादूरतो वर्जयेत् । न सांगुलिक्षिप्ताचमेत् । नातीर्थेन न शब्दवत् । नाविनीतः । नास्वभावं नोच्छिष्ट
कमकारणात् । वामेन पात्रमुद्धृत्य न पिबेद्दक्षिणेन तु । सौवर्णरौप्यताम्रैश्च वेणुबिल्वाश्मचर्मभिः । अ
लाबुदारुपर्णैश्च नालिकेरैः कपित्थकैः । तृणकाष्ठजलाधारैर्न्यांतरितमन्मयैः । वामेनोद्धृत्य वा
वामे दन्यदा तु रसंभवे । विनायांतोश्मश्रुशिखिनित्यं बद्धकंठे शिरस्यपि । पवित्रकर आचामेत्कुशैः कर्मा
र्थमादरात् । कुशामात्रकरो वापि दर्भमात्रकरोपि वा । तदोंकारेणाचमनं यद्वा व्याहृतिभिर्भवेत् । सा
वित्र्या वापि कर्तव्यं यद्वा कार्यममंत्रकं । तत्कुशं विधिवल्लूनं न त्यजेदन्यथा त्यजेत् । अन्ये दर्भास्त
संसाद्यास्साद्या दूर्वापुरेव तु । न पादप्रक्षालनशेषमाचमेत् । यद्वा वामे कूर्मोजलं स्त्रावयित्वाचामेत् ।
नाग्न्युदकशेषेणाचामेत् । यद्वा वामे कूर्मोजलं स्त्रावयित्वाचामेत् । न पादप्रक्षालनशेषेणाचम
नशेषेण नाग्न्युदकशेषेण कर्म कुर्याद्यदि कर्म कुर्यात्कूर्मोजलं स्त्रावयित्वा तत्रान्यांबु पात्रस्था

 पथितो इत्यकर्माणि कुर्यात्॥ अथाचमनापवादः ॥ आस्निग्धे औषधे जग्धे स्निग्धे च दंत
१३ लोचने। नाचामेद्भोजने वृत्ते शुद्ध्यर्थं क्रमुकादिषु। अन्येषु वामसक्ष्येषु संभारेषु सुगंधिषु। तांबूले क
मुके होमे मुकस्नेहे नुलेपने। इक्षुदंडे तिले मूले पत्रपुष्पफलेषु च। तथा तकृत्णे काष्ठेषु नाचामेदामभक्ष
णे। मधुपर्के च सोमे च प्राणाहुतिषु शाक्षु च। आस्यहोमेषु सर्वेषु नोच्छिष्टो भवति द्विजः। दंतवद्दंतलग्नेषु सार
ज्ञाने शुद्धं। जिह्वायास्पर्शे त्व शुद्धं। तत्र कर्पास्पर्शनं। अन्यथा स्यगतं शुद्धं अन्यत्राचांते तत्स्थानाच्यु
गी तेनिगिरन्स्यजन्नाचार्कं पस्पृशेत्। यद्वा निर्गकर्णस्पर्शः। त्यक्के त्वाचमनं। रसज्ञाने स्वसंभारे द्विराच
मनमिष्यते। अन्यथा स्यगतं नैव मात्रांतेष्वविधिष्टकं। आस्यं संशोधयेद्यत्नात् दंतांश्च मृदयत्नतः।
दंतवद्धे महत्पापं रक्तमध्यसमं विदुः। एवं कृते यत्स्थितं स्यात्तद्दोषाय सर्वदा। ओष्ठश्मश्रुगतो ले
पः शुद्धः प्रक्षालितः स्थितः। मुखजा विप्रुषः शुद्धाः सेक्ष्मा स्वाश्च पराश्च ताः। स्थूलाश्च विप्रुषः शुद्धा
यद्यंगे न पतंति ताः। अंगपाते तु प्रक्षाल्य आचमेत्परस्य चेत्। बिंदुधाचमनं कुर्युरंगे पतितेष
पि वेदाश्यास्य मुखाज्जाताः शुद्धा एव तु सर्वतः। श्मश्रु वास्यगतं शुद्धं यद्यंगे न तु न स्पृशेत्। पर १३
स्य स्पर्शने शुद्धा भूस्पृष्टा चमबिंदवः। जानुमात्रे जले तिष्ठन्नाचामन्हि न दुष्यति। उपविष्टः

समाचामेज्जानुमात्रादधो जले। आकांतो जले शुद्ध्ये द्विहिराचमने बहिः। बहिरंतःस्थ आचांते सर्वत्र शुचिर्
भवेत्। जलस्थो जलकार्येषु स्थलस्थः स्थलकर्मसु। उभयेषूभयस्थस्तु आचांतः शुचिमाप्नुयात्। न जले
शुक्लवस्त्रेणान स्थले वार्द्रवाससा। आचामादिक्रियां कुर्याद्विहिर्जानुर्न कुत्रचित्॥ इत्याचमनापवादः
॥ अथ दंतधावनविधिः॥ प्रातर्मुक्ता च शुद्ध्यर्थं कर्तव्यं दंतधावनं। प्राङ्मुख ईशानाभिमुखो वा दक्षिणे
बाहुमुध्दृत्यांतर्जानुकर उपविश्याति कषायकटुकसुगंधिकंटकीक्षीरवृक्षगुल्मलतादीनामेकेन
प्रक्षालितेन वाग्यतो दंतान्धावयेत्। तत्र वृक्षजं काष्ठं स्यादव्रणं ऋजुं कीटाद्यदूषितं तद्द्वादशांगुलम
ष्टांगुलं वा कनिष्ठिकाग्रसमं स्थूलं पर्वार्धकृतकूर्चकं दंतधावनमुद्दिष्टं जिह्वालेखनिका तथा। क्ष
त्रादिषडंगुलं गुलद्वासः। स्त्रीणां चतुरंगुलं। सर्वेषां वैके। आयुर्बलं यशोवर्चः प्रजाः पशुवसूनि च। ब्रह्म
प्रज्ञां च मेधां च त्वं नो देहि वनस्पते। दंतधावनमंत्रः। प्रक्षाल्य भंक्त्वा त्यजेत्। तत्र खदिरकरंजवेकंक
तकरवीरकुंजराशनार्कसर्जारिमेदापामार्गमालतीबिल्वाम्रकदंबवंजुलवेणुप्लक्षमापकबदरशिरी
षकोविदारपलाशशाखावृक्षशिखंडीप्रियंगुतमालाः प्रशस्ताः। शाल्मलिभव्यकिंशुकपीलुबिभीतक
गुग्गुलीबधकुसुकस्पृष्टतिंदुकमधूककुरबकतरुपारिभद्राम्लिकाश्च वर्ज्याः। इष्टकालोष्ठपाषाणैर्न

कुर्याद्दंतधावनं। दधिमीलिधत्रामोवाः कदंबेंगुदतिंदुकाः। मधूकमल्लिकाढक्यासक्तकार्पासश्रीहनाः। नतोदुं
बरश्च वटश्च ककुभश्च शिंशिपाः शिग्रुश्च कुशकाशौ दंतशुद्धौ गांपश्येन्नान्यथाशुचिः। निर्गुंडीशिंशिपशाखाः
कदंबककुभावटाः। विहितप्रतिषिद्धाः स्युरिमेतस्मादिकल्पिताः। पलाशं कुसुमं काशं शिंशिपं कार्पासंदम
यंती। शाल्मलीशिरीषं शमीलश्मण्कंकरंजवयार्कबकुलपारिजातकं। निर्गुंडीस्तूरीमुखकंटकिनश्च
पूतिगंधोश्रगंधं मधूरविदुलविधवविषदुग्धं मूढं शुष्कं च वर्जयेद्दिल्येके। आसने शयने यानि पादुके दं
तधावने। पालाशाश्वत्थको वर्ज्यौ सर्वकुत्सितकर्मसु। श्राद्धयज्ञे वनियमे पत्यौ च प्रोषिते तथा। अजी
र्णो च विवाहे च उपवास व्रतेषु च। प्रतिपद्दर्शषष्ठीषु नवम्यां च विशेषतः। षष्ठीप्रतिपदोर्भूताष्टमीपर्वसु
विशेषतो दर्शे नवम्यां च तैलाभ्यंगं स्त्रियं मांसं दंतकाष्ठं च वर्जयेत्। अभावे दंतकाष्ठानां निषिद्धदिव
से तथा। अपां द्वादशगंडूषैर्विदध्याद्दंतधावनं। यद्वा तृणपर्णोदकेनांगुल्या वा दंतान्धावयेत्। प्रदे
शिनीं वर्ज्य। मध्यमानामिकांगुष्ठैर्दंतदार्ढ्यं भविष्यति॥ इति दंतधावनविधिः॥ अथ स्ना
नविधिः॥ संशोध्य दंतानारभ्य विधिवत्स्नानमाचरेत्। स्नानमूलाः क्रियाः सर्वाः श्रुतिस्मृत्युदितान्न १४
णां। अस्नातस्तु पुमान्नार्हो जपहोमादिकर्मसु। गुणा दश स्नानपरस्य साधो रूपं च तेजश्च बलं च शौचं।
पुंसो

तप
आयुष्यमारोग्यमलोलुपत्वं दुःस्वप्ननाशश्च यशश्च मेधा॥ स्नानेन मनः प्रसादः स्याद्देवताभिमुखाः सदा। सौभा
ग्यं श्रीः सुखं पुष्टिः पुण्यं विद्यायशोधृतिः। महापापान्यलक्ष्मीश्च दुरितं दुर्विचेष्टितं। शोकदुःखार्त्तिहरणं प्रातःस्ना
नं विशेषतः। प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः। यतेस्त्रिषवणं स्नानं सकृत्तु ब्रह्मचारिणः। सर्वे चापि
सकृत्कुर्युरशक्तौ चोदकं विना। स्नानं च सर्ववर्णानां कार्यं शौचपुरःसरं। समंत्रकं द्विजातीनां स्त्रीशूद्राणाममं
त्रकं। नमस्कारेण मंत्रेण सच्छूद्राणां क्रियाः स्मृताः। न जले शुष्कवस्त्रेण स्थले वैवार्द्रवाससा। तर्पणाचम
नं जप्यं मार्जनादिकमाचरेत्। श्राद्धस्नाने च सूर्यार्घ्ये तपोत्सर्जनतर्पणे। जलेषु होमान्शुष्केण जले कुर्व
न्न दुष्यति। स्नानं च ह्यष्टविधं प्रोक्तं वारुणेतरभेदतः। तत्रापि वारुणं मुख्यमितरद्गौणमेव च। आग्नेयं वारु
णं ब्राह्मं वायव्यं दिव्यमेव च। सारस्वतमिति स्नानं स्मृतं षोढैव तत्त्वतः। आग्नेयं भस्मना स्नानमद्भिर्वारुण
मुच्यते। आपोहिष्ठेति च ब्राह्मं मंत्रस्नानं हितत्स्मृतं। पठन्द्विजश्शक्रकुशैश्च मार्जनेनतन्मतं स्मृतं × विद्वत्स
रस्वती वा वाप्राप्तं सारस्वतं स्मृतं। दिव्यं तीर्थमयं स्नानं गुर्वाचार्येरितं तथा। × ब्रह्महस्तच्युतं तोयं शिरसा
धारयेदिति। यत्स्मृतं तंतदपि ब्राह्मं वायव्यं रजसा गवां। दिव्यमातपवर्षाद्भिर्गंगास्नानसमं स्मृतं × सर्वती
र्थाभिषेकाख्यपवित्रं विदुषां हि वाक्। चंडालादिस्पर्शनेतु कार्यं वारुणमेव तु। कार्यं मलापकर्षं च क्रिया स्नानं

वारुणं। इतराणि यथायोग्यं देशकालाद्यपेक्षया। स्रोतसोऽभिमुखः स्नायान्मार्जने चाघमर्षणे। अन्यत्रार्कमु
खो रात्रौ प्राङ्मुखोऽग्निमुखोऽपि वा। संध्यामुखस्तु संध्यायां तथैवार्यं तयामयोः। नित्यं नैमित्तिकं काम्यं क्रियांगं मल
कर्षणं। क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्तितं। नित्यमेव तु मध्याह्ने प्रातस्तु कुत्र कस्यचित्। यतिव्रतिब्रह्मचा
रिहोत्रध्येतृतपस्विनां। उच्छिष्टादुपघातेषु वास्पर्शस्पर्शनेषु च। ग्रहसंक्रमणे दोषे स्नानं नैमित्तिकं स्मृतं। पुष्य
स्नानादिकं काम्यं दैवज्ञविधिचोदितं। इष्टापूर्तक्रियार्थं च क्रियांगं स्नानमुच्यते। मलापकर्षणं चैला स्नानमभ्यं
गपूर्वकं। स्नानमेव फलं तीर्थे क्रियास्नानं तदुच्यते। स्नानमुक्तवगाहोऽवखाशक्त्यस्नानमाचरेत्। प्रक्षाल्योच्छि
ष्टमुच्छिष्टस्तथैव स्नानमाचरेत्। नाल्पांभसि नरो मज्जेदन्यत्रापि सरित्सु तु। उदयात्पूर्वमूर्ध्वं वा स्नानं स्यात्सं
गवेऽपि वा। नावगाहेत्समुद्रके। क्रियास्नाने शिरोमज्जेदन्यत्रापि सरित्सु तु। उदयात्पूर्वमूर्ध्वं वा स्नानं स्या
त्संगवेऽपि वा। प्रातः संक्षेपतः स्नानं होमाद्यर्थं तदिष्यते। नदीसरिद्देवखातगर्तप्रस्रवणेषु च। सरस्सु चाकृत्रिमेषु श
स्तं तीर्थविशेषतः। वाप्यां कूपे तडागे वा पारक्ये चोद्धृवारिणि। प्रातःस्नानं सदा कुर्यादुष्णेनैव सदातुरः। तत्र पादौ
मुखं प्रक्षाल्य प्रणवं सावित्रीं स्मृत्वा शिखां बध्वाचम्य तटं प्रक्षाल्य दर्भान्निधाय दर्भपाणिर्जलं नत्वा प्रणतां
जलिः प्राङ्मुखोऽवगाह्य कक्षादीन्निमज्ज्य स्नात्वाद्भिराचम्य दर्भपाणिरापोहिष्ठेत्याद्यैर्दैवतैर्मार्जनं कृत्वांज १५
लालोडनमघमर्षणं कुर्यान्न वा। पुनः स्नात्वाद्भिराचम्य जलतर्पणं कार्यं न वा। ततो वस्त्रप्रांतं निष्पीड्यापः स्पृष्ट्वाव

स्त्रं च संपरिधाय तत उत्तरीयं धृत्वा स्नानवस्त्रं निष्पीड्याचम्य संध्यामुपासीत॥ मध्याह्नस्नाने त्वयं विशेषः॥
कार्यं माध्याह्निकं स्नानं संक्षिप्तं वापि विस्तृतं। संक्षिप्तस्य प्रयोगोऽत्र वक्ष्यते स्मृतिसंग्रहात्। तत्र कृतशौचोऽद्भि
राचम्याविक्षुब्धं शिवं सूर्यं वेष्टदेवतां नत्वा प्रक्षालिते तटे मृत्तिकां दर्भानक्षतांस्तिलांश्चकुलान्स्थसंस्थाप्य
मृत्तिकां त्रेधा विभज्य भागेनैकेन नाभेरधः संलिप्य प्रक्षाल्य स्नात्वाद्भिराचम्य भूर्भुवः स्वरिति मृत्तिकां
प्रोक्ष्य हस्ताभ्यां तत्सवितुर्वरेण्यमिति सूर्यस्य दर्शयित्वा नाभेरधः स्योना पृथिवी भवेति वा पृथिवि शांते
ति वालिप्यान्यं भागं सूर्ये दर्शितं नाभेरूर्ध्वं गंधद्वारामिति आलिप्यापो [illegible] मातर इदमापः प्रवहत
सुमित्र्यान आप इति शिरस्युपस्पृश्य दुर्मित्र्यास्तस्मै संतु इति बहिः प्र[illegible]यापोऽस्मान्द्वेष्टि यं च वयं द्विष्मस्तं
हन्मीति मृच्छेषं प्रक्षाल्य अतीर्थे गंगादितीर्थं स्मृत्वा नत्वा हिरण्यशृंगमिति वरुणं नत्वा तीर्थं चतुर्हस्तं
प्रक्षाल्य पुनः स्नात्वाचम्याद्वे च ते वारुणो शुद्धः शुचिरपि वा त्रिलिंगैर्मार्जनं कृत्वा इमं मे गंग इति जलं त्रिरालो
ड्य मग्नोऽघमर्षणं कुर्यात्। तत्राघमर्षणं। अंगुष्ठांगुलिभिः श्रोत्रदृक्पट्टनासिकामुखं पिधाय निम
ग्नः त्रिः षडष्ट द्वादश वा आवर्तयेदघमर्षणं। अघमर्षणं तु ऋतं च सत्यं चेति सूक्तं। द्रुपदां वा जपेद्वं। ॐका
रं वा जपेद्विष्णुं शिवं सूर्यं स्मरेत्तु वा। ततस्त्रिः पंच सप्त दश द्वादश वारं वाप्लुत्याद्भिराचम्य जलमध्य एवार्द्रवा

स्मृत्य·सा· ससाजलतर्पणं कुर्यात्। ततोजलादुत्तीर्यस्नानवस्त्रप्रांतं तटे निष्पीडयेत्। अयेकेचास्मत्कुले जाता अपुत्रागो
त्रिणो मृताः। तेगृह्णंतु मयादत्तं वस्त्रनिष्पीडनोदकं। ततः स्नानार्द्रवस्त्रः शुक्लमहतं कार्पासं क्षौमं वाप्यंतं धा
१८ तुरक्तं वा वस्त्रद्वयं परिधाय जंघे पादौ प्रक्षाल्य द्विराचम्य गंगादिमृत्तिकयोर्ध्वपुंड्रं कुर्यात्। अथनित्यब्र
ह्मयज्ञतर्पणादि कुर्यात्॥ अथतर्पणविधिः। अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु। सव्योत्तराभ्यां
पाणिभ्यां मध्यगात्तर्पणं भवेत्। श्राद्धे पिंडे विवाहे च दाने नैकेन दीयते। तर्पणे तूभयेनैव जलं देयं तु नान्य
था। वामहस्ते तिलान्क्षिप्त्वा जलमध्ये तु तर्पयेत्। स्थले शाखांतरे पात्रे रोमकूपेन कुत्रचित्। असंस्कृत
प्रमीतानां जले दद्याज्जलांजलिं। शुक्लैस्तिलैर्देवानुपवीती दैवेन तीर्थेन प्राङ्मुखस्तर्पयेत्। शबले
स्तिलैरृषीन्निवीती कायेन तीर्थेन उदङ्मुखस्तर्पयेत्। आचार्यान्पितॄन्प्राचीनावीती पित्र्येण ती
र्थेन कृष्णैस्तिलैर्दक्षिणामुखस्तर्पयेत्। यद्वा शुद्धोदकैर्देवानृषींश्च पितॄंस्तिलैः सर्वान्वा सर्वैस्तर्पयेत्।
यद्वाक्षतैस्तंडुलैर्देवानृषीन्तिलैः पितॄन्। देवानामेकैकमंजलिं दद्यात्। ऋषीणां द्वौ द्वौ पितॄणां त्रीन् श्री
वारान्दद्यात्। स्वस्वशाखाप्राप्तैर्मंत्रैः। यद्वा ब्रह्मादयो ये देवास्तान्देवांस्तर्पयामि। भूर्देवांस्तर्पयामि। भुवर्देवां १८
स्तर्पयामि। स्वर्देवांस्तर्पयामि। भूर्भुवःस्वर्देवांस्तर्पयामि। कृष्णद्वैपायनादयो ये ऋषयस्तानृषींस्तर्पयामि।

भूरृषींस्तर्पयामि। भुवरृषींस्तर्पयामि। स्वरृषींस्तर्पयामि। भूर्भुवःस्वरृषींस्तर्पयामि। ततः कव्यवाहनाद
यो ये पितरस्तान्पितॄंस्त·भूः पितॄंस्त·भुवः पितॄंस्त·स्वः पितॄंस्त· भूर्भुवःस्वः पितॄंस्त· ततआत्मपित्रादी
न्प्रतिपुरुषं तर्पयेत्। पित्रादीन्मात्रादीन्मातामहादीन्मातामह्यादीन् पितृव्यादींस्तत्पत्नीः ज्येष्ठभ्रात्रादीं
स्तत्पत्नीः मातुलांस्तत्पत्नीः गुर्वाचार्योपाध्यायान्सुहृत्संबंधिबांधवान्दयान्नदातॄन्पोषकरिक्थिनश्च त
त्पत्नीश्च तर्पयेत्। तिलाभावे स्वर्णरौप्यतांम्रयुतोदकैः खड्गमौक्तिकहस्तेन वा कार्यं पितृतर्पणं। न केवल
जलेनैव कर्तव्यं सति संभवे। नजीवत्पितृकः कुर्यात्तिलैः कृष्णैश्च तर्पणं। सप्तम्यां रविवारे च जन्मर्क्षादि
वसेषु च गृहे निषिद्धं सतिलं तर्पणं तद्विधिर्भवेत्। शोभनगृहे शोभनदिने न तिलतर्पणं। विवाहे चोप
नयने चौले सति यथाक्रमं। वर्षमर्धं तदर्द्धं च नेत्यके तिलतर्पणं। वृद्धौ सत्यां च तन्मासे नेत्यके तिलतर्प
णं। तिथितीर्थविशेषेषु कार्यं प्रेते च सर्वदा। पिंडान्सपिंडानोद्दद्यात्प्रेतपिंडं विना च तु। पितृयज्ञे नृयज्ञे
वगयायां तद्दद्याद्रवते। गयासाम्यं मृताद्दस्य के विदाहुः पुराणगाः। वसुरुद्रादित्यरूपान्श्राद्धार्थे तर्प
येत्पितॄन्। नामगोत्रसमुच्चार्य तिलैस्तीर्थेषु संयतः। दीपोत्सवचतुर्दश्यां कार्यं तु यमतर्पणं। कृष्णांगा
रचतुर्दश्यामपि कार्यं सदैव वा। यमाय धर्मराजाय मृत्यवे चांतकाय च। वैवस्वताय कालाय सर्वभूतक्ष

याम्य च। औदुंबराय दध्नाय नीलाय परमेष्ठिने। वृकोदराय चित्राय चित्रगुप्ताय वै नम इति। चतुर्दशैते मंत्राः
स्युः प्रत्येकं च नमोन्विताः। एकैकेन तिलैर्मिश्रान्दद्यात्त्रीनुदकांजलीन्। यज्ञोपवीतिना कार्यं प्राचीनावी
तिना तथा। देवत्वं च पितृत्वं च यमस्यास्ति द्विरूपता। ततः स्नानवस्त्रं निष्पीडयेत्। न त्रिगुणीकृतं नजले
निष्पीडयेत्। न दक्षिणाग्रं प्रसारयेत्। स्नात्वार्द्रवस्त्रो विण्मूत्रं कृत्वा पुनः स्नायात्। नोत्तरीयमधः कुर्या
न्नोपर्यधस्त्यमंबरं। न सर्वतः स्यक्त्कृष्णं वा परिदध्यात्कदाचन। कुतपं शाणं मजिनं योगपट्टो त्तरीय
कं। यज्ञोपवीतमन्यद्वा द्वितीयं तु सदैव हि। स्नात्वा नपीडयेत्केशान्नांगेभ्यस्तोयमुद्धरेत्। न वस्त्रं नि
र्धुनेच्छश्वत्केशान्न च धूनयेत्। स्नातो नांगानि मृज्यात्स्नानवस्त्रेण सर्वथा। नान्योन्यं पृष्ठतो मृ
ज्यान्नालिंपेत्स्पृष्टतो मिथः। स्नात्वा न धावयेद्दंतान्न मृज्यात्त्वाससा मुखं। न रात्रौ मृत्तिकास्नानं नैव
सोमार्कवारयोः। संध्ययोर्नैव गोमूत्रं न शुद्धे क्षौमयं निशि। दिवांबु गोशकृन्मूत्रैः शुद्धिर्निश्यंबु भस्म
ना। पंचपिंडान्समुद्धृत्य स्नायात्तु परवारिषु। स्नानार्थं दशतत्पुण्यं हते स्नानार्थं न महानिशि। महानिशा
द्वे घटिके रात्रौ मध्यमयामयोः। न महानिशि नित्यार्थकाम्यं नैमित्तिकं भवेत्। न स्नायात्पूर्वमस्नातो १७
निश्चुष्णेन जलेन च। अस्पृश्यस्पर्शने स्नानं निश्चुष्णेन जलेन च। नांबु हन्यान्न निंदेच्च तीर्थे तीर्था

तरं स्मरेत्। न स्नायादुत्सवे तीते मांगल्यं विनिवर्त्य च। अनुव्रज्य सुहृद्बंधून्वर्जयित्वेष्टदेवताः॥ मृते जन्म
र्क्षदिवसे प्रतिपन्नवमीषु च। श्राद्धकर्ता चान्यदिने संक्रांतिग्रहणेषु च। पाते र्कवारे सप्तम्यां चतुर्दश्यष्टमीषु
च। एकादश्यां पौर्णमास्यां षष्ठ्यां दर्शे विशेषतः। तैलाभ्यंगं स्त्रियं मांसं दंतकाष्ठं च वर्जयेत्। उष्णोदकेन
न स्नायादन्यदावाप्य कारणात्। क्रियास्नानं च काम्यं च पारक्यो ष्णोदकं न वर्जयेत्। नद्यां नास्तमिते स्नायाद्
विशेषान्मध्ययामयोः। अग्निं प्रज्वाल्य च स्नायाद्वाप्यादिषु महाजले। राहुदर्शनसंक्रांतिविवाहोत्सव
वृद्धिषु। स्नानदानादिकं कार्यं निशि काम्यव्रतेषु च। नद्यां स्नात्वा नदीं चान्यां न प्रशंसेद्बुधर्मवित्। अस्पृ
श्यस्पर्शने स्नाने नाघमर्षणतर्पणे। उभावप्यशुची स्नातां दंपती मैथुनं गतौ। शयनादुत्थिता नारी शु
चिस्याद्शुचिः पुमान्। ऋतौ तु मैथुने स्नायाद्दर्भे धारणशंकया। अनृतौ तदभावाच्च शौचं मूत्रपु
रीषवत्। रोगिणां यद्रजःस्त्रीणां न तदाशुचयः स्मृताः। चंडालादिस्पर्शनादौ विस्तारो वक्ष्यते पृथक्।
शावानुगमने स्नानं घृतप्राशो विकल्पितः। यत्र पुंसः सचैलं स्यात्स्नानं तत्र सुवासिनी। कुर्वीतैव
शिरःस्नानं शिरोरोगी जटी तथा। अशक्तौ शौचमग्रदेशो स्नानादौ च सर्वथा। न शीतल जलस्नानं
कार्यं चैवोष्णवारिणा। उद्धृतजलस्नाने मार्जनं कार्यं। अघमर्षणजपोस्ति वा न वा। जलतर्पणं च कार्यं

स्मृ॰स॰सा॰ नवा। स्थलतर्पणं तु पात्रस्थजले क्षतादीन्क्षिप्त्वा पात्रांतरे कार्यं सौदके गर्ते वा सबर्हिषि भूस्थले वा। नाबर्हिषि ना
१८ शौचे स्थले कार्यं॥ अथ तैलाभ्यंगविधिः तैलाभ्यंगे निषेधास्तु सर्वाश्च तिथयः सदा। द्वितीयां वर्जयि
त्वैव दृष्टादृष्टद्विदोषतः। सार्षपं गंधतैलं च यत्तैलं पुष्पवासितं। अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन। तैलाभ्यं
गनिषेधेषु तिलतैलं निषिध्यते। अभ्यंगस्य निषेधस्तु सार्षपादेरपीष्यते। स्नेहेनाभ्यंगो भवति स स्नेहः सा
र्षपादिकः। न भोजनार्थो तैलस्य निषेधोऽभ्यंग एव सः। तैलशब्दस्तिलस्नेहे स्वरूढेन नैव यौगिकः। अतस्तिल
विकारोऽपि पिण्याकतिलमोदके॥ मधूलीकसरादौ च निषेधो नैव जायते। सार्षपादौ तैलशब्दस्तु कार्यसदृश
त्वतः। संतापः कांतिरल्पायुर्धनं निर्धनता भवेत्। अनारोग्यं सर्वकामावारेष्वभ्यंगकारिणः। असौभा
ग्यं च नैर्धन्त्यं वारयोर्गुरुशुक्रयोः। निषिद्धदिवसे वारे रात्रौ च व्याधितस्य च। द्रव्यांतरयुतं तैलं न दुष्यति क
दाचन। शिरःस्थेन तु तैलेन गात्रं किंचिदुपस्पृशेत्। सर्वदा सर्वकामार्थं स्नायाद्देवकर्थं च न। विनाम्लिकया
वापि सक्रुद्धृष्टेन वारिणा॥ इत्यभ्यंगस्नानविधिः ॥ अथ संध्याविधिरुच्यते। संध्याहीनोऽशुचिर्नित्य १८
मनर्हः सर्वकर्मसु। यत्किंचित्क्रियते कर्म न तस्य फलमश्नुते। तत्र पादौ हस्तौ प्रक्षाल्य द्विराचम्य दर्भपाणिरा
पोहिष्ठाद्यैरष्टैर्वतैर्मंत्रैर्दर्भैः शिरसि मार्जनं कृत्वात्मानं परिषिच्य सूर्यश्चेत्यपः पीत्वा द्विराचमेत्। सायंका

ले त्वग्निश्चेत्यपः पीत्वा द्विराचम्य पुनश्चाष्टैर्वतैर्मार्जनं कृत्वात्मानं परिषिच्य गायत्र्याभिमंत्रिततोयांजलिना
सूर्यार्घ्यं त्रिरुत्क्षिपेत्। अंगुष्ठदेशे धारांबुमार्जनं परिवर्जयेत्। पात्रस्थेनांबुना कुर्याद्वामहस्तस्थितेन वा।
ततः प्राणायामत्रयं कृत्वा सूर्यदर्शनात्तिष्ठन्। प्राङ्मुखो गायत्रीं जपेत्। आनक्षत्रदर्शनादासीनः सा
यं प्रत्यङ्मुखो जपेत्। ब्रह्मचारी गृहस्थश्च शतमष्टोत्तरं जपेत्। वानप्रस्थो यतिश्चैव सहस्रादधिकं ज
पेत्। यद्वा पतन्तु जपेद्देवीमष्टाविंशतिरष्टवा। सदर्भपाणिरा होमाद्दर्भस्थस्तु कसंख्यया। हस्तेनावर्तयेद्दे
वीमक्षसूत्रैरथापि वा। सौवर्णराजतैस्ताम्रैः स्फाटिकै रत्नजैस्तथा। अरिष्टैः पुत्रजीवैश्च रिंद्राक्षैः शंख
संभवैः। रुद्राक्षैरपि पद्माक्षैः कुशग्रंथिभिरेव वा। मणिभिस्त्वक्षसूत्रं स्यादष्टशतसंख्यया। चतुःपंचा
शता वापि सप्तविंशतिभिस्तु वा। उच्चैर्जपादुपांशुः स्याच्छ्रेयो वै मानसस्ततः। स उपांशुर्जपोऽश्रव्य
लं जिह्वाक्षरदच्छदः। मानसस्तु चकड्जिह्वादशनच्छदैरितः। नाधोरत्निर्नान्यमना न च व्यस्तस्तपरः।
जपेन्न प्रौढपादश्च नावेष्टयोलसो शुचिः। न च क्रामन्न जल्पंश्च न पार्श्वमवलोकयन्। नासंख्यातमद
र्भेश्च नाशिखाकच्छबंधनः। मनःसंहरणं शौचं मौनं मंत्रार्थचिंतनं। अव्यग्रत्वमनिर्वेदो जपसंपत्तिहे
तवः। जपांते प्रातः सौरैर्मंत्रैः सूर्यमुपतिष्ठेत्। सायं वारुणैर्यद्वोभयत्रापि जातवेदसे न चेत्ले वैरोदेवीपति

स्मृत्य· सा· ष्ठेत्। दिग्भ्योदेवताभ्योवानमस्कृत्य। तिष्ठेत्। संध्यायैसावित्र्यैगायत्र्यैसरस्वत्यैसर्वाभ्योदेवताभ्योनमस्कु
१९ र्यात्। इत्यादिर्यथाचारंकुर्यात्। पुनःसूर्यंनमस्कृत्यनामगोत्रेणवाग्यतः। गुरुत्तमगन्यंबुनलप्तुहो
मंकुर्याद्यथाविधि॥ अथहोमविधिः होमेमुख्योयजमानःपत्नीपुत्रश्चकन्यका। ऋत्विक्शिष्योगु
रुर्भ्राताभागिनेयःसुतापतिः। एतैरेवहुतंयत्तुतद्धुतंस्वयमेवहि। पर्वहनवर्जंपत्नीजुहुयात्। कुमारीवा।
असमर्थेतुदंपत्योर्होतव्यंनर्त्विगादिना। द्वयोरप्यसमक्षंचेद्धुतंचेद्धुतमनर्थकं। सन्निधौयजमानस्या
प्युद्देशत्यागकारकः। असन्निधानेपत्नीस्यादध्वर्युस्तदनुज्ञया। उन्मादप्रसवेवार्त्तौप्रकुर्वीताज्ञयावि
ना। नाप्रवासीप्रवासेस्यात्पत्नीधारयतेव्रतं। सर्वदायजमानोवायजेतदिङ्मुखःशुचिः। प्रातर्होमे
संगवांतःकालस्त्वनुदितेतथा। सायमस्तमितेहोमकालस्तुनवनाडिकाः। बहुरूपकेधनेवाग्नौसु
समिद्धेविधूमके। सांगारेलेलिहानेचहोतव्यंनान्यथाक्वचित्। अग्निःप्रदक्षिणावर्त्तःकर्मर्द्धिश्चशु
भावहः। अग्निंपरिसमूह्यपरिस्तीर्यपर्युक्ष्याक्षतगंधपुष्पैरलंकृत्यसमिधंक्षिप्त्वाप्रदीप्तासमि
धंदृष्ट्वाक्रममतिक्रम्यदेवायतनसंपूर्णोहोमोदवर्तीर्थेनकारयेत्। सोम्येनवाहुत्वापुनःसमिधंक्षि १९
प्त्वोपस्थायपरिसमूह्यपर्युक्ष्यहुतशेषंब्राह्मणायदत्वानमेत्। पयोदधियवागूश्चसर्पिरोदन

तंडुलाः। सोमोमांसंतैलमापोदशैतान्यग्निहोत्रके। स्यादग्निहोत्रवद्धोमेसंस्कारोमंत्रवर्जितः। यद्वात्रिःप्रो
क्षणंतेषांमांसमोपासनेनहि। शालिश्यामाकनीवाराव्रीहिगोधूमयावकाः। एतेषांतंडुलाहोम्यायाचना
लाःप्रियंगवः। नीवाराःशालयश्चैवगोधूमव्रीहयोयवाः। स्वरूपेणापिहोम्याःस्युःस्वरूपेणैववैदलिकाः। द
र्वेस्कंवपाहोतव्यंपाणिनाकठिनंहविः। व्रीहीणांवाययवानांवाशतमाहुतिरिष्यते। तदन्नंद्विगुणंग्रासोम
सूरांगुलकृतिस्तथा। कुक्कुटांडकमानंतुपिंडइत्यभिधीयते। अंगुष्ठपर्वमात्रंस्यात्स्रवदानंततोपिवा। ज्यायः
स्विष्टकृदाज्येनकृतमंगुलसंमितं। ग्राससमात्रंसवेद्भिक्षा। अग्रंग्रासचतुष्टयं। अग्रंचतुर्गुणीकृत्यहंत
कारःसउच्यते। भिक्षापुष्कलमग्रंवापूर्वंपूर्वाच्चतुर्गुणं। भोजनंतद्द्विगुणंशरावःपात्रमेववा। यच्च
प्रस्थंधान्यंचतुःषष्टिराहुतेःपरिकीर्तितं। तिलानांचतदर्धंस्यात्तदर्धंस्याद्घृतस्यच। पालाशखा
दिरश्वत्थशम्युदुंबरजासमित्। अपामार्गार्कदूर्वाश्चकुशाश्चेत्यपरेविदुः। सत्वचःसमिधःकार्या
ऋज्व्यःश्लक्ष्णाःसमास्तथा। शस्तादशांगुलास्तास्तुद्वादशांगुलकास्तुवा। आर्द्राःपक्वाःसमच्छे
दास्तर्जन्यंगुलिवर्तुलाः। अपाटिताअद्विशाखाःकृमिदोषविवर्जिताः। दग्धाःकृशाःस्तथास्थूलाह्रस्वा
दीर्घाश्चवर्जयेत्। यद्वा। समित्पवित्रंवेदाश्चचयःप्रादेशसंमिताः। इध्मस्त्वद्विगुणःकार्योत्रिगुणोवाप्य

रिधिः स्मृतः। स्मार्ते प्रादेशाद्ध्मो वह्निगुणाः परिधिः स्मृतः॥ इति होमविधिः ॥ अथ दर्भविधिः। कुशाः
काशा यवा दूर्वा उशीराश्च सकुंदराः। गोधूमा व्रीहयो मुंजा दश दर्भाः सबल्वजाः। नभोमासस्य दर्शे तु शु
चिर्दर्भान्समाहरेत्। अयातयामास्ते दर्भा नियोज्याः स्युः पुनः पुनः। विरिंचिना सहोत्पन्न परमेष्ठि निस
र्गज। नुद सर्वाणि पापानि दर्भ स्वस्तिकरो भव। कुशोत्पाटनमंत्रः। एतं मंत्रं समुच्चार्य ततः पूर्वोत्तरामु
खः। हुंफट्कारेण मंत्रेण सकृच्छित्वा पुनर्हरेत्। अच्छिन्नाग्रा अशुष्काग्राः पित्र्ये तु हरिताः शुभाः स
मूलाः देवकार्येषु नियोज्यास्ते जपादिषु। सप्तपत्राः कुशाः शस्ता दैवे पित्र्ये च कर्मणि। अनंतर्गर्भिणं
साग्रो प्रादेशो तु पवित्रकं। चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्य पवित्रकं। एकैकं न्यूनमुद्दिष्टं वर्णे वर्णे यथा
क्रमं। सर्वेषां वा भवेद्द्वाभ्यां पवित्रं ग्रंथितं नवा। त्रिभिस्तु शांतिके कार्ये पौष्टिके पंचभिस्तथा। चतुर्भि
श्चाभिचारे स्यान्निष्ठुरे दशभिः केवलं। सपवित्रः सदर्भो वा कर्माचमनं चरेत्। नोच्छिष्टं तत्स दर्भं स्यात्
भुक्त्वोच्छिष्टं तु वर्जयेत्। यैः कृतः पिंडनिर्वापः श्राद्धं वा पितृतर्पणं। विण्मूत्रादिषु ये दर्भास्तेषां त्या
गो विधीयते। नीवीमध्ये स्थिता यस्य ब्रह्मयज्ञे स्थितास्तथा। वामहस्त स्थितैर्दर्भैर्न पिबेद्दक्षिणे २॰
न तु। वस्त्रादिना पर्युपेण न दोषः पिबतो भवेत्। न ब्रह्मग्रंथिना चामेन्न दूर्वाभिः कदाचन। स्नाने दा

ने जपे होमे स्वाध्याये पितृतर्पणे। सपवित्रौ सदर्भौ वा करौ कुर्वीत नान्यथा। कुशाभावे तु काशाः स्युः काशाः कुशस
माः स्मृताः। काशाभावे गृहीतव्या अन्ये दर्भा यथोचितं। आर्द्रं लुनीयाद्द्राचो तु लुनीयाद्वापि संध्ययोः। न दर्भा
वेस्वणे रोप्य तान्धेरत्ने क्रियां चरेत्॥ इति दर्भविधिः ॥ बर्हिः कुशमयं ग्राह्यं न लभ्यंते कुशा यदि। शर
सैर्या स्मृते याश्च वालमौंजार्जुने क्षवः। सुगंधितेजनादाश दूर्वाः क्षीरद्रुमा अपि। यद्वा सर्वत्र एष्वेपि ग्राह्यं
बर्हिर्यथेप्सितं। शुष्कं काष्ठं कुश्मूलं दुर्गंधितं च वर्जितं। सूकलानेरकाश्चापि वर्जयंत्यपरे बुधाः। कुशा
भावे परे प्राहुः पर्वपल्लवदोषधीः। बंधूकसूकरघष्टपरिव्याधकवर्जिताः। मुख्यान्दर्भान्विशेषेण केवि
त्काशान्कुशान्शरान्। बल्वजान्पुंडरीकाणि यवव्रीहितृणान्यपि॥ इति बर्हिर्विधिः ॥ पालाशः
खादिरो वेध्मो मुख्यः स्यात्तदलाभतः। शमीवटोदुंबरजः साश्वत्थस्तदलाभतः। वनस्पतीनां सर्वेषामि
ध्मः कार्यो विशेषतः। तत्रैतान्वर्जयेद्विद्वान्कोविदारबिभीतकौ। कपित्थामलकं राजवृक्षं शाकद्रु
मं तथा। नीपं निंबं करंजं च तिलकं शाल्मलीमपि। श्लेष्मातकमपि त्यक्त्वा ग्राह्यो ऽन्यः सकलो
द्रुमः॥ अथ स्रुवादि ॥ वैकंकती वा पालाशी वाग्निहोत्रे स्रुवण्यथ। जुहूः पालाशी उपभृदाश्व
त्थी वैकंकती ध्रुवा। यद्वा सर्व स्रुचः कार्या एतेषामप्यलाभतः। शमीमय्यः स्रुचः कार्याः सर्वा वा

स्मृत्य॰सा॰ प्रजेद्वृक्षजाः। तदलाभे यथालाभमन्ययाज्ञिकवृक्षजाः। खादिरस्य स्रुवः स्यात्तु शम्याप्राशित्रमेक्षणं।
२१ खादिरो मुसलः कार्यः पालाशः स्यादुलूखलः। यद्वा सर्वो वारुणो कार्यो तदलाभेन्यवृक्षजो। पालाशाद्या
वटाद्यान्यवृक्षा द्वादशसमाः स्मृताः। अश्वत्थं वारुणं वीचि दिडामात्रमिहान्यजं। मुख्याभावे तु सदृशं
द्रव्यं प्रतिनिधीयते। यावद्याधत्तु सदृशं तत्तदेव हि गृह्यते। काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके हि
सः। काम्येप्युपक्रमादूर्ध्वमन्ये प्रतिनिधिं विदुः। न स्यात्प्रतिनिधिर्मंत्रः स्वामिदेवाग्निकर्मसु। स्वदे
शकालयोर्नास्ति नारण्याग्निरेवसः समारूढं वसमिधमरणिं ब्रुवते बुधाः। नाभावस्य प्रतिनि
धिरभावांतरमिष्यते। नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित्। श्रोत्रियाणामभोज्यं यद्द्रव्यं दित
दृशा षतः। ग्राह्यं प्रतिनिधित्वेन होमकार्येन कुत्रचित्। द्रव्यं वैकल्पिकं किंचिद्यत्र संकल्पितं भवे
त्। तदभावे तु सदृशं न तु वैकल्पितं तथा। मुख्यद्रव्यापचारे तु प्रतिनिध्यभिसंधिना। प्रयुंजानस्य
मुख्यार्थलाभे ग्राह्यः स एव हि। उपात्ते तु प्रतिनिधौ मुख्यार्थं लभ्यते यदि। तत्र मुख्यमनादृत्य
गौणेनैव समापयेत्। उपात्ते यस्मिन्कस्मिंश्चामुख्यप्रचरिते सति। अन्यद्रव्यसजातीयं सजातीय २१
मथापि वा। उपादाय प्रयुंजानो यदि पूर्वमवाप्नुयात्। उपात्तत्वाविशेषेपि पूर्वं हित्वा परं श्रयेत्। मु

ख्याभावे परं गौणमुपात्तं सद्विनश्यति। तत्र मुख्योपमं गौणं ग्राह्यं गौणोपमं न तु। संस्काराणामयोग्योपि
मुख्य एव हि गृह्यते। न तु संस्कारयोग्योपि न्योगृह्यते प्रतिरूपकः। मुख्ये कार्यासमर्थे तु लब्धे प्येतस्य नादरः
प्रतिरूपमुपादाय शालं तेन प्रयुज्यते। द्रव्यत्वमात्रपर्याप्तं मुख्यद्रव्यस्य संभवे। पुरोडाशमहत्त्वार्थं न निर्वाप्य
स्य हः। कृष्णव्रीह्यादिके द्रव्ये शिष्टे प्रचरिते सति। ग्राह्यो कृष्णोपि संव्रीहिर्नीव्रीहिः कृष्णगुण्यपि का
यैरूपैस्तथा वर्णैः क्षीरैः पुष्पैः फलैरपि। गंधै रसैः सदृग्ग्राह्यं पूर्वाभावे परं परं। व्रीहिर्यवो वा श्यामा
कोनीवारो वा हविर्भवेत्। वेणार्यवास्तद्वसंवा कंदं मूलं फलं जलं। सत्सं वा हविरेतेषु यथासंभवमाच
रेत्। प्रतिनिध्येतत्तत्स्वविज्ञेयं हविरित्यपि। प्रधानदेवतोद्देशात्संसर्गेतस्यमात्मनः। ततोन्य
दपि वा ग्राह्यं सदृशं धान्यमात्रकं। न ग्राह्यं सर्वथा माषं वरकोद्रारकोद्रवं। यद्वा व्रीहियवाभावे तुषतंडु
लयोगिनीः ओषधीः प्रतिगृह्णीयादणुको द्रववर्जिताः। ग्राम्याणां वा भवे ह्याम्यमारण्यानामरण्य
जं। यवाभावे तु गोधूमास्ततो वेणुयवादयः। छंदोगगृह्ये वनीवारुकुयाद्भविरित्युचे। फलं यज्ञि
यवृक्षस्य तत्पत्रमथवा जलं। यद्यग्निहोत्रहोमार्थं पयो न स्यात्कादृशं। तद्व्रीहियवौ ग्राम्यमोषध्यं
तरमेव च। आरण्योषधयो वृक्षफलान्यापद्दति क्रमात्। होमं कर्तुमुपादेयं पूर्वाभावे परं परं। तेषाम

जाते

भावे तु कुर्याद्द्रव्यासत्त्वमात्मनः। द्रव्यार्थं गोघृतं ग्राह्यं तदभावे तु माहिषं। आजं वा तदभावे तु साक्षात्तैलं
तु गृह्यते। तैलाभावे गृहीतव्यं तैलं जर्तिलसंभवं। तदभावे तसीस्नेहः कौसुंभः सर्षपोद्भवः। वृक्षस्नेहोथ
वा ग्राह्यः पूर्वाभावे परः परः। तदभावे व्रीहियवश्यामाकान्यतरोद्भवं। पिष्टमालोड्य तोयेन घृतार्थे
योजयेत्सुधीः। वृक्षतैले तु पुन्नागनिंबैरंडोद्भवं सृजेत्। यद्वा गव्यघृते छागमहिष्यादेर्घृतं क्रमात्॥
तदभावे गवादीनां क्रमात्क्षीरं विधीयते। तदभावे दधि ग्राह्यमलाभे तैलमिष्यते। यत्राज्यमंजनाद्य
र्थं न लभ्येत कथंचन। तत्र क्षीराद्यनादृत्य साक्षात्तैलं गृहीष्यते। यत्र मुख्यं दधिक्षीरं तत्रापि तद
लाभतः। अजादेः क्षीरदध्यादि तदलाभे तु गोघृतं। मुख्यासन्नोथवा ग्राह्यः कार्यकारणसंततौ। अ
त एव घृताभावे पूर्वं दधि ततः पयः। येषां केषांचिदन्येषां हविषामप्यसंभवे। सर्वत्राज्यमुपादेयं भरद्वा
जमुनेर्मतात्। मुख्यकाले यदावश्यं कर्म कर्तुं न शक्यते। गौणकालेपि कर्तव्यं गौणोप्यत्रेदृशो भवे
त्। सायमाहुतिराप्रातः प्रातरासायमाहुतिः। कर्तव्या नातिपद्येत पार्वणं पार्वणांतरं। श्यामाके २२
व्रीहिभिश्चापि यवैरन्योन्यकालतः। प्राप्येष्टं युज्यते वर्ष्यं न त्वात्राग्रयणीत्यपः। एवमागामि
कार्यस्य मुख्यकालादधस्ततः। स्वकालादुत्तरो गौणः कालः पूर्वस्य कर्मणः। सर्वत्र गौणकालेषु क

र्मवादितमो वरेत्। प्रायश्चित्तं व्याहृतिभिर्हुत्वा कर्म समारभेत्। मुख्यकाले हि मुख्यं चेत्साधनं नैव लभ्य
ते। मुख्यकाल उपाश्रेयो गौणोप्यन्यस्तु साधनं। न मुख्यद्रव्यलोभेन प्रगौणकालप्रतीक्षणं। एकपक्ष
गतो यावद्धोमः सद्यो निगद्यते। पक्षहोमविधानात्तान्हुत्वा तंतुमतीं यजेत्। स्वकालोत्कर्षतः केचिन्मु
ख्यकालो निरूपितः। अपकर्षात्स्याद्यन्योपि गौणः कालो निरूप्यते। अथवा व्याधिमानापद्गतो वा
ध्वगतोपि वा। राष्ट्रभंगेथवा भावे गुरुगेहवसन्नपि। अन्येष्वेवं प्रकारेषु निमित्ते घटितेषु तु। समास
मग्निहोत्राणां यथासंभवमाचरेत्। निमित्तानामिहैतेषां निर्दिश्यैकाद्युच्यते। नित्यसर्वेषु निमित्ते
षु ज्ञानीयात्प्रतिपादितं॥ पक्षमौ होन शेषान्वा शेषहोमानथापि वा। समस्य जुहुयात्तत्र प्रयोगो
यं निरूप्यते। प्रतिपद्युन्नयेत्सायमापद्यन्यत्र वा दिने। यावत्सोपवसथ्याहात्प्राग्दिनानि भवंति
हि। तावती प्रतिगृह्णीयाच्चतुरुन्नयनानि तु। पात्रांतरस्य हापायी निसायांप्रकृतो स्रुवं। स्थूलं
स्रुगंतरं वापि कृत्वा तत्र समुन्नयेत्। एकासमित्सकृद्धोमः सकृदेव निमार्जनं। उपस्थानं सकृत्
कार्यं शेषा प्रकृतिरिष्यते। एवमेवोत्तरत्रापि प्रातर्होमान्समस्य तु। जुहोत्सोपवसथ्याहात्प्रातर्हो
मावधीन्सकृत्। समारोपविधानेन समारोपयतेन कान्। एवं प्रतिपदोन्यत्र यत्रापदुपजायते।

तथैवोपवसथ्याहात्प्राग्यत्रापन्नं नश्यति। आपदि वा वर्धी होमे समासस्याप्युपेयते। तस्मात्कदाचिद्
रस्य यावंतस्तावतोपि वा। आपत्कालसमान्होमान्समस्येदेकपक्षगान्। एवमेवात्र पक्षे ये होमास्ते
षामशेषतः। न्यूनानां वा समासः स्यान्न पक्षांतरवर्तिनां। सर्वथोपवसथ्याहे सायंहोमः पृथग्भवेत्। त
थैव यजनीयाहे प्रातर्होमो भवेत्पृथक्। पूर्वोपवासन्यूनं वै प्रातरेकेनापि हेतुना। तदा तु सायंहोमोपि
पूर्वैः सह समस्यते। तावत्तानापगच्छेच्चेदापत्पक्षांतरेपि वा। ततस्तत्रापि कर्तव्यः समासः पृथगेव हि। न
तु पक्षांतरस्थानां समासश्चोद्यते मिथः। एवमापद्गतः पक्षे पक्षे चैवं समाचरेत्। तृतीयेऽनंतरे पक्षे
समासं न समाचरेत्। आपच्चेदनुवर्तेत दीर्घकालं कथंचन। यावज्जीवमविच्छिन्नं पक्षहोमं समा
चरेत्। आपदेवावधिस्तत्र न पक्षगमनावधिः। अथापरः समासस्य प्रकारः प्रतिपाद्यते। सायंप्रात
स्तनौ होमावुभौ सायं समस्यतु। आपत्तौ जुहुयादत्र समिदेकाथवा द्वयं। सायंहोमस्य मुख्यत्वात्त
दीयं तंत्रमिष्यते। चतस्र आहुतीः कुर्यात्तत्र द्वे सायमाहुती। द्वे प्रातराहुती सायं होमे चैका समिद्य
दि। समित्कृता द्वितीया चेत्सा भवेत्सा भवेत्प्रातराहुतौ। अद्भिः सायंहोमवन्मद्भ्याद्भिः प्रातर्होमव २३
त्स्मर्त्तं। उपस्थानं सकृत्कार्यं शेषं प्रकृतिवद्भवेत्। केचिद्द्वे आहुती हुत्वा संवेश्यैव निमील्य वा। वि

च्छेद्येतावता होमौ कुर्याद्द्वे आहुती ततः। पूर्वापदि समस्यांते प्रातः सर्वं कदाचन। दीर्घकालापदं मत्वा पक्ष
होमे कृते सति। तत्रांतराले यद्यापत्कदाचिदपगच्छति। का कथा कथं वा होमः कर्तव्यो विधिनाथवा। या
वंतोत्र समासास्ते सर्वे सायमुपक्रमाः। प्रातःकालापवर्गाश्च न तु प्रातरुपक्रमाः। प्रातर्होमादिकाय
द्या प्रातश्चेदापदागता। तथा पूर्वापराह्णादौ निमित्ते च समस्यति। पूर्वपक्षे तु रात्रौ चेन्मृतिशंकाग्नि
होत्रिणः। हुत्वावशिष्टाः पक्षेस्मिञ्जुहुयात्सकलाहुतीः। दर्शेष्टिं च तदा कुर्यात्क्षिष्टिर्यदि न संभवेत्।
देवतानां प्रधानानामेकैकस्य पृथक् पृथक्। पुरोनुवाक्यायाज्यान्यां चतुरो ताश्च ताहुतीः जुहु
याच्च मन्यत्र सदापदि तु दृश्यते। अथेष्टयनमध्ये स्यात्पत्युर्मरणाशंकनं। अवशिष्टेष्टदेवे
भ्यस्तत्संख्या निघ्नतानि च। चतुर्गृहीतान्येकत्र गृहीत्वा समसेः सह। पुरोनुवाक्यायाज्यापंक्तिः
पूर्ववज्जुहुयात्तथा। चातुर्मास्यांतराले चेत्स्वामिनो मृत्युशंकनं। तत्रांत्यपर्वपर्यंतमग्निहोत्रा
द्यशेषतः। तथैव कुरुते दर्शपूर्णमासान्बहूनपि। चातुर्मास्यावशिष्टानि पर्वाण्यत्र समापये
त्। पश्चात्कालक्षपुरोडाशान्निर्वपेत्पशुदेवतं। आमिक्षामथवा कुर्यात्सर्वाहुतिमथापि वा। आहि
ताग्निः कदाचित्तु रुक्षपक्षेम्रतो यदि। तदा शेषाहुतीः सर्वा जुहोतीत्याश्वलायनः। अन्यत्तद्वै

स्मृत्य॰ सा॰ दर्शेष्टिं कुर्युः काले मृतस्य तु। शुक्लपक्षे निशि प्रेतस्य छंतिप्रातराहुती॥ यस्याहिताग्नेर्धर्मः स्यात्सश्रौ
२४ पासनिकस्य तु। इति शाट्यायनिकमावष्टैश्राह्मणमत्र तु। संध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत्
न त्यजेत्सूतके वापि त्यजन्गच्छेदधो द्विजः। कुर्यात्पंचमहायज्ञान्नित्यशः सूतकं विना। नित्यं नैमित्तिकं
चात्मकर्मापि न हापयेत्। स्वकर्महानौ पतनमदृष्टं वै नैव तु नापदि। स्वकर्महानौ नास्ति क्रियान्मासेन
पतनं स्मृतं। द्वादशाब्दव्रतेनैव तस्य शुद्धिस्तु नान्यथा। तं निष्कारी कमीक्षेत तस्पर्शे स्नायात्स
चेलकं। तेन संभाषणं हास्यं कुर्वन्न द्वै न तत्समः। तदन्नभुक्तौ सद्यस्तु सहशय्यासनेषु च॥ इ
तिहोमविधिः॥ अथ देवतार्चनविधिरुच्यते। ब्रह्माणं विष्णुमीशानं सूर्यमग्निं गणाधिपं।
दुर्गां सरस्वतीं लक्ष्मीं गौरीं वा नित्यमर्चयेत्। अप्स्वग्नौ हृदये सूर्ये स्थंडिले प्रतिमासु च। शालि
ग्रामे च चक्रांके वटमुद्रासु देवताः। नित्यं संति हिरण्ये च रत्ने गो ब्राह्मणेषु च। पौरुषेण तु सूक्तेन गा
यत्र्या प्रणवेन वा। तल्लिंगैर्वा स्ववामं त्रैरर्चयेद्गुरुवनुज्ञया। देवतानाममिर्याश्च चतुर्थ्यंतैर्नमोन्वि
तैः। आवाहनासनं पाद्यमर्घ्यमाचमनीयकं। स्नानमाचमनं वस्त्रमाचामं चोपवीतकं। आचामं गंध २४
पुष्पं च धूपं दीपं प्रकल्पयेत्। नैवेद्यं पुनराचामं नत्वा स्तुत्वा विसर्जयेत्। स्त्रीशूद्राणां चमवतिना

न्त्रा वै देवतार्चनं। सर्वे वागमंमार्गेण कुर्युर्वेदानुसारिणा। गुरूक्तेन प्रकारेण वेदबाह्येन नाचरेत्। यां यां
कांचिद्देवतां कश्चिद्दाराधयितुमिच्छति। स सर्वोपाय यत्नेन ब्राह्मणान्नाश्च तोषयेत्। एवं देवार्चनं कृ
त्वा गुरुं संपूज्य प्रणतः। पुष्पं क्षिप्त्वा प्रणम्याथ नित्यदानं स्वशक्तितः। कृत्वा अद्य नमस्कृत्य क
र्त्तव्यं मंगलेक्षणं। विप्राग्न्यर्का गुरोर्हेमन्टपाज्यं मंगृळं क्षीरौ स्मृतं। अग्निर्विल्कपिलासत्रीयज्वा
मृष्टान्नदो बुधः। ज्ञानसिद्धस्तपःसिद्धः शतायुर्धार्मिकः शुचिः। एते पापहराश्चैतान्सदा पश्य
न्नमिदपि। रोचनं चंदनं हेम मृदंगं दर्पणं मणिं। घृतं वाग्निं गुरुं विप्रं प्रातः पश्येत्सदा बुधः। कु
ष्ठाली नद्दूर्वा च चंदनं च शखपुष्पिकां। सिद्धार्थकान्प्रियंगूंश्च प्रातः शिरसि धारयेत्। पा
पिष्ठं दुर्भगं चांत्यं नग्नमुत्कृत्तनासिकं। प्रातर्न पश्येद्दैतांश्च दृष्ट्वा पश्येद्दिवाकरं॥ इति
देवतार्चनं ॥ अथ माध्याह्निकं। स्नानं कृत्वा नित्यं माध्याह्निकं कार्यं। तत्र पादौ प्रक्षाल्य द्वि
राचम्य आपो हि ष्ठा द्येमो र्जे मं कृत्वा द्भिः परिरक्ष्यापः पुनंतु पृथिवीमिति द्रुमं पाणिं पीत्वा द्वि
राचम्य पुनश्चापो हि ष्ठाद्येमो र्जेनं कृत्वाद्भिः परिरक्ष्य गायत्र्या सकृत्सूर्यायार्घ्यं दत्त्वा प्रदक्षिणा
मावर्त्यापः स्पृष्ट्वा हंसः शुचिषदिति सूर्यमुपस्थाय उदुत्यं चित्रमिति साद्येश्चोपस्थाय नत्वा भूमिं

स्पृष्ट्वा प्राणायामत्रयं कृत्वा गायत्रीपूर्ववज्जपेत्। पुनः सूर्यं [illegible] नत्वा ब्रह्मयज्ञादिकं कुर्यात्॥ छ
ब्रह्मयज्ञो देवयज्ञो भूतयज्ञस्ततः परः। पितृयज्ञो नृयज्ञश्च पंचयज्ञाः प्रकीर्तिताः। स्वाध्यायो ब्रह्म
यज्ञः स्याद्देवयज्ञोऽग्निहोमकः। भूतयज्ञो बलिः प्रोक्तो हुतशेषान्नतस्ततः। स्वधापितृभ्य इत्यन्ना
दिदानतः। मनुष्ययज्ञोऽतिथ्यादेर्मनुष्योद्देशदानतः। अथ ब्रह्मयज्ञं कुर्यात्। पादौ प्रक्षाल्याद्भि
राचम्य प्रागग्रेषु दर्भेषु प्राङ्मुख आसीनो दर्भपाणिः पवित्रगर्भब्रह्मांजलिः प्रणवं व्याहृतीरु
क्त्वा सावित्रीं पच्छोर्द्धर्चशः कृत्स्नानवनं चोक्त्वा प्रणवमुक्त्वा ऋचं वा सूक्तमनुवाकं यजुर्वा साम वा
सावित्रीं वेतिहासपुराणं वा भद्रणामध्येन वा स्वरेणाधीत्य नमो ब्रह्मण इति त्रिरुक्त्वा उत्तरसंस्थां
प्रार्थ्यां तत्सदिति समापयेत्। ग्रामे मनसाधीयीत। ततः स्वशाखोक्तविधिना देवानृषीन्पितॄं
श्च तर्पयेत्। यद्वा ब्रह्मादयो ये देवा इत्यादि यथाचारं कुर्यात्। ततो वस्त्रं निष्पीड्याचम्य अ
ग्न्यागारं गत्वा वैश्वदेवं कुर्यात्। अथ देवयज्ञः। गृहस्थो वैश्वदेवाख्यं कर्म प्रारभ
ते दिवाऽन्नस्य चात्मनश्च संस्कारार्थमिहेष्यते। औपासनाग्निमन्यं वा समिध्याथ हविष्यु २५
क्तं। परिसमूह्य पर्युक्ष्याक्षतगंधपुष्पाण्यष्टदिक्षु वाग्नौ संक्षिप्यालंकृत्य हविष्यं पक्वं घृ

तप्लुतव्यंजनाक्तं यथास्वाचारं कृत्वा परिसमुह्य पर्युक्षेत्। अथ बलिहरणं देवयज्ञहुतशेषेण शुचिदेश
मभ्युक्ष्य तत्र कुर्यात्। अथ पितृयज्ञः। तत्र बलिहरणहुतशेषं सोदकं स्वधा पितृभ्य इति प्राचीनावीती द
द्यात्। ततस्तथैव बलिनिवेशनान्ते सोदकमन्नं भूमौ श्वचांडालपतितवायसेभ्यश्च निक्षिपेत्। एते देवयज्ञभू
तयज्ञपितृयज्ञमनुष्ययज्ञा वैश्वदेवाख्या उच्यते। अहविष्यं समस्तं वा वैश्वदेवे विवर्जयेत्। यद्वा। कोद्रवं वरकं
माषं मसूरं च कुलित्थकं। क्षारं च लवणं सर्वं वैश्वदेवे विवर्जयेत्। यद्वा। न क्षारलवणं विद्यते होमे तथाप
रं चापरान्नसंसृष्टस्य हविष्यस्य होमः। उदीचीनमुष्णं भस्मापोह्य तस्मिन्जुहुयात्। तद्धुतमहुतं वाग्नेरोष
वति। न स्त्रीं जुहुयात्। यद्वा। भस्मांगारेषु जुहुयाद्धविष्यकं। अथाचम्य मनुष्ययज्ञं कुर्यात्। तत्राति
थ्यादीनर्चयित्वा निवीती सनकादिभ्यो मनुष्येभ्यो हंतेति दद्यात्। यद्वायं हंतकारं वा हंतेति वा त्यजेत्। स
नकसनंदनसनातनकपिलासुरिवोढुपंचशिखेभ्यो हंत। एवं सनकादिभ्यो हंतकारः। सर्वथान्नं मनुष्ये
भ्यो देयं वापि जलं तथा। स्वाहाकारवषट्कारनमस्कारा दिवौकसां। स्वधाकारः पितॄणां तु हंतकारो नृणां
स्मृतः। पक्वान्नाभावे प्रवासे वा तंडुलानोषधीस्तु वा। पयो दधि घृतं वापि कंदमूलफलानि वा। योजयेद्व
यज्ञादौ जलं वाप्यसु वा जले। इन्द्रस्कंदे पादौ तत्त्वं पाणिना कठिनं हविः। स्नातको ब्रह्मचारी वा पृथक्पाकी
वैश्वदेवं कुर्यात्। स्त्रीबालेन कारयेत्। होमाप्रदाने रहितं भोक्तव्यं करादनं। अविभक्तेषु संसृष्टेषु

केनापिकृतंवयत्।देवयज्ञादिसर्वार्थेलौकिकाग्नौकृतंयदि। इक्षून्नपःफलंमूलंतांबूलंपयओषधं। भक्षयि
त्वापिकर्तव्याःस्नानहोमतपःक्रियाः। कुर्यादहरहःश्राद्धमन्नाद्येनोदकेनवा।पयोमूलफलैर्वापिश्राद्धान्य
न्यानिभक्तितः॥ इतिस्मृत्यर्थसारेआचारप्रकरणं अथश्राद्धविधिरुच्यते। तत्रतावच्छ्राद्धंद्विवि
धं। पार्वणमेकोद्दिष्टमिति। त्र्युद्देशपार्वणंएकोद्देशएकोद्दिष्टं। तच्चत्रिविधं। नित्यंनैमित्तिकंकाम्यंचेति
। तत्रनित्यमहरहरमावास्याष्टकादिषु। नैमित्तिकंपुत्रजन्मादिषु। काम्यंफलार्थिनांतिथिनक्षत्रादिषु
। पुनश्चपंचविधं। अहरहःश्राद्धंपार्वणश्राद्धंवृद्धिश्राद्धमेकोद्दिष्टंसपिंडीकरणंचेति। तत्रश्राद्धदेशाः
पुण्यःकेशास्थ्यादिरहितशोधितोदक्षिणाप्लवोगोमयेनोपलिप्तः। अथपार्वणश्राद्धकालाः अ
मावास्याष्टकावृद्धिःकृष्णपक्षोयनद्वयं।विषुवेसूर्यसंक्रामोव्यतीपातोगजच्छायाग्रहणंयुगादिमन्वा
दयश्च। तिथिविशेषविशिष्टेदेशेगयादौविशिष्टकालेमृताहादौद्रव्यब्राह्मणसंपत्सुच। आत्मरुचि
श्चेतिश्राद्धकालाः॥ अथश्राद्धविप्राः। अभिजात्यपूर्वश्रुताध्ययनसंपन्नोवेदार्थविद्ब्रह्मवित्। त्रि
सुपर्णस्त्रिनासिकेतज्येष्ठसामात्रिमधुः। ऋत्विग्याज्यादि। अथवादौहित्रोभागिनेयोजामातामातुलः
श्वशुरःशिष्यःसंबंधिबांधवाः। कर्मनिष्ठस्तपोनिष्ठःषडग्निःपंचाग्निश्चकुरग्निस्त्रेताग्निरेकाग्निर्वे २८
दाध्यायीब्रह्मचारीत्याद्याःप्रशस्ताः। त्रीणिश्राद्धेपवित्राणिदौहित्रःकुतपस्तिलाः। त्रीणिचात्रप्रशं

संतिशौचमक्रोधमत्वराः॥ अथनिषिद्धाः रोगीन्यूनांगोतिरिक्तांगः। काणोबधिरोनपुंसकोविद्धपुंस्त्वो
जारोजारापतिःखलोनिष्ठुरोनिजरूक्ष्मदंतःकुनखीदुश्चर्माकुरूपोविकीर्णःपौनर्भवःकुंडगोलकौ। नि
षिद्धान्नाशीमद्यप्रसंगाशीभृतकाध्यापकः। भृतकाध्यायीकन्यादूषिचाभिशस्तोमित्रध्रुक्पिशुनः
सामविक्रयीपरिवित्तिःपरिवेत्तातयोर्दातृयाजकौवृथामातृपितृसुतभार्यागुरुत्यागीपुनर्भूपतिः।
स्तेनःकितवोलिखेवकःकर्मदुष्टोविहितत्यागीनिषिद्धग्राहीत्याद्यावर्ज्याः। सर्वत्रप्रशस्तालाभेनिषि
द्धोधनरहितोग्राह्यः। नित्यश्राद्धेवैश्वदेवंगृहबलिश्चपूर्वमेव। दर्शश्राद्धेवैश्वदेवंपूर्वंपश्चाद्वा। वृ
द्धावादौक्षयाहेतेदर्शेमध्यमहालययोरावांतेषुचकर्तव्यंवैश्वदेवंचतुर्विधे। गृहबलिश्चपश्चाद्देव।
अन्यश्राद्धेषुपश्चाद्देवसर्वंकार्यं। अथामावास्यापाःपार्वणश्राद्धमुच्यते। तत्रपितॄणांचमातामह
नांचकार्यं। तत्रपूर्वेद्युःस्तद्दिनेवानियतोनियतान्ब्राह्मणान्श्राद्धेक्षणःक्रियतामितिनिमंत्रिता
नाहूयस्वागतंपृष्ट्वासुस्वागतमित्युक्तोदाहनीलीरूक्षच्छिद्रादिवर्जिताहतशुक्लशुद्धद्विवस्त्रोद्वि
राचम्यप्राङ्मुखःकृतगोमयमंडलेद्वारदेशेशरप्रमाणेकुशयवगंधाद्यर्चितेवैश्वदेवब्राह्मण
पादान्यज्ञोपवीतीसव्योदिङ्मुखःप्रक्षाल्यकुशतिलगंधाद्यर्चितेमंडलेपित्रर्थब्राह्मणपादान्प्रा
चीनावीतीप्रक्षाल्यस्वयंद्विराचांतोद्विराचांतानुपवेशयेत्। तत्रवैश्वदेवार्थब्राह्मणौप्राङ्मुखौद्वौ

मद्यूतदाहापसंबंधविवर्जितश्लक्ष्णावतुष्याद्वृद्धपीठेन वा केवलार्णवासने उपवेश्य त्रीन्विप्रानुदङ्मुखान्पि
त्र्यर्थमुपवेशयेत्। यद्वा एकैकमुपवेशयेत्। मातामहादीनां चैवं। तंत्रं वा वैश्वदेवं स्यात्। ततो गृहाद्बहिः कुशान्ति
लान्विकीर्य ब्राह्मणसमीपे कुशेषु प्राङ्मुख उपविष्टो दैवं गयां देवान्वस्वादीन्पितॄन्जनार्दनं च नत्वा कुतपा
दिकाले स्समंत्रकाममंत्रकं प्राणायामद्वयं कृत्वा प्राचीनावीती पितॄणां पितामहानां प्रपितामहानां सपत्नि
कानां मातामहानां मातुःपितामहानां मातुःप्रपितामहानां सपत्नीकानाममुकनाम्नां गोत्राणामस्मिन्का
लेस दैवं पार्वणश्राद्धं युष्मदनुज्ञया करिष्ये इति संकल्प्य। अपहता असुरा इति सर्वतः तिलान्विकीर्य उ
दीरतामित्युक्त्वा प्रोक्षेत्। दैवं सर्वमुपवीती प्रदक्षिणं युग्मं त्वपूर्वमुदगग्रमुदगपवर्गमुदङ्मुखं कुर्यात्।
ततो वैश्वदेवार्थविप्रहस्ते अपो दत्वा युग्मान्कुशान्दत्वासने घासनं दक्षिणतो विश्वेषां देवानामिद
मासनमिति यवसहितं क्षिपेत्। आसनेष्वासनं स्थाप्य द्विप्रहस्ते करास्वेने। ततः पुनरपो दत्वा निमंत्रयेत्।
दैवे क्षणः क्रियतामिति तत ओं तथेति विप्रो ब्रूयात्। ततः प्राप्नोतु भवानिति कर्त्ता ब्रूयात्। प्राप्नुवानीति
विप्रः पुनर्ब्रूयात्। इति ग्रंथसंग्रहकारिकास्मृतिः। अक्षय्यासनयोः षष्ठी द्वितीयावाहने तथा।
अन्नदाने चतुर्थी स्याच्छेषाः संबुद्धयः स्मृताः। इति श्लोके संग्रहकारिका। यद्वा सर्वत्र तु षष्ठी वर्ज्याः। ग्रंथे।
आवाहन वर्जं। सर्वत्र पुनः पुनरपो दद्यात्। ततः पुरूरवार्द्रवसंज्ञका विश्वेदेवा नार्हसिष्य इति यवहस्तस्स

न न वा

ष्टावाहयेति तैरनुज्ञातो विश्वेदेवास आगत इत्यावाह्य यवान्दक्षिणपादादिमस्तकांतान्समारोप्य विश्वेदेवाः शृ
णुतेमं हवं मे ये औ आगच्छंतु महाभागा इत्याभ्यां मंत्राभ्यामुपस्थाय तत्समीपे भूमौ यवान्विकीर्य कुशानास्तीर्य सु
वर्णादि तैजसाश्ममयमृन्मयपलाशपत्रादिष्वेकद्रव्यपात्रद्वये द्विकुशकूर्चांतर्हिते शन्नोदेवीरभिष्टय इत्यन्ना
पो निषिच्य यवोसि धान्यराज इति यवान्क्षिप्त्वा गंधपुष्पादि च क्षिप्त्वा स्वाहार्घ्या इति निवेद्य विप्रहस्ते कूर्चं प्रा
गग्रं क्षिप्त्वा या दिव्या आपः पयसे[illegible]ता विश्वेदेवा इदं वोऽर्घ्यम् इति तद्धस्ते अर्घ्यं दद्यात्। ततो विश्वेदेवा अर्घ्यं वो गं
धदस्यादि प्रयोगे गंधादि दद्यात्। श्रीखंडकुंकुमकर्पूरागरुपत्रकादि गंधानुलेपनं कर्त्ता कुर्यात्। गंधं दत्वा
कर्त्ता दर्भेण हस्ते नानुलिंपेत्। ब्राह्मणाः स्वयमनुलिंपेयुरित्यन्यायं नियमः। ततो जातीमल्लिकाश्वेतयूथिकाचंपक
कुंकुमजात्यादीनि पुष्पाणि मरुबकादीनि सुगंधपुष्पाणि देयानि। उग्रगंधीन्यगंधीनि रूक्षजरक्तान्यक्ता
नि असुगंधिकंटकिजानि च। अर्कधत्तूरशिरीषकांचनारतुलसीबिल्वादीनि वर्ज्यानि। ततो घृतमधुसंयु
क्तगुग्गुलुश्रीखंडागरुसरलादिसंभवो घृतादिसमस्तो यस्तो वा धूपो देयः। प्राण्यंगं हस्तवाताहतं धूपं व
र्जयेत्। ततो घृतेन तिलतैलेन वा दक्षिणदिक्केन दीपं दद्यात्। वसामेदोद्भवं वर्जयेत्। ततः शुद्धशुक्लमहत्तं स
दशं वस्त्रमाच्छादनं दद्यात्। तन्मौल्यं वा। अलाभे तत्तरीयं वा यज्ञोपवीतं वा शक्त्या दद्यात्। ततो वस्त्रसंप
र्णमस्त्विति ब्रूयात्। अस्त्विति ते च प्रतिब्रूयुः। संकल्पसिद्धिरस्त्विति सर्वतो ब्रुवंतीति कर्त्ता ब्रूयात्। सुसंक

ल्पसिद्धिरिति विप्रो ब्रूयात्। आसनादिषु सर्वत्र स्वासनं अस्त्वर्घ्यं सुगंधः सुपुष्पाणि सुमाल्यं। सुधूपः सुदी
पः सुज्योतिः स्वाच्छादनमिति विप्राः प्रतिब्रूयुरिति संग्रहस्मृतिः। अथ पित्र्यं प्राचीनावीती अप्रदक्षिणमयुग्म
पूर्वत्वं दक्षिणापवर्गं दक्षिणाभिमुखः कुर्यात्। पित्रुपचारे धिकवचनं पश्चाद्बहुवचनं वा। जघन्येधिकवचनमेव। पि
त्र्यविप्रहस्ते धूपो दत्वा अयुग्मकुशान् द्विगुणभुग्नान् सतिलानासने धासनं पितॄणामिदमासनं पितामहा
नामिदमासनं प्रपितामहानामिदमासनमिति। पितुः पितामहस्य प्रपितामहस्येदमासनमितिवा। पित्रे पि
तामहाय प्रपितामहायेदमासनमितिवा। पितृभ्यः पितामहेभ्यः प्रपितामहेभ्य इति वासनं वामभागे दद्या
त्। मातामहेषु चैवं। ततः श्राद्धक्षणः क्रियतामित्याशिर्दिनिमंत्र्याततः पितॄन् पितामहान् प्रपितामहान् आ
वाहयिष्य इति तिलहस्तेन ब्राह्मणान् पृष्ट्वा। पितरं पितामहं प्रपितामहं वा वाहयिष्य इति पृष्ट्वा वाहयेति
तैरनुज्ञातः उशंतस्त्वेतयाऋचा वाह्यतिलान्मस्तकादि दक्षिणपादांत आरभ्यायंतुनः पितर इत्युप
तिष्ठेत। मातामहेषु चैवं कृत्वा पितृसमीपभूमौ तिलान्विकीर्य कुशेषु राजतादि पूर्वोक्तपात्रत्रये त्रिकुश
कूर्चांतर्हितं शन्नोदेवीरभिष्टय इत्यृचा तिलोसि सोमदैवत्य इति तिलान् क्षिप्त्वा गंधपुष्पादि क्षि
प्त्वा स्वधार्घ्य इति निवेद्य विप्रहस्ते कुशान्सिक्त्वा या दिव्या आप इति क्षिप्त्वा पितरिदं तेर्घ्यं पितामहेदं तेर्घ्यं २८
प्रपितामहेदं तेर्घ्यमिति क्रमेणार्घ्यं दत्वा स्वतुर्थ्या वा दत्वा तद्धस्तनिस्रुतार्घ्योदकं पितृपात्रे प्रसिच्य दक्षिणा
प्रे

ग्रेषु कुशेषु पितृभ्यः स्थानमसीति सपवित्रं न्युब्जं कृत्वा तस्योपर्यर्घ्यपात्रपवित्राणि क्षिप्त्वा तिलपुष्पादि क्षिपे
त्। तत्पात्रं मासमाप्तेर्नवालयेत्। मातामहेषु चैवं। पात्रालाभे एकपात्रपवित्रकं कार्यं। उशंतस्त्वायंतुनस्तिलोसि
मंत्राणामूहो न कार्यः। देवे पित्र्ये च पात्रनिवेदनांते आवाहनमिति केचित्। ततः पितरयं ते गंधः पितरो यं गंध इ
ति वा इत्यादि प्रयोगैर्गंधमाल्ये शुक्लपुष्पाणि दद्यात्। ललाटे त्रिपुंड्राकारं स्कंधे माल्यं च वर्जयेत्। धूपं दी
पं ज्योतिराच्छादनानि वदद्यात्। देवे पित्र्ये च आसनक्षणावाहनार्घ्याक्षतगंधपुष्पधूपदीपाच्छादनानां प
दार्थानुसमये सति विधिवृद्धिः काण्डानुसमये विधिसिद्धिरेव। ततः संकल्पसिद्धांतं कुर्यात्। अथ गोमयेन च
तुरस्रं मंडलं कृत्वा पर्यंतं स्कृत्वा देवे सौवर्णादीनि पित्र्ये रौप्याणि पाणि वा स्वर्णरौप्यघृष्टान्यन्यानि पात्रा
णि मृन्मयवर्जितानि मंडले निधाय तत्रापो निषिच्य हस्ते निमृज्य प्रक्षाल्य पुनर्जलेनैव प्रक्षालयेत्॥ अ
थाग्नौ पाणौ वा होमः॥ तत्र घृताक्तमन्नं घृतं वादायाग्नौ करिष्य इति पृष्ट्वा कुरुष्वेत्यभ्यनुज्ञातः औपा
सनाग्निमुपवीती परिसमुह्य पर्युक्ष्य प्राचीनावीती तूष्णीं मिध्ममग्नावाधाय मेक्षणेन स्रुवेणोपस्तीर्याव
दानद्वयं क्षिप्त्वा पंचावत्तीचेत्त्रयं क्षिप्त्वा पुनः स्रुवेणाभिघार्य यो बदायमेक्षणेन सोमाय पितृमते स्वधा न
मः। अग्नये कव्यवाहनाय स्वधा नम इत्याभ्यां मंत्राभ्यां आहुतिद्वयं हुत्वा मेक्षणमग्नावनुप्रहृत्य हुत
शेषं पित्र्यपात्रेषु क्षिपेत्। न देवपात्रेषु। आहिताग्निः सर्वाधानी दक्षिणाग्नौ जुहुयात्। पित्र्यविप्र

स्मृ॰स॰सा॰ पाणौवाऽग्न्यभावेपाणौहोमः। पाणिहोमेतुइध्मप्रोक्षणविप्राभ्यनुज्ञानसंतिः। पित्र्यविप्रपाणौपरिसमुह्यपर्यु
२९ क्ष्यवामेनोपस्तीर्य। दक्षिणेनावदायप्रत्यक्षिधार्यहुत्वापरिसमूहनपर्युक्षणेनस्तः। मतामहादिषुचैवं। तदे
वसाग्निनापाणिहुतंतदेवप्राश्याचम्योपविशेत्। अथवाभाजनेप्रक्षिप्याचम्योपविशेत्। अग्न्यभावेहुतं
तुपूर्वंनाश्नीयात्। भोजनकालएवाश्नीयात्। त्यक्ताग्निहुतंतुनैवाश्नीयात्। प्रेतश्राद्धेषुवीतदग्नौक्षिपेदि
त्याहुः। ततोदैवमुपस्तीर्यस्वयंपत्नीवान्येवानियताःप्रशस्तहविष्यान्नपूर्वंपरिवेषणंकुर्युः। नापवित्रेणह
स्तेननैकहस्तेननायसेनहस्तेनपरिवेषणंकुर्युः। तृणपर्णाद्यंतर्धानेनदोषः। अथहविष्याणि व्री
हियवगोधूमप्रियंगुमुद्गमाषश्यामाकनीवाराद्याः। कालशाकंमहाशाकंद्रोणशाकंमेध्यमांसंम
हाशल्कादिइक्षुकदलीपनसाम्रातकाम्रखर्जूरराजतांबूरगोस्तनीद्राक्षाप्रियालामलकनारिकेलत्र
पुओर्वारुकचिर्भिटफलेंगुदफलमधुरोत्तमफलबदरादीएलाशुंठीसार्द्रकहिंगुमरीचपिप्पलीमध
कगुडशर्कराखंडकर्पूरसैंधवमानसालवणानिमधकगव्यपयोदधिघृतानीत्यादीनिप्रशस्तानि। ए
तद्यथासंभवमादनसूपपायसापूपभक्ष्यपानादिकंचबहुपरिवेष्या हिंगुशुंठिमरीचपिप्पलीचद्रव्यसं
स्काराद्यानिश्राद्धेस्युर्नप्रत्यक्षेणभक्ष्याणि॥ अथाहविष्याणि ॥ कोद्रवचरकमसूरकुलित्थ २९
पुलकराजमाषरक्तच्छिदक्रमाषाः सलवणाढकाः। कुलकपावना। लकुचकधान्यानिमुद्गमाषतिलय

तिरिक्तानिवर्ज्यानि। उपोदकीतुलसीकृष्णातसीशिग्रुमहासर्षपपूतिगंधशाकानि। कूष्मांडं गोधारिसर्करिका
पिंडमूलबिल्वफलेकांचनालकंकपित्थंकरकंकरंजंकरवंदंकलिंगंवंशांकुरं पित्र्यर्थेत्याज्यानि। अंबुक्षोप
हृतंसर्वंकृष्णजीरकाशतपुष्पाविडलवणादि। आरण्यमृगमहिषीचमरीपयोदधिघृतादीन्यप्रश
स्तानिवर्ज्यानि। प्रशस्ताभावेऽप्यनिषिद्धंग्राह्यं। अथपात्रेषुपरिविष्यदैवेपात्रेसकुशयवान्क्षिप्त्वा
पात्रंपर्युक्ष्यपृथिवीतेपात्रमित्यभिमंत्र्यातोदेवादृत्यनुत्वाविष्णोहव्यंरक्षस्वेतिअन्नेद्विजांगुष्ठंनि
वेश्यपुरूरवार्द्रवसंज्ञकाविश्वेदेवाइदमन्नंहविर्ब्राह्मणास्याहवनीयार्थेइयंभूमिर्गयायंब्राह्मणोगदा
धरःविश्वेभ्योदेवेभ्यइदमन्नंपरिविष्टंपरिवेष्यमाणंचातृप्तेर्नममेतिपयोदकेनत्यक्त्वायेदेवासइ
त्यनेनोपतिष्ठेत्। अथपित्र्यपात्रेषुकुशतिलान्क्षिप्त्वापात्रंपर्युक्ष्यपृथिवीतेपात्रमित्यभिमंत्र्य इदं
विष्णुरित्यनुत्वाविष्णोकव्यंरक्षस्वेतिअन्नेद्विजांगुष्ठंनिवेश्यपित्रादेवतापितरोवादेवताइदमन्नंक
व्यमित्युक्त्वापित्रेवसुरूपायपितृभ्योवसुरूपेभ्यःइतिवोक्त्वाइदमन्नंपरिविष्टंपरिविष्यमाणंचा
तृप्तेर्नममेतिपित्रेवसुरूपायपितामहायरुद्ररूपायप्रपितामहायादित्यरूपायपितृभ्योवसुरू
पेभ्यःपितामहेभ्योरुद्ररूपेभ्यःप्रपितामहेभ्यआदित्यरूपेभ्यस्तिलोदकेनत्यक्त्वायेचेहपितरइत्यनेनो

स्मृ॰त्य॰सा॰ प्रतिष्ठेत्। नात्रोहश्च कार्यः। मातामहेष्वप्येवं। अतिथिरस्ति चेत्तं देववदर्चयित्वा स्वेष्टदेवरूपाय विष्णुरूपाय शिवरू
पाय सूर्यरूपाय चेत्यन्नं त्यक्त्वा ये देवास इत्युपस्थाय। देवतीर्थैः पितृतीर्थैश्च। सप्तव्याधा दशार्णेषु इत्यादीन् जपि
३० त्वा अपोशनं दत्वा प्रणवं गायत्रीं मधुमतीं जपित्वा मधु मधु इति त्रिरुक्त्वा ॐ तत्सत् यथासुखं जुषध्वमिति ब्रूया
त्। अथ ब्राह्मणाः प्राणाहुतिपूर्वं मौनिनो भूत्वा भूत्वा भृतकात्पात्रमनुद्धरंतो मुखवशं हृ पाण्या द्विवाप
त्वं वर्जयंतो भुंजीरन्। यद्वा मृतादिपाणिकासु पिंडिकासु वा प्राणाहुतिः पूर्वं पूर्ववापात्रं निधाय भुंजीरन्। उ
च्छिष्टस्ते कपादरजःस्पर्शं क्रमणादि सयात्। सर्वथानयंत्रिकादिषु निदध्युः। न बलिं कुर्युः। ततो भोक्तृके कर्त्रेपि
त्रिवायद्रोवतेद्वा वस्त्रं देयं। आत्मेत्र रक्षोघ्नपित्र्यपवित्रमंत्रान् श्रावणादिपूर्वानुपवीती श्रावयित्वा प्राणानायम्य गा
गायत्र्याज्जपेत्। ततः सार्ववर्णिकमन्नाद्यमादाय प्रणवमुक्त्वा प्राचीनावीती मधुवाता इति त्र्यृचं मक्षन्नमीमदंते
त्यक्तं संश्रावयित्वा तृप्ताः स्थेति पृष्ट्वा तृप्ताः स्मेति द्विजैः प्रत्युक्ते देवपित्र्यब्राह्मणसन्निधौ पुरत उच्छिष्टसमी
पे दक्षिणाग्रेषु कुशेषु तिलोदकं पितृतीर्थेन प्रसिच्य ये अग्निदग्धा ये अनग्निदग्धा इत्यनेन संसक्लिन्न
न्नं क्षिप्त्वा तिलोदकं प्रसिच्य आचामेत्। ततो गंडूषं दत्वा सार्ववर्णिकमन्नाद्यं पिंडार्थमुद्धृत्य अन्नशेषैः किं क्रिय
तामिति पृष्टे इष्टैः सहोपभुज्यतामित्यभ्यनुज्ञाते तैर्गृहीते पाग्निर्होमेप्यग्निसमीपे पाणिहोमे विप्रसमीपे ३०
पिंडपितृयज्ञवत् पिंडान्निदध्यात्। तत्रैवं गोमयेनोपलिप्ते भूप्रदेशेन वा खादिरेण काष्ठेन वा दर्भेण वा त्रि

प्रहता असुरा रक्षांसि इत्यादिना रेखाद्वयं प्रागपवर्गं उल्लिख्या किरघुक्ष्य तत्र बर्हिरास्तीर्य पूर्वरेखायां पिंडदेशे
षु शुंधंतां पितर इत्यादिभिर्मंत्रैस्तिलोदकं पितृतीर्थेन निनीय पश्चिमलेखायां शुंधंतां मातामहा इत्यादिभि
र्निनीय एतत्ते देवदत्तशर्मन् ये च त्वामत्रानु इत्युक्त्वा एतातिंड रूपमन्ने पवित्रेन मम इत्यादि सिक्ति लमिश्रान् प्रा
चीनपाणिः पिंडान्निधाय अत्र पितर इत्यादिना षट्पिंडान् सकृत्सकृद्देवानुमंत्र्य सव्यवृद्धदुदगावृत्य यथाश
क्त्यानुच्छ्वसन्नासित्वा अभिपर्यावृत्य अमीमदंत पितर इत्यादिनानुमंत्र्याच्छसेत्। तत उपवीती पिंडशे
षमवघ्राय हस्तं प्रक्षाल्याचम्य प्राचीनावीती पिंडेषु पूर्ववदुदकं निनीय देवदत्तशर्मन्नभ्यंक्ष्वेति पिंडेषु तैलं
दत्वा देवदत्तशर्मन्नंक्ष्वेति अंजनं। दत्वा एतद्वः पितर इत्यादिना वासो दशामूर्णास्तुकां वा दद्यात्। पंचा
शद्वर्षादूर्ध्वं स्वहस्तलोम वा दद्यात्। तेनैव मंत्रेण ततः पिंडेभ्य आक्षतगंधपुष्पधूपदीपान् नैवेद्यतांबू
लादि दत्वा। अथ पिंडान् पितृरूपानुपतिष्ठते। नमो वः पितर इत्यादिना मनो न्वाहुवामह इति वतस्
सिः। अथ पिंडान् युगपत्प्रवाहयेत्। परेतन पितर इत्युत्तरा अग्ने तमद्येत्युत्तरा दक्षिणाग्निं प्रतिगच्छेत्।
यदंतरिक्षमित्यनागार्हपत्यं प्रतिगच्छेत्। औपासने तु अग्ने तमद्येति गत्वा यदंतरिक्षमिति जपेत्।
तत्र गार्हपत्यपदस्य लोपः। पाणिहोमे अग्ने तमद्येत्यादिके नास्त्येव वीरं मे दत्त पितर इति मध्यमं पिंड
माधायाधत्त पितर इति पत्नीं प्राशयेत्। पुत्रायायुरारोग्येभ्य यो अर्थी पिंडास्तु गोजलं विप्रेभ्यो दद्यात्।

स्मृत्य-सा- अग्नौजलेवाक्षिपेत्। अर्घ्यनिनयनाभ्यांअन्यत्रपितृशब्दस्योहोनकार्यः। एवंवास्वशाखोक्तविधिनावापिंडान्नि
धायावम्यावमनंदद्यात्। ततोविप्रहस्तेपोदत्वादक्षोमृत्वायवान्निळोंश्चक्रमात्क्षिप्त्वातान्निरस्यपुनःसाक्षतपु
३१ ष्पान्क्षिप्त्वागोत्रनाम्नाभिवाद्यगोत्रंवर्द्धतामितियाचयित्वास्वस्तिवर्द्धतांगोत्रमितिप्रत्युक्त्वाप्रक्षिप्ताशिषोगृ
हीत्वापात्राणिचालयित्वावामेत्। अनुपनीतःस्त्रीनचालयेत्। ततोविश्वेभ्योदेवेभ्यःपितृभ्यश्चस्वस्तीतिब्रू
तेत्युक्तेतेभ्यःस्वस्तीतिप्रत्युक्तेविश्वेषांदेवानांपितृणांचाक्षय्यमस्त्वित्युक्त्वाअस्त्वक्षय्यमितिप्रत्युक्ते
हिरण्यरजतादिशक्त्यादक्षिणांदद्यात्। ततोदक्षिणाःपांतुबहुदेयंचास्त्विएवमुक्तेतेतथैवप्रत्यूचुः। स्वधांवा
चयिष्यइत्युक्तेवाच्यतामित्यनुज्ञातःपितृभ्यःस्वधोच्यतामित्युक्त्वाअस्तुस्वधेतिप्रत्युक्तेभूमौजलं
सिंचेत्। स्वधासंपद्यतामित्युक्तेसंपद्यतांस्वधाइतिप्रत्यूचुः। विश्वेदेवाःप्रीयंतामित्युक्तेप्रीयंतांविश्वेदे
वाइतिप्रत्यूचुः। पितरःप्रीयंतामित्युक्तेतथैव। ततोन्युब्जपात्रमुत्तानंकृत्वापवित्राणिविसृज्यविप्रह
स्तेषुअक्षतापुष्पाणिदत्वावाजेवाजइत्युक्त्वाउत्तिष्ठंतपितरइतिदर्भेणविप्रान्पितृपूर्वविसर्जयेत्।
ततःपादप्रक्षालनदेशेआमावाजस्येतिप्रदक्षिणीकृत्यदक्षिणाभिमुखोदातारोनोभिवर्द्धंतामन्नंच
नोबहुभवेदितिवोतेषुयाचितेषुतेश्चताभ्यांश्लोकाभ्यांयुष्मदाख्यातशब्देनतथैवास्त्वितियाप्रत्युक्त ३१
आशिषोगृहीत्वाप्रणिपत्याद्यमेसफलंजन्मेतिप्रसाद्यसर्वंसंपूर्णमस्त्वितिवाचयित्वाक्षम्यतामि

त्युक्त्वानिवेशनांतमनुव्रज्यास्यामित्युक्तेप्रदक्षिणीकृत्यागत्यपाकांतरेणश्राद्धशेषेणवावैश्वदेवादिकंकृत्वे
ष्टैःसहश्राद्धशेषंपूर्ववद्भुंजीत। निमंत्रणादितत्तद्रात्रौब्रह्मचारीस्यात्भोक्तातुपुनर्भोजनाध्वगमना
ध्ययनाध्यापनमैथुनदानप्रतिग्रहहोमादीन्वर्जयेत्॥ इतिस्मृत्यर्थसारेपार्वणश्राद्धसर्वसंग्रह
मतालिखितं॥ ॥ अनुपनीतास्त्रीशूद्राःश्राद्धमृत्विजैःकारयेयुः। स्वयंवामंत्रकंनामगोत्राभ्यां
कुर्युः। देवेभ्योनमःपितृभ्यःस्वधानमइतिमंत्राभ्यांवा। पितरोयत्रपूज्यंतेतत्रमातामहाअपि। अविशे
षेणकर्तव्यंविशेषान्नरकंव्रजेत्। एवंकाम्यश्राद्धंतत्रधूरिलोचनौविश्वेदेवोअग्नौपाणौवाहोमः।
नैमित्तिकंवश्राद्धंतद्वत्। तत्रकामकालोविश्वेदेवौ। इष्टिश्राद्धंक्रतुश्राद्धंचतद्वत्। तत्र [redacted]
षे। अभ्युदयिकश्राद्धं। तत्रसत्यवसुसंज्ञकौविश्वेदेवौ। विश्वेदेवार्थमात्राद्यर्थंपित्राद्यर्थंसपत्नीकमा
तामहाद्यर्थंद्वौद्वौविप्रौयुग्मावाशक्तितोयोज्याः। अमूलादर्भायज्ञोपवीतीप्राङ्मुखेभ्यउदङ्मुखो
दद्यात्। उदङ्मुखेभ्योवाप्राङ्मुखःसर्वत्रानदक्षिणामुखेभ्योदद्यात्। तिलार्थेयवाः। नांदीदेवेक्षणाः
क्रियतां। नांदीश्राद्धेक्षणःक्रियतां। ॐतथाप्राप्नुतांभवंतौप्राप्नुवामौयोदिक्षणे। पित्र्यपिंडद्विगुणा
कूर्चकंपवित्रकं। पित्र्येनांदीमुखपूर्वंयुग्मतेवयवासिसामदेवदत्तइतियवैर्वापःस्वधायाःपुष्याःस्व

धानमःस्थाने स्वाहा शब्दः। स्वाहार्घ्य इति अर्घ्यनिवेदनं नांदीमुखाः पितरः प्रियंतामिति वा। दर्भगंधादिदेयं।
प्रदक्षिणमुपचाराः उदगपवर्गत्वं। अग्नौ पाणौ वा होमः। अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वा
हेति व्युत्क्रमेण होमः। होमद्रव्यमन्नमेक्षणप्रक्षेपः। रक्षोघ्नेंद्रसांतिमंत्रान् श्रावयेत्। मधुवाता इत्यस्य स्थाने
उपास्मै गायता नर इति पंचर्चं श्रावयेत्। अन्यमधुमंत्रान् अक्षन्नमीमदंतेत्यंतं श्रावयेत्। आचांतेषु भुक्ता
शयान्गोमयेनोपलिप्य प्राग्ग्राः प्रागग्रान्दर्भान्नास्तीर्य दैवपूर्वं पदाद्यं शेषं पार्वणवत्। तत्र पिंडमात्रस्य
लोपो वा पिंडादिकस्य लोपो वा॥ अथैकोद्दिष्टं ॥ तत्र सर्वश्राद्धानि त्रिविधानि। नवश्राद्धानि नवमिश्रा
णि पुराणानीति। तत्र प्रथमाहादेकादशाहांते प्रथमादिनत्रयमध्ये अमादिसंभवे दशाहादि सर्वं कार्यंप्र
ष्टमात्। व्यतिरिक्ते तु न कार्यमित्यर्थः। विहितानि नवश्राद्धानि एकादशाहादि न्यूनाब्दांतं विहितानि न
वमिश्राणि। ततः परं पुराणानीत्युक्तानि। तत्र सर्वैकोद्दिष्टेषु दैवं नास्ति। एक उद्देशः। ब्राह्मणश्चैकः। अयु
ग्मा वा विप्राः। एकं पात्रं पवित्रं च॥ पाणौ होमो नास्ति के ४ वा भुक्तशेषेण कः पिंडो देयः। पुराणैकोद्दिष्टे पा
र्वणैकदेशवत्सर्वं दैवहीनं समंत्रकमेव। पाणौ मंत्राभ्यां होमः। नवमिश्रेषु देवा निमंत्रणं। निमंत्रणादि न ३२
स्वधाक्षिः पितृशब्दः स्वधा नमः शब्दवत्तां मंत्राणां लोपः। तिला वा पात्रास्ति सर्वं तूष्णीं कार्यं। तूष्णीमर्घ्यनि
वेद्यानावाह्य मंत्रांते नाम्ना प्रेतोद्देशेनार्घ्यं दत्वा गंधादि देयं। पाणौ प्रेताय स्वाहेत्येकाहुतिः। पितृश

ब्दं नवा। धूपं दीपं स्वधा शब्दं पिंडमनुज्ञपमभिश्रवणां च वर्जयेत्। अक्षय्यस्थाने उपतिष्ठतामिति वदेत्। प्र
तिवचनं च तद्वत्। अभिरम्यतामिति विसर्जयेत्। अभिरतास्मेति प्रत्युक्तिः। नवमिश्रादि सर्वं समंत्रकमि
त्येके। नवमंत्रेषु सर्वममंत्रकमेवाकार्यं। नाम प्रेतशब्दं च न लोपयेत्। सद्य एव निमंत्रणं। धूपं दीपं श्राद्ध
शेषभोजनं च वर्जयेत्। नवश्राद्धं सकृत्वा स्नायात्। अन्यत्सर्वं श्राद्धं पार्वणवत्। नवश्राद्धान्येकादशेऽह्नि
वा कार्याणि। तत्राद्येन्हि एकोद्दिष्टं। तत्र बहुदक्षिणा प्रेतवस्त्राभरणयानशय्यासनभाजनपादुकोपान
हच्छत्रादिकं देयं। रुद्रगणा प्रेतोद्देशपक्षे नवश्राद्धवद्रुद्रोद्देशपक्षे तु यज्ञोपवीती विप्रान्समभ्यर्च्य भो
जयेत्। रुद्ररूपप्रेतोद्देशे च श्राद्धं सोदकुंभसतिलं सवत्र दक्षिणा देया। प्रेतश्राद्धे विशेषेण॥ अथ स
पिंडीकरणं॥ ॥तत्र मंडलत्रयं। द्वौ द्वौ वा विप्रौ प्रेतस्थाने त्वेकः। तत्पित्रादिषु त्रयः। अशक्तौ दैवे पित्र्ये वा
एकैको विप्रः। कामकालौ विश्वेदेवौ। देवार्चनं पूर्ववदेव। प्रेतार्थमेकं पात्रं तत्पित्राद्यर्थं त्रीणि प्रेत नव
मिश्रैकोद्दिष्टवत् पित्र्यं पार्वणवत्। पात्राणि पूरयित्वा गंधादि क्षिपेत्। पात्राणि तत्र चैवानि वेद्य प्रेतपात्रं
पितृपात्रेषु संयोजयिष्य इति स्पृष्ट्वा संयोजयेत्यभ्यनुज्ञातः प्रेतपात्रकुशान् पितृपात्रेषु क्षिप्त्वा प्रे
तपात्रे किंचिद्दचजलं सकुशमवशेष्य ये समानाः समनस इति द्वाभ्यां मंत्राभ्यां पितृपात्रेषु प्रसिंचेत्।
पितृपात्रावशेषेण प्रेताय प्रथमं पित्र्ये तत्पात्रार्घ्यं दत्वा शादनीतं कृत्वा पृथक्पृथगन्नं उद्धृत्य प्रेताय पा

णवैकाहुतिं जुहुयात्। नवा पित्र्यर्थमग्नौ पाणौ वा ऽमंत्राभ्यां होमः। तच्छेषं पितृभ्यः पाणिषु दद्यात्। तदन्नं भोजना
त्प्राग्नाश्नीयात्। भोजनार्थान्नेन सहाश्नीयात्। प्रेतोद्देशार्कैनैकं पिंडं दत्वा पित्र्यर्थं त्रीन्पिंडान्मंत्रतो दत्वा प्रेतपिंडं पि
तृपिंडेषु संयोजयिष्य इति पृष्ट्वा संयोजयेत्यभ्यनुज्ञातः प्रेतपिंडं त्रिधा विभज्य पूर्वमंत्राभ्यां पित्रादिपिंडेषु नि
दध्यात्। अनुमंत्रणादि सर्वं पार्वणवत्सर्वं तत्रैव समापयेत्। श्राद्धभोजने मिथःस्पृष्टौ तदन्नमत्यजन्भुक्त्वा
गायत्र्यष्टशतं जपेत्। उच्छिष्टसिक्ते तत्प्रक्षाल्य भुक्त्वा द्विशतं जपेत्। उच्छिष्टभोजने सहस्रं जपेत्। मा
तॄणां चैवं तत्र विशेषः। अपुत्रायां मृतायां भर्त्रा स्वमात्रादिभिः सापिंड्यं कुर्यात्। मातृपिंडदानादिकं आ
सुरादिविवाहोत्पन्नः पुत्रिकापुत्रश्चेन्नातिपितृगोत्रेणैव कुर्यात्। ब्राह्मादिविवाहोत्पन्नः पितृगोत्रेणैव
कुर्यात्॥ अन्वारोहणे एकचितिसमारोहणे एकदिने मरणे स्त्रियाः पृथक्सपिंडीकरणं न कार्यं। भर्तुःस्व
तस्त्रियश्च कृतं भवति। दिनांतरमरणे तु स्वपितृमातामहपिंडे कुशानंतर्धाय पित्रैकेन सापिंड्यं मातुः
कुर्यात्। सर्वत्र भर्त्रा पत्न्याः सापिंड्यमेकेनैव। श्वशुरेण निषिद्धं। केचित्त्रिभिरेव सह सापिंड्यमाहुः।
आसुरादिविवाहोत्पन्नः पुत्रिकापुत्रश्च स्वमातामहादिभिरेव। तथा च सति मातामहादिश्राद्धं नित्यमे
व मृताहादौ। ब्राह्मादिविवाहोत्पन्नः पित्रैकेन पितरि स्थिते पितामहादिभिर्मातामह्यादिभिर्वा सा ३३
पिंड्यं कुर्यात्। ब्राह्मणादिहतानां प्रायश्चित्ताकरणे ब्रह्मचारिणामनपत्यानां सपिंडीकरणं नते

षां सदैकोद्दिष्टमेव। व्युत्क्रममृत्यौ च स्थिते ऽसापिंड्यं कार्यं न वा। केचित्सर्वत्र सपिंडीकरणमाहुः। संवत्सरादर्वाक्स
पिंडीकरणे सति प्रातिदि ×मृतानां× नं प्रतिमासं वा सोदकुंभं श्राद्धं। मृताहः श्राद्धवत्कार्यं। सपिंडीकरणमार
भ्य वा शुद्धिमारभ्य वा एकादशाहादिषु तान्येव षोडश श्राद्धानि मृताह श्राद्धवत्कृत्वा वा संवत्सरविमोक्षार्थं
पार्वणश्राद्धं भूरि ब्राह्मणभोजनं कुर्यात्। मृताहश्राद्धं प्रत्यब्दमेकोद्दिष्टं पार्वणं वा यथास्वाचारं पुत्रैः का
र्यं मरणक्षये यन्मासे यत्पक्षे या तिथिस्तद्दिने तस्य मृताहः। पतीनां स्त्रीभिः सदा पार्वणमेव कार्यं। द
र्शे मृतस्य प्रेतपक्षे मृतस्य च प्रत्यब्दं पार्वणमेव। यतीनां त्रिदंडिनां प्रेतत्वं नास्त्येवो एकादशेऽह्नि पार्वण
मेव कार्यं। दंडग्रहणात्पूर्वं मरणे स्वगृह्योक्तविधिना दग्ध्वा उदकपिंडप्रेतश्राद्धसापिंड्यादीनि का
र्याण्येव। शूद्राणां तु प्रेतश्राद्धं सर्वममंत्रकं द्वादशेऽह्नि कार्यं मासे जाते वा कार्यं। अनाहिताग्नेर्म
रणादिहेतो प्रेतमृताह श्राद्धं वा। आहिताग्नेर्मरणादि प्रेतकार्यं मृताहश्राद्धं च कार्यं। दहनादिकार्यं त्रि
पक्षांते तस्माद्दहनं मृताह एव। सर्वेषां मृताहश्राद्धं कार्यमेव॥ अष्टकासु गयायां पितॄणां मातृ
णां च पृथक् श्राद्धं। न सपत्नीकानां। मातामहानां सपत्निकमेव। तत्र देवं तंत्रमेव। पितृपूर्वं च। अ
न्वष्टकमातरि एकत्र भोज्या। अन्यत्र वैवत्। वृद्धौ न सपत्नीकं। स्त्री एव देवत्वौ देवं तंत्रत्वे तोत्तमेवामृ
ताहश्राद्धं मातामहपितृमातामहि श्राद्धे पितॄणामेव कार्यं। वृद्धौ न सपत्नीकं। मातृमातामहे मातृणा

मेवकार्यं। पितॄणां तत्र श्राद्धप्राप्तिरेव नास्ति। मातापित्रोर्मृताहैक्ये पितुर्मातुः श्राद्धं पृथगेव न सपत्नीकं। तत्रपू
र्वं पितृश्राद्धं समाप्य ततो मातृश्राद्धं कुर्यात्। पित्रोर्मृताहैक्ये सहदहनेऽपि मातृश्राद्धं पृथगेव। तत्रतु पितृश्राद्धं
मातृश्राद्धं चैकपाकेन एककालेन क्रमेण समापयेत्। मृताहैक्ये एकचित्यारोहणे सति तत्रे श्राद्धं पृथगेव। त
त्रैवं तंत्रमेव। ततः पितरस्ततो मातरः अनेकमातॄणां पृथगेव क्रमेण एककपाकेन बर्हिः प्रयोगैक्यं भिन्नचित्यारो
हणे सर्वं पृथगेव। मृतश्राद्धस्यैकोद्दिष्टत्वेऽप्येवं ज्ञेयं। अष्टकागयावृद्धिमृताहादन्यत्र सपत्नीकमेव। मातामहानामेतेष्वपि सपत्नीकमेव। मृताहवर्ज्यं। तत्र पृथगेवा सर्वेषां पितृव्यतिरिक्त भ्रातृमातुलगुर्वाचार्याणां
मतद्वत्। अपरपक्षमहालये सर्वेषां पितॄणां श्राद्धं कार्यं। तत्र मातृश्राद्धं पृथक् प्रशस्तं। मातामहानां स
पत्नीकमेव। गुर्वाचार्य पितृव्यमातुलश्वशुरोपाध्यायभ्रातृसखिप्रियपोषकद्रव्यदपुत्रशिष्यर्त्विगादी
नां तत्स्त्रीणां श्राद्धं कार्यं। अपुत्राणां विशेषेण कार्यं। तत्र एकः पाकः वैश्वदेवं तंत्रं पिंड बर्हिश्चैकं। पक्षश्राद्धेव
तथैव। तत्पक्षत्रयोदश्यामेकवर्गस्य श्राद्धं न कार्यं। पिंडदानं निषिद्धं। मघायोगे विशेषतो निषिद्धं। पुत्रका
मस्य च पिंडबर्हिः कुशाः काशाः दूर्वाः प्रशस्ताः। व्रीहियवगोधूमोशीरक्षकुडुसमुंजबल्वजाश्च भवंति।
एकादश्यां त्रयोदश्यां मघायां कृत्तिकासु च। पिंडदाने दूर्वा निषिध्यते। तत्पक्षे च चतुर्दश्यां शस्त्रहतस्यैव ३८
श्राद्धं तत्रैकोद्दिष्टमेव सर्वेषां। पापमृत्यूनां चैवं। तत्र देवं पार्वणवत्। नित्यश्राद्धमदेवं स्यात्। षट्पुरुषं च

ति। तत्रान्नदेशकालनियमाः। कर्तृभोक्तृनियमाश्च न संति। विप्रानुपवेश्यासनं दत्वा अर्घ्यहोमपिंडवर्ज्यं संकल्पसि
द्धं तं कृत्वान्नं त्यक्त्वा भूक्तो प्रसादयेत्। विवाहमौंजीबंधादूर्ध्वं वर्षं वर्षार्धं क्रमात् सपिंडीकरणवर्जं श्राद्धेषु सपिंडाः
पिंडान्नदद्युः। शेषं सर्वं कुर्युः। पृथक् पिंडान्नदद्युः। पितृयज्ञेऽपयज्ञे च गयायां मातृदद्युरेव च। सपिंडीकरणं वर्जीस
र्वश्राद्धेषु विस्तृतपार्वणविधिनासंभवे संकल्पविधानेन कार्यं। संकल्पविधानं नाम आवाहनार्घ्यहोमपि
डवर्जं। पार्वणाक्रियथासंभवं भवति। अन्नाभावे द्विजाभावे प्रवासे पुत्रजन्मनि। पत्न्याभावे ऽग्न्यभावे पा
ककर्त्रभावे सति पत्न्यो रजस्वलायां सत्यां आपदि तीर्थग्रहणसंनिपाते जननिषेधकाले मृताहे वान्य
श्राद्धं न सम्यक् रात्रिसंक्रांतौ नावीरास्त्रीशूद्राश्च सर्वदा आमश्राद्धं कुर्युः। तत्राच्छादनांतं कृत्वा आमं चतुर्गु
णं द्विगुणं समं वा सोपस्करं त्यक्त्वा दक्षिणां दत्वा समापयेत्। आमश्राद्धे पिंडदानं न वा। स्वस्तिवाचनं नास्ति। अ
न्नाभावादिनिमित्तेषु हेमश्राद्धं वा कार्यं विशेषतः। पुत्रजन्मापत्नीकप्रवास्यनग्निती र्थापत्स्वगरेषु हे
मश्राद्धे आवाहनार्घ्यगंधपाकादि होमः। पिंडानुकुर्युर्न वा। आच्छादनांते हिरण्यं अष्टगुणं चतुर्गुणं समं वा द
क्षिणां त्यक्त्वा प्रयेत् समापयेत्। अन्नाभावाद्यनेकनिमित्तेषु संकल्पितश्राद्धं कार्यं। तत्र द्रव्ये विप्रे वा स
न्निहिते असंभवे आमहेम वस्त्रधनधान्यादि वस्तु दत्तैय। पितुर्दद्देशेन संकल्प्य त्यजेत्। मासिका
निमृताहश्च संभवन्नेनैव कार्याणि। सपिंडीकरणं तु पूर्ववदन्नेनैव कार्यं॥ अथ श्राद्धकालविधिः॥ ॥

तत्रतावद्यस्मिन्दिनेयद्विहितंकर्मतद्घटिकासुतत्कर्मणःप्रारंभंसमाप्तिंचकुर्यात्।मृताहेतुश्राद्धविशेषेणप्रारंभं
समाप्तिंचकुर्यात्।आह्निकेपंचदशधाविभक्तेअष्टमोमुहूर्तःकुतपःकुतपादिपंचमुहूर्तेषुश्राद्धंकार्यं।अह्नः
पंचधाविभागेत्रिमुहूर्त्तकःप्रातःपूर्वाह्णोमध्याह्नोपराह्णःसायाह्नइतिप्रातःकालेवृद्धिनिमित्तंश्राद्धंप्रश
स्तं।पूर्वाह्णेआमश्राद्धंहेमश्राद्धंचमध्याह्नेएकोद्दिष्टं।अपराह्णेपार्वणंपिंडपितृयज्ञकरणादिनेसाया
ह्नेपिपार्वणमनुज्ञापयेत्।एवंपूर्वदिनेषु॥ अथखंडतिथिःसूच्यते ॥अमावास्यादृष्टचंद्रासि
नीवालीसंज्ञाअदृष्टचंद्राकुहूसंज्ञाअमावास्याभूतविद्धावेदपराह्णव्यापिनीग्राह्या।भूतविद्धाचेत्त्यक्ता
अपरेह्निअपराह्णव्यापिनीतिथिर्ग्राह्या।मध्याह्नात्परस्तादमावास्याप्रतिपत्तिथ्योर्भूतविद्धेनभ
वति।अत्यंततिथिक्षयेविषयेअपरेद्युरपराह्णेअमावास्याया अभावेभूतविद्धापिसिनीवा
लीग्राह्या।ततोर्वाचीनक्षयेपिभूतविद्धासिनीवालीअपराह्णव्यापिनीसर्वैर्ग्राह्या।यद्वासाग्निकैः
सिनीवालीनिरग्निकैःस्त्रीशूद्रैश्चकुहूः।अत्यंततिथिवृद्धौभूतविद्धासिनीवालीत्याज्याअपरा
ह्णव्यापिनीकुहूर्ग्राह्या।ततोर्वाचीनवृद्धौभूतविद्धासिनीवालीत्यक्त्वामध्याह्नव्यापिनीकुहूर्ग्राह्या।
द्वयोरपिमध्याह्नव्यापित्वेतिथिसाम्येद्वयोरन्यतमातिथिर्ग्राह्या।यद्वासाग्निकैःसिनीवालीनिर ३५
ग्निकैःस्त्रीशूद्रैश्चकुहूः।यद्वासर्वैःकुहूर्ग्राह्या।दर्शपूर्णमासयोःश्राद्धतिथिषुवृद्धिह्रासस्वीकारो

नान्यत्रमृताहेचापराह्णव्यापिन्येवतिथिर्ग्राह्या।अपराह्णःपितॄणांस्वयंभुवादत्तः।नास्तमयत्रिमुहूर्तव्या
पिन्येव।तिथिवृद्धौपरैवग्राह्या।तिथिसाम्येपूर्वापरावा।तिथिक्षयेत्वस्तमयत्रिमुहूर्तव्यापिन्येवग्राह्या।अ
विघ्न परदिनेश्राद्धकरणासंभवेसूतकादिसंभवेचपूर्वेद्युरस्तमयव्यापिनीग्राह्या।केचित्सदापूर्वविद्धाग्राह्येत्याहुः।
तन्मुखकुस्मृतिन्यायविरोधान्नेच्छंति।पूर्वदिनेश्राद्धसंभवेसूतकादिविघ्नसंभवेपरेद्युरुदयव्यापिनीप्रयोगप
र्याप्तकालातिथिर्ग्राह्या।तत्रापिमृताहश्राद्धस्यद्रव्यसंभवेनान्येनविघ्नेनवानुपपत्तौउपपत्त्यनंतरंका
र्यं।सूतकादिविघ्नेशुद्ध्यनंतरंकार्यं।यद्वाकृष्णैकादश्याममावास्यायांवाकार्यं।यद्वानंतरमासेतद्दि
नेकार्यं।एकोद्दिष्टसंप्राप्तेविघ्नेसत्यनंतरमासितद्दिनेवाकार्यं।अनुपपत्तिनिमित्तविघ्नेसत्युपपत्त्यनं
तरंसर्वाणिकार्याणि॥ प्रोषितमरणेमृताहाज्ञानेमृतमासपरिज्ञानेसतितन्मासदर्शोग्राह्यः।मृत
मासाज्ञानेमृताहपरिज्ञानेसतिमार्गशीर्षभाद्रपदमाघवामासितद्दिनेकार्यं।मरणमासदिनौनवि
ज्ञातौतत्प्रस्थानप्रवासदिनमासौपूर्ववद्ग्राह्यौ।प्रस्थानप्रवासदिनमासौनविज्ञातौतन्मरणवार्ताश्रव
णदिनमासौपूर्ववद्ग्राह्यौ।मरणस्यवार्ताश्रवणदिनमासौनविज्ञातौचेत्पुनर्दहनदिनमासौपू
र्ववद्ग्राह्यौ।यद्वासर्वैरपिकृष्णपक्षस्मरणाद्दर्शोग्राह्यः।शुक्लपक्षस्मरणेपौर्णमासः।सर्वात्मनामृता
हाज्ञानेमाघमासदर्शोग्राह्यः।अप्रोषितस्यापिसर्वात्मनामरणदिनमासाज्ञानेएवमेवग्राह्यः॥॥

युगादिमन्वादितिथिविशेषविहितश्राद्धेषु तु शुक्लपक्षे उदयव्यापिनी तिथिः। नक्षत्रादिनं वा ग्राह्यं। कृष्णपक्षेस्तमयव्या
पिनी ग्राह्या। शुक्लपक्षस्य पूर्वाह्णे करणं प्रसिद्धं। कृष्णपक्षस्यापराह्णकरणं प्रसिद्धं प्रशस्तं। नक्षत्रविहितश्राद्धेष
पि शुक्ले उदयव्यापिनक्षत्रादिने ग्राह्यं। कृष्णपक्षेस्तमयव्यापिनक्षत्रं ग्राह्यं॥ अथ संक्रांतिनिर्णयः॥ सं
क्रांतिषु सर्वत्रायनतः षोडशघटिकाः पुण्याः। अष्टाष्टघटिकासु दृष्टं फलमष्टफलमुच्यते। तत्र कर्कटकसं
क्रांतौ संक्रमे दक्षिणायनमुच्यते। तत्र पूर्वं त्रिंशद्घटिकाः स्नानदानश्राद्धादिषु पुण्याः। तथा विष्णुपदेषु पूर्वं
षोडशघटिकाः पुण्याः। वृषभवृश्चिककुंभसिंहसंक्रमाः विष्णुपदाः। तुलामेषौ विषुवसंज्ञौ तत्र पूर्वापरतः दश
घटिकाः पुण्याः। षडशीतिमुखेषु पश्चात् षोडशघटिकाः पुण्याः। मिथुनकन्याधनुर्मीनसंक्रमाः षडशीति
मुखाः। मकरसंक्रमे उत्तरायणं। उत्तरायणे पश्चाच्चतुर्विंशतिघटिकाः पुण्याः। पूर्वं चत्वारिंशद्घटिकाः पु
ण्याः प्राहुः। अर्द्धरात्रात्प्रागर्वाक् संक्रमणे सति पूर्वदिने पुण्यं। तत्र भोगः कार्यः। अर्द्धरात्रादूर्ध्वं संक्रमणे पर
दिने पुण्यं तत्र भोगः कार्यः। अर्द्धरात्रौ संक्रमणे तु दिनद्वयं महापुण्यं। तत्र भोगः कार्यः। यद्वा ग्रहणसंक्रांति
विवाहोत्क्रांतिवृद्धिषु रात्रावपि स्नानदानादिकं कार्यं। व्यतीपातादियोगः कुतपादिकालयोगी ग्राह्यः। वि
ष्ट्यादिकरणे तथैव॥ इति स्मृत्यर्थसारे श्राद्धकालनिर्णयः॥ ॥अथ पर्वनिर्णय उच्यते। पर्वणि ३६
संपूर्णे अन्वाधानं प्रतिपदि यागः। खंडपर्वणि विशेष उच्यते। पौर्णमासी न्यूनचंद्रा अनुमतिः पूर्णचंद्रा राकेति

द्विधा। अमावास्या दृष्टचंद्रा सिनीवाली नष्टचंद्रा कुहूरिति द्विधा प्रधानकर्म। तिथिरुत्तरतिथिवृद्धिह्रासयोरर्धं पूर्वति
थेः प्रक्षिप्य कालो विज्ञेयः। सूर्यस्यावर्तनात्पूर्वं आवर्तने वा पर्वप्रतिपत्संधौ सति तस्मिन्नहनि यागः। आवर्तनादू
र्ध्वं संधौ परेह्नि यागः। पर्वणश्चतुर्थांशः प्रतिपद आद्यास्त्रयोंशाः यागकालः। प्रातःकालोपयोगी। अप
राह्णे संधौ सति परेह्नि प्रतिपच्चतुर्थांशः यागकालः। न पूर्वाह्णे संधौ आत्राह्वो द्विधा विभागः पूर्वोक्त एव द्व
यसमानं। पौर्णमास्यां विशेषो वक्ष्यते। आवर्तनात्पूर्वं संधौ सति सद्यस्कालो न वा आवर्तनात्पूर्वं संगवादूर्ध्वं
पर्वसंधौ तु सद्यस्काल एव। सर्वापि पौर्णमासी यजनीया दिने पर्व पिवास सद्यस्का केके विदाहुः। प्रकृतौ सद्यस्का
लत्वं कदाचिदपि नास्ति। विकृतावेवेति केचित्। किंच पौर्णमास्यामयं विशेषः। अहस्त्वत्यंतदीर्घेषु तिथि
ह्रासे सति उदयसमीपपर्वांशचतुर्थांशाभावावपि पूर्वाह्णे पर्वसंधिश्च संभवति। तत्रैव पूर्वाह्णे संधिदिने या
गबाधो नान्यत्र तत्र परेह्नि यागः। अमावास्यायां तु अपराह्णादि पर्वसंधौ सति परेह्नि दृष्टचंद्रेपि यागः कार्यः।
पूर्वाह्णे संधौ सति प्रत्यक् चंद्रदर्शने हि यागे भूर्भुवः स्वः स्वाहेत्याज्याहुतिं हुत्वा विप्राय दंडदानं प्रायश्चित्तं।
प्राच्यां चंद्रदर्शने तदहर्याग एव तेत्तिरीयो काभ्युदितेष्टिः मनस्वत्याज्याहुतिर्वा व्याहृत्याज्याहुतिर्वा। प्रतीच्यां
चंद्रदर्शने अन्वाधाने सति परेह्नि इष्टिसमाप्त्यान्यत्र हविषेष्टिः कार्या। तत्राग्निः पथिकृदष्टाकपालः। इंद्रो
वृत्रहा एकादशकपालः। अग्निर्वैश्वानरो द्वादशकपालः। सशरं धनुर्दक्षिणा। एषा वाजसनेयोक्ता। प्रकृतिरेव

स्मृत्य०सा० वापुनः कार्या। मनस्वत्साज्या कृतिर्वाव्याहृतिर्वा दिनद्वये प्रातर्यागकाले सत्यपि पूर्वाह्नसंधिदिन एव प्रातर्यागः। स
३७ वैधात्संधिरेवयागोत्कर्षापकर्षप्रयोजको न्यतिथिवृद्धिह्रासो प्रयोजको। सप्तदशी तिथिरन्वाधाने निषिध्यते।
नयागे प्रारब्धप्रकृतीष्टिविकृतीष्टयः स्युः सद्यस्काला॥ आवर्तनात्पूर्वं संधौ प्रकृतिं समाप्य विकृतिः कार्या।
ऊर्ध्वं संधौ विकृतिं समाप्य प्रकृतेः प्रारंभः। आग्रयणं पर्वालाभे तु कृत्तिकादेवनक्षत्रे कार्यं। कृत्तिकादि विशाखां से
ते प्राच्यां चंद्रदर्शने पिंडपितृयज्ञकालः॥ इति पर्वनिर्णयः ॥ अथैकादशीनिर्णयः। एकादशीमुपवा
सः कार्यः। सवपुत्रवतां गृहीणां शुक्लैकादश्यामेवोपवासः। न कृष्णैकादश्यां। कृष्णैकादश्यामनशनमया
चितं नक्तमेकभक्तं दानं वा शक्त्या कार्यं। सर्वथा ननिर्द्वादशीको भवेत्। उपवासाशक्तश्चैवं कुर्यात्। पुत्ररहिता
नां गृहीणां यतिवानप्रस्थब्रह्मचारिस्नातकविधवानामुभयैकादश्यां नित्यमेव। यदुक्तं विष्णुसायुज्यं श्रियमा
युः प्रजां सुखं। एकादश्यां न भुंजीत पक्षयोरुभयोरपि। इति वैष्णवव्रतेनोपवसतां कृष्णा न निषिद्धा। एकाद
श्यां श्राद्धे कृते श्राद्धशेषमवघ्रायोपवसेत्। आदित्यवारसंक्रान्त्यादिषु एकादश्युपवासस्य निषेधो नास्ति।
महापत्सु महोत्सवेषु अशक्तौ स्वनत्याद्यं द्वादशीव्रते। तत्र नित्यं नैमित्तकाद्देवार्चनरहितोपवासं कुर्यात्। का
म्यं तु स्नात्वा पत्नीं पतिं पुत्रं भ्रातरं भगिनीं त्विजमन्यं वा ब्राह्मणादि कारयेत्। सूतकात्वांते दानं वा कुर्यात्। ३७
सपत्न्यो पि परस्परं कुर्युः। नान्यथा। अन्यव्रतेष्वेवं। एकादश्यां पूर्वोत्तरदिनयोरेकभक्तं। कांस्यं मांसं मसू

रमतिघृतमन्नं बहुलं पुनर्भोजनमैथुनं च पूर्वेद्युर्विवर्जयेत्। अथ समाहितः एकादश्यां प्रातःस्नात्वा संकल्पं कुर्यात्। पु
ण्यस्त्रीणां तु पुण्यालंकारवस्त्राणि गंधधूपदीपानुलेपनं। उपवासे निषिद्धं ति दंतधावनमंजनं। वाग्यमलोपे वैष्णव
मंत्रान् जपेत्। विष्णुं स्मरेद्वा। मनोवाक्कायनियमलोपे शारीरं कर्म तदित्यादि जपेत्। विष्णुं शुद्धः संपूज्य पुराणे जाग
रणं निद्रां वा कुर्यात्। श्वोभूते पुनः संपूज्य। अज्ञानतिमिरांधस्य व्रतेनानेन केशव। प्रसीद सुमुखो नाथ ज्ञान
दृष्टिप्रदो भवेति नत्वा पारणं कुर्यात्। कांस्यं मांसं क्षौद्रं लोभमसत्यं वा तिलपिष्टं व्यायामं अंजनं पुनर्भोजनं
अध्वगमनमायासं दिवानिद्रां मैथुनं च वर्जयेत्। उपवासफलं शक्तौ च हन्युः। यदा एकादशी शुद्धा संपूर्णा द्वा
दश्यां नास्ति द्वादशी तिथिः समा न्यूना वा अधिका वा तदा एकादश्यामुपवासः। यदा संपूर्णैकादशी द्वा
दश्यां वा कियन्मात्रास्ति द्वादशी त्रयोदश्यामस्ति तदा द्वितीयैव सर्वैरुपोष्या। यदा दशमीविद्धैकादशी द्वा
दश्यां न कियन्मात्रा विद्यते। द्वादशी त्रयोदश्यामस्ति वा न वा तदा सर्वैर्द्वितीयैवोपोष्या। यदा दशमीवि
द्धैकादशी द्वादश्यां वा कियन्मात्रा रात्रिशेषं त्रयोदशी तदा दिनक्षयेपि पुण्या द्वितीयैवोपोष्या यतिभिर्नगृ
हस्थैः। पुत्रार्थिभिश्च। गृहस्थैस्तु पूर्वैवोपोष्या। यदा च दशमीविद्धा एकादशी द्वादश्यां वर्ता रस्ति द्वादशी
त्रयोदश्यामस्ति तदा द्वादश्यैवोपोष्या। यदा च दशमीविद्धा एकादशी द्वादशी समा न्यूना वा तदात्य
तिरिक्ता दशमीविद्धैकादश्यामुपवासः। यतीनां तु शुद्धद्वादश्यामुपवासः। यदा च दशमी [illegible]द्धे

काद्शीरात्रिशेषेतुद्वादशीत्रयोदश्यांवास्तिसमान्यूनाधातद्वसर्वेषांदशमीविद्धैकादश्यामुपवासः। इदमेकादशीव्र
तंमाहेश्वरस्यापिभवति। लिंगादिपुराणदृष्टा। अष्टमीचतुर्दश्योश्चनक्तंचकार्यं। एकभक्तंवा। तत्तुसप्तमेत्रणसंकल्प्यपा
रणंचनाम्नावा तदेकादश्याव्रतंमाहेश्वरात्। सौरस्यापिभवति। सौरपुराणात्। नित्यंतुसर्वेषांसमानमेव। तत्रायंविशेषः
षष्ठ्यामुपवासश्चकार्यः। आदित्यवारेएकभक्तंवाकार्यं। सावित्र्यावानाम्नावा॥ इत्येकादशीनिर्णयः अथ
तिथ्यंतरनिर्णयउच्यते। एकादश्यष्टमीषष्ठीपौर्णमासीचतुर्दशी। अमावास्यातृतीयाच उपवासव्रतादिषु। परवि
द्धाःपुण्याः। शेषाःपूर्वविद्धाःकार्याः। कृष्णपक्षेष्टमीचतुर्दशीपूर्वविद्धाप्रशस्ता। तृतीयानवमीसप्तेके। सूर्यव्रत
दानादीनांकृष्णपक्षाच्छुक्लपक्षोविशिष्यते। अपराह्णाच्चपूर्वाह्णोविशिष्यते। तदसंभवेउदयद्विमुहूर्तेयाह्यं।
उपवासेघटिकेकापिग्राह्या। अ अद्धानाम्नलाभेतुपयोदधिघृतानितु। सकृद्वाल्पमश्नीयादुपवासस्त
तोभवेत्। एकादशीतुपंचमुहूर्तविद्धाप्युपोष्यैव। तदर्द्धविद्धान्यन्यानित्रिदिनानिनक्षत्रविहितव्रतेअर्द्धरा
त्रादर्वाक्नक्षत्रव्यापिनीतिथिर्ग्राह्या। तिथिनक्षत्रसंयोगविहितव्रतेप्रदोषव्यापिनीतिथिर्ग्राह्या। प्रदोषव्या
पिनीग्राह्यातिथिर्नक्तव्रतेसदा। उपवासस्थानीयनक्तंतु उपवासतिथौकार्यं। नक्षत्रसंयोगेनयातिथिःपु
ण्यातस्यांविहितेउपवासादिव्रतेसैवतिथिर्ग्राह्या। श्रवणद्वादशीव्रतेउदयव्यापिनीश्रवणद्वादशीग्राह्या ३८
॥ अथ एकादशीद्वादशीचरात्रिशेषत्रयोदशी। द्वादशाद्वादशींहंति त्रयोदश्यांतुपारणं। सर्वत्रतिथिन

क्षत्रांतेपारणं। नियमाःपूर्वमेवोक्ताः। संक्रांत्यांरविवारेग्रहणेव्यतीपातेकृष्णैकादश्यांपारणंसोपवासंचनकुर्यात्।
पुत्रवान्गृहीतितिथिसंक्रांत्यादिप्रयुक्तस्यायंनिषेधोनान्यप्रयुक्तस्य॥ इतितिथिनिर्णयःसमाप्तः अ
थमलमासेकार्याकार्यनिर्णयउच्यते। सूर्यसंक्रांतिरहितोमासोमलमासः। तत्रमलमासेअनन्यगतिकंकर्मा
करणेपातित्यापादकंचनित्यंनैमित्तिकंचकर्मकर्तव्यं। तत्रनित्यंस्नानसंध्योपासनाग्निकार्यपंचमहायज्ञाति
थिपरस्याग्निहोत्रोपासनदर्शपौर्णमासपार्वणेष्टिपार्वणस्थालीपाकपिंडपितृयज्ञामावास्यापार्वणश्राद्धमा
सिकश्राद्धदेवतार्चननित्यदानादिकंनित्यंमलमासेपिकार्यं। अनन्यगतिकंनित्यं। अन्यगतिकंसोमया
गपशुबंधनाग्रयणचातुर्मास्यादिकंमलमासेनकार्यं। महालयाष्टकाकर्मोपाकर्मोत्सर्जनश्रवणाकर्मा
श्वयुजीप्रत्यवरोहणाग्रयणयज्ञादिकंयत्कर्मऋतुमासप्रयुक्तयाविहितंतन्मलमासेनकार्यं। उत्तरेमासेकार्य
मेव। नैमित्तिकंचगर्भनिमित्तगर्भमासप्रयुक्तयाविहितंपुंसवनानवलोभनसीमंतजातकर्मादिकंतन्निमित्ता
नुदयिकंदानादिकंचंद्रसूर्यग्रहणेस्नानतर्पणश्राद्धादिकंत्रयोदशीश्राद्धंतीर्थस्नानादिजपतर्पण
श्राद्धपिंडदानानियवव्रीहितिलहोममरणाकाशौचदशादिकंदहनोदकपिंडदानादिनवश्राद्धंषोडशश्राद्धा
दिकंप्रेतत्वविमोकाद्यान्यन्यान्यपिसपिंडीकरणादीनिनैमित्तिकान्यनन्यगतिकत्वेनमलमासेप्राप्तेकार्याणि
। ततःसंवत्सरविमोकांतरमनुमासिकानिकुर्वन्मलमासेनेवकुर्यात्। उत्तरेमासेकुर्यादेव। संवत्सरांतेकुर्यात्

स्मृ०त्य०सा० सपिंडीकरणं संवत्सरविमोकं च यथाकालं मासिकानि कुर्वन्नपि मलमासे नैव कुर्यात्। इतरत्र कुर्यादेव। मलमास
३९ मृतानामाब्दिकं प्रत्याब्दिकं च श्राद्धं मलमासे न कार्यं किंतु तेषामुत्तरमास एव कार्यं। वार्द्धुषिके मृते साधिमासं
न वर्जयेत्। यैगं वार्द्धुषिके प्रेते नित्ये मृते अनुमासिके। आब्दिके च तथा श्राद्धे नाधिमासं विवर्जयेत्। तत्र वृषट्
कारहोमाग्नित्यनैमित्तिकप्रवृत्तकाम्यार्थाः। प्रायश्चित्तेष्टिस्थालीपाकहोमाद्याश्च मलमासेपि कार्याः। नै
मित्तिकयपि जातेष्टिर्मलमासे न कार्या। उत्तरे पर्वणि कार्या। आधानानंतरमन्वारंभणीयेष्टिं स्थालीपाकं च
मलमासे न कुर्यात्। काम्यं यागदानादिकं मलमासेपि न कार्यं। मलमासात्प्राक्प्रवृत्तं कर्म काम्यं मलमा
से आगते कार्यं। पुराणधान्याभावे न निर्वाहासंभवे मलमासेपि श्यामाकैराग्रयणमातुरः कृत्वा नवं भुक्त्वा
यथाकालं व्रीह्याग्रयणं कुर्यात्। वसंतपर्वणः प्रागेव सोमयागे न कृते श्यामेष्टिं पर्वैकमेव तत्र मलदूषितं वै
तत्र नित्योपि सोमयागो न कार्यः। तत्र लोप एव। पत्नीरजोदर्शनवत्॥ इति मलमासे कार्याकार्यनिर्ण
यः॥ अथ भक्ष्याभक्ष्यविधिरुच्यते। संस्कारदुष्टं क्रियादुष्टं स्वभावदुष्टं चेनाद्यात्। संस्कारदुष्टं वै
श्वदेवादिरहितं। क्रियादुष्टमेकपंक्तावन्यथालं। स्वभावदुष्टं लसुनादि। कलिंगवार्त्ताककुंभीकवृत्तालाबु
वन्यकंटकिकुसुंभरक्तशिग्रुकोविदारश्लेष्मातकनालिकाछत्रकश्वेतकंटकिवृंताकानि दुर्गंधिबद्धके ३९
दम्लफलादि सर्वं वर्ज्यं। यतिब्रह्मचारिणोः सर्वदा अलाबुशिग्रुवृंताकानि जातिमात्र वर्ज्यानि। अन्येषां श्रि

ष्टानि वर्ज्यानि। यथा वर्ज्यानि। शिरःकपालमांजालिनखचर्मशिलानि च। पादिच्छेदूर्ध्वगमनमभूम्यादिषु वर्जये
त्। स्वगोत्रभर्तुरन्नं कारुकान्नं वस्त्रेणापि पाणिनावधूतमवघ्रातमवक्षुतं तत्यादि प्रायश्चित्तविधौ विशेषं वक्ष्य
ते॥ इति भक्ष्याभक्ष्यविधिः ॥अथ भोजनविधिः। कृतसंकल्पः पादौ प्रक्षाल्य बहिर्द्विराचम्य प्राङ्मु
ख उदङ्मुखो वा यज्ञोपवीती सोत्तरवासा विभवे रत्नहिरण्यपाणिर्गंधाक्षतमाल्यवान्। शुचिप्रशस्तश्रीपर्णो
दिलक्षणे चतुष्पात्पीठे सुखासीनो भूमौ पादौ प्रतिष्ठाप्यांतर्जानुकरो वाग्यतः शुचिचतुरस्रे गोमयमंडले
सपर्यंते विप्रादीपसन्निधौ भुंजीत। त्रिकोणमंडले नृपः। वर्तुले वैश्यः। अभ्युक्षिते शूद्रो भुंजीत। तत्र मंड
के पाणिकार्यं त्रिकादौ शुद्धपात्रं निधाय प्रक्षाल्य पंचयज्ञावशिष्टं पूर्वं संस्कृतं हितं मितं घृताद्युपस्कृत्य
मातृभार्यादिदत्तमातिथ्यभ्यागतभृत्यपुत्रादिपरिवृत एकांते भुंजीत। तदन्नमकुत्सयन्नस्यं त्वर्तेनेति
प्रदक्षिणं परिषिच्य अमृतोपस्तरणमसीत्यपोशानं गृहीत्वा सर्वांगुलिभिः सर्वं ग्रासं ग्रसन्तर्जनीम
ध्यमांगुष्ठैः प्राणाया हुतिं। मध्यमानामिकांगुष्ठैरपाने च। अनामिकाकनिष्ठिकांगुष्ठैर्व्यानस्याहुतिं। क
निष्ठिकातर्जन्यंगुष्ठैरुदानेन। समाने सर्वांगुलिभिराहुतिः स्यात्। स्वाहांतं प्रणवादि च। पंचाहुतीः सघृ
ताः सक्षीरा वा हुत्वा वाक्पाणिपादचापल्यं वर्जयेत। कृत्स्नं ग्रासं सांगुष्ठं ग्रासयन्न। भुक्त्वा अमृतापिधा

स्मृत्य॰सा॰ ४० नमासिद्ध इति गंडूषमर्द्धं पीत्वा अर्द्धं भूमौ बहिः पाणिनिनीय पवित्रं विस्त्रस्य भूमौ पात्रे वा क्षिप्त्वा सम्यगुच्छिष्टं प्रक्षा
ल्य द्विराचमेत्। ततो हस्तौ सम्मृज्य परिस्राव्यांगुष्ठेन विप्रुषो निषिच्याक्षिणी स्पृष्ट्वाग्निमुपस्पृश्येष्टदेवतां स्म
रेत्। भोजनगृहे वासनस्थानान्नाचामेत्। नांजलिना पिबेन्नापि दत्तीर्थेन गोमयं भस्म चैवाश्वत्थपालाशाम
र्कधूतकं भिन्नकमयो बद्धं पीठं च वर्जयेत्। ताम्ररौप्यसौवर्णाश्मवर्ज्यं। भिन्नभाजनं वर्जयेत्। न शुष्कपा
णिपादो भुंजीत। तिष्ठन्गच्छन्प्रह्वः यन्न शयानो न शयने। न खट्वायां न शय्यायां न शयनस्थो नादिस्थो नस्थो
न तत्र भाजनं निधाय न जानुनि निधाय नोत्संगे वामपाणितले निधाय न भुंजीत। न परस्यतान्नमप्रदाय जामीजड
बालवृद्धातुरप्रेष्याः प्रदाय नाग्निविप्रेभ्यो प्रदाय न भार्यया सह चाश्नीयात्। विंबीबाहवर्ज्यं। नार्द्रवस्त्रो न
वस्त्रादिपर्यंकिकां कृत्वा न प्रौढपादो न विदिङ्मुखो न दुष्टपंक्तौ न शिशुभिः सह भुंजीत। जलतृणाग्नि
भस्मपथिस्तंभैः पंक्तिर्विभिद्यते। ग्रहणे नाश्नीयात्। नदाऽस्नात्वा न तर्पयित्वा श्राद्धदानादिकं कृत्वा मोक्षस्ना
नं कृत्वाश्नीयात्। सूर्यग्रहणे पूर्वं चतुर्यामं नाश्नीयात्। चंद्रग्रहणे त्रियामं। अमुक्तयोरस्तंगतयोर्दृष्ट्वा स्ना
य त्वा परे ह्यद्यात्। न संध्ययोर्नार्धरात्रे नाग्निपाकशून्यगृहे ना यज्ञोपवीती न वामहस्तेन शब्दं न च नवपा
न णिष्ठेषु न न केवलपाणि तले न वस्त्रे भुंजीत। नान्यसहासनो न यंत्रिकादौ यतिव्रतिब्रह्मचारी वि ४०
धवा भुंजीरन्। इत्यादि सर्वं विज्ञेयं॥ इति भोजनविधिः अथ कालेसायंसंध्यामुपास्य होमं वै

श्वदेवमतिथ्यार्चनं च कृत्वाभ्यस्त्यैः परिवृतोऽल्पधुः भुक्त्वा स्वपेत्। स्त्रियासह सुगंधानुलेपनमाल्यतांबूलादि सेवमा
नः स्वपेत्। न संध्यायां शून्यालये श्मशाने एकवृक्षे न चतुष्पथे शिवमातृकायक्षनागस्कंदभैरवाद्युग्रदेवगृहेषु
कूले वन स्वपेत्। धान्यगोदेवविप्राग्निगुरूणां चोपरि अशुचौ नाशुचि रार्द्रवस्त्रपादो नग्नो न स्वपेत्। प्राक्
शिरा दक्षिणाशिरा वाइष्टदेवतां नत्वा स्मरन् वैष्णवं दंडं शयनसमीपे निधाय स्वपेत्। प्रक्षालितपादः कृतरक्षश्च
प्रदोषापरयामौ विद्यया नयेत्॥ इतिस्मृत्यर्थसारे आह्निकं ॥ अथ द्रव्यशुद्धिरुच्यते। तत्र विण्मूत्रसृ
क्षरकवसामज्जासुरामद्यान्यत्यंतोपहतिकारणानि विड्वराहविडालादिपुरीषादीनि कर्णविण्नखश्लेष्मा
श्रुदूषिकास्वेदादीनि अल्पोपहतिकारणानि। तथा उच्छिष्टशूद्रास्पृतकीभिर्द्विजैरस्पृश्याकाकादिभिश्च
अस्पृश्यैश्च विड्वराहादिभिश्च पशुभिः स्पर्शनमल्पोपहतिरुच्यते। तथाल्पप्रदेशेऽल्पकाले मूत्रोच्छि
ष्टास्रगादिस्पर्शेनाल्पोपहतिः। पंचमाद्यंत्यजातिपंचचंडालादयः सूतिकाया रजस्वलायाः पतिता
श्च शवैश्च शवस्पृष्टास्तैः संस्पर्शे अत्यंतोपहतिर्भवति। अल्पकाले अल्पप्रदेशे मद्यसंस्पर्शने उच्छि
ष्टरुधिराद्यैश्च कांकवत्तोदोषेनात्यंतोपहतिर्भवति। सौवर्णराजतौ लोहे विण्मूत्रादिभिश्चंडालादि
स्पृष्टे मात्रे निर्लेपे जलप्रक्षालनाच्छुद्धिः। सलेपे भस्मजलाभ्यां शुद्ध्येत्। अत्यंतोपहतं वह्निना
तं जलप्रक्षालनाच्छुचि स्यात्। सौवर्णराजतौ ताम्रं च डालादक्या उच्छिष्टस्पृष्टं त्रिःसप्तभस्मभिराम्ले

स्मृ॰स॰सा॰ दकेन शुद्ध्येत्। कांस्यादेरावर्त्तनं। बहूपघाते सर्वेषामावर्त्तनमिव। तैजसानां गोमूत्रपरिवासेन लेपानपगमे न आ
५१ वर्त्तनं ताम्रस्य विण्मूत्रादिकिट्टचाण्डालादिदूषितस्याम्लोदकाभ्यां शुद्धिः। कांस्यपित्तलयोर्विण्मूत्रादिगंडूषप्रक्षा
लनचंडालादिस्पर्शे तदेव त्रिःसप्तकृत्वो भस्मना परिमार्ज्य प्रक्षालनाच्छुद्धिः। अल्पकालोपहतौ तापनप
रिलेखनाभ्यां शुद्धिः। बहुकालोपहतौ आवर्त्तनं। यद्वा भूमौ निखाय षण्मासे परिमार्जनमिव। तत्तदल्पम
त्वे स्यात्। एवं सर्वतैजसानामावर्त्तनं। पुनःकरणं परिलेखनं तक्षणं। कांस्यपित्तलयोर्गोश्वकाकोच्छिष्ट
शूद्रस्पर्शे दशभिर्भस्मभिः प्रक्षालनं। अल्पकालोपहतौ भस्मसलवणतैलावघर्षणैः शुद्धिः। बहु
कालत्वावर्त्तनं। त्रपुसीसायसानां भस्मजलाभ्यां शुद्धिः। सर्वतैजसस्वल्पोपहतौ गोमूत्रमृद्भस्माम्लो
दकैः शुद्धिर्यथार्हं कार्या। शुक्तिपाषाणशंखमणिरत्नानां अब्जानां विण्मूत्रादिचंडालाद्युच्छिष्टस्पर्श
नमात्रे जलप्रक्षालनाच्छुद्धिः। सौवर्णराजतताम्रशंखशुक्त्यश्मस्फाटिकादिरत्नेषु स्नेहेन दोषः। सले
पानां भस्मजलाभ्यां मृज्जलाभ्यां वा शुद्धिः अत्यंतोपहतानां सप्ताहं भूमौ निखाय प्रक्षालनाच्छुद्धिः
शृंगदंतास्थिमयानां अल्पोपहतौ बिल्वपलाशफलचूर्णैर्गौरसर्षपैर्मृद्भस्मगोमूत्रगोमयानां अ
न्यतरेण वा प्रक्षालनाच्छुद्धिः। अत्युपहतौ तक्षणं। अमेध्यरसवेधेत्युपहतौ त्यागः। दारुवेणुवेत्रपा ५१
त्राणां अल्पोपहतौ तक्षणं। अतिदुष्टानां त्यागः। कपित्थबिल्वालाबुनारिकेलफलानां तत्क

तपात्राणां अव्रणानां वाल्पोपहतौ प्रक्षाल्य गोपुच्छनिघर्षणाच्छुद्धिः। अत्युपहतौ त्यागः। शृंगास्थिदंतपा
त्राणां मंडूपानां करलानां वदुलभानामल्पोपहतानां तक्षणप्रक्षालनाच्छुद्धिः। मृन्मयानां पात्राणां ईषद्दु
ष्टानां पुनर्दहनाच्छुद्धिः। विण्मूत्राद्युपहतानां शवसूतिकोदक्यादिस्पृष्टानां त्याग एव। महाभाजनभांडेषु
बाह्यदोषं आंतरं न दुष्यति। तत्र बाह्यं प्रक्षाल्यं॥ स्रुक्स्रुवादिदारुपात्राणां जलप्रक्षालनाच्छुद्धिः।
सस्नेहानां यज्ञियानां उष्णजलप्रक्षालनाच्छुद्धिः। सर्वपात्राणां संहतानामेकस्योपहतौ तस्यैव शुद्धिः का
र्या। न तत्स्पृष्टानां। कंदफलमूलशाकादीनां अपक्वानां वेणुवेत्रवस्त्रकाष्ठानां वा दुष्टविस्पृष्टानां ज
लप्रक्षालनाच्छुद्धिः। वस्त्राणामेकपुरुषधार्यभाराधिकानां स्थूलानां बहूनामन्येषां बहूनां चंडाला
दिस्पृष्टानाम् अहतानां क्रीतानाम् अहतामूल्येन क्रीतानां प्रोक्षणाच्छुद्धिः। श्वेतसूक्ष्मवस्त्रेष्वपण्येषु अ
नूतनेषु विंशतौ बहुत्वं चित्रवस्त्रेष्वेकादशसु बहुत्वं। कुसुंभादिरंगरक्तेषु त्रिषु बहुत्वं। पण्येषु नूतने
षु च। ततोऽल्पानामपि बहुत्वं स्यात् स्मृतितोऽल्पतमे बहुत्वं। तदल्पानां प्रक्षालनाच्छुद्धिः। अधौता
नां मलिनानां अल्पानां बहूनां वैदिके कार्ये न वा नानाविस्थिरंगिणां प्रक्षालनं। आविकं कंबल
स्याल्पदोषे सूर्यरश्मिभिः शुद्धिः। विण्मूत्रादिदोषे वल्मीकमृत्तिकाप्रक्षालनाच्छुद्धिः। कौशेयव

स्वल्पदोषे प्रोक्षणाच्छुद्धिः। विण्मूत्राद्युपहतस्य तु मृज्जलप्रक्षालनाच्छुद्धिः। क्षौमवस्त्रस्याल्पदोषे प्रोक्ष
णाच्छुद्धिः। विण्मूत्राद्युपहतो बिल्वचूर्णप्रविघर्षणे गौरसर्षपजलप्रक्षालनाच्छुद्धिः॥ नीलीसंयुक्तवस्त्रं
स्वरूपेणैव तु वर्णेस्याज्यं। कंबले पट्टसूत्रे च नीलीदोषो न विद्यते। नेपाळे कंबळे अल्पोपहते प्रोक्षणं। वि
ण्मूत्रादिदोषे अरिष्टफलसंभवैः फेनैर्विघृष्य जलप्रक्षालनाच्छुद्धिः। तूलशय्योपधानानां कुसुंभादिरं
जितवस्त्राणां चाल्पोपहतो आतपे किंचिच्छोषणं। विण्मूत्रादिसंस्पृष्टोऽसंस्पृष्टान्संशोध्य संशोधणाच्छु
द्धिः। ऊर्णाकार्पासतूलकुसुंभकुंकुमकर्पूरादिनिर्यासानां चैवं। श्वेतवस्त्रं चंडालादिस्पृष्टं प्रक्षालना
च्छुद्धिः। तस्य पुरीषादिदोषे प्रक्षालनाच्छुद्धिः। शयनासनयानसंबंधानां संहतानां बहुरोमवस्त्राणां च
प्रोक्षणाच्छुद्धिः। तैलवच्चर्मणां शुद्धिः। नवानां तु जंबूवृक्षादितिक्तशुक्लकषायेण त्रिफलोदकेन
वा गंधक्षये शुद्धिः। चर्मभांडेषु बहिर्दोषे आंतरं न दुष्यति। तत्र बाह्यं सम्यक् प्रक्षाल्यं। धान्यमेकपुरुष
धार्यभाराधिकं वा चंडालादिस्पृष्टं प्रोक्षणाच्छुध्येत्। एकपुरुषभारोद्धारं प्रक्षालनाच्छुध्येत्। धा
न्यमशुद्धं मृत्तिकायुक्तं तंडुलीकरणाच्छुध्येत्। धान्यादिराशौ मूत्रादिलिप्ते लिप्तांशमपसार्य शिष्ट ४२
मभ्युक्षणाच्छुध्येत्। धान्यगृहे स्थितेसति गृहदाहेसति तत्र नरपशुमरणे तद्धान्यं त्याज्यमेव॥

भूगर्भस्थं कुसूलस्थं धान्यमभ्युक्षणाच्छुध्येत्। मुद्गमाषादीनां शिंबिकाधान्यानामल्पोपहतौ प्रोक्षणाच्छु
द्धिः। धान्यमशुद्धधूळीसंस्पृष्टं निस्तुषीकरणाच्छुध्येत्। अत्युपहतो त्याज्यं वा। दृढधान्येषु पुरुषभाराधि
केषु बहुशिथिलेषु द्रोणप्रमाणे बहुत्वं। तंडुलद्विदलादीनां तत्तदर्द्धं बहुत्वं। तस्य स्पर्शदोषे प्रोक्षणं। सर्व
त्र विण्मूत्रादिदोषे तावन्मात्रं त्यक्त्वा शेषं प्रोक्ष्यं। शिथिलं तंडुलादि सर्वत्र प्रोक्ष्यमेव। पुरुषाशनान्न्यूनं त्या
ज्यमेव। मृच्चर्मतृणकाष्ठादीनां नरभाराधिकमल्पोपहतौ वातातपाच्छुध्येत्। नरभारान्न्यूनमात्रं प्रक्षा
लनाच्छुध्येत्। शुष्कं चेदत्यल्पमपि प्रोक्ष्यमेव। मूत्रादिभिरत्युपहतो त्याज्यमेव। पुस्तकं चंडालस्पृष्टं प्रो
क्षेत्। भूतळं केशकीटतुषास्थिभिर्मलिनं मार्जनाच्छुध्येत्। भूतळं श्वखरोष्ट्रविड्वराहादिसेवितं गोक्रमण
मार्जनाभ्युक्षणाच्छुध्येत्। भूतळं विण्मूत्रादिरत्यंतोपहतं चेदुल्लेखनगोनिवाससंमार्जनादभ्युक्ष
णाच्छुध्येत्। भूतळं नारीप्रसवदूषितं चंडालादिनिवासदूषितं चिरकालं विण्मूत्रादिदूषितं चिरका
लं श्वखरोष्ट्रविड्वराहादिदूषितं तत्स्थानमृत्तिकामुद्धृत्यान्यां मृत्तिकामापूर्य गवाक्रमणमार्जन
प्रोक्षणैः शुध्येत्। एतदेवमत्यंतोपहतं चेत् वाल्वात्तृणाग्निनादग्ध्वान्यमृत्तिकापूरणगवाक्रमणमार्ज
नप्रोक्षणैः शुध्येत्। गृहस्याशुचित्वे कुड्यानां लेपनं भूमेः परिलेखनं मार्जनं च कार्यं। भूतळस्य चिरका

स्मृत्य·सा· ळेविण्मूत्रादिवासितस्य श्मशानत्वं गतस्यापिदृष्टि प्रक्षाळनात्पश्चात्पूर्वोक्तविधिना शुद्धिः। आमामक्षेत्रेश्म
४३ शानत्वं गते विण्मूत्राद्येश्चिरकाळमत्यंतदूषिते वृष्टिरूर्ध्वं हलाकर्षाच्छुद्धिः। गृहे विप्रक्षत्रियविशां मरणे तत्र
स्थम्हन्मयं पूर्णभांडं पक्वमन्नं सेत्यजेत्। मृतदेशं गोमयेनोपलिप्य अजाघ्राते गवाक्रांते ब्राह्मणपुण्याह
वाचनैर्वा कुशाग्रसुवर्णोदकैः प्रोक्षणाच्छुद्धिः। गृहे कचिद्राजनिगडबंधनान्मृतो भूमिं कुद्दालं च प्रोक्ष्य तृणा
ग्निना ताप्य। सूर्यरश्मिप्रचाराद्वा प्रागुक्तविधिना शुद्धिः। गृहे जनने मरणे वा जाते आशौचांते दूर्ध्वमध्यभू
मिम्हत्तिकाप्रक्षेपात्पुण्याहवाचनाच्छुद्धिः। विप्रगृहे शूद्रादिमरणे गृहस्य दशाहमाशौचं। असद्भू
द्रमरणे मासमाशौचं। चंडाळपतितादिमरणे चतुर्मासमाशौचं। रजकादिमरणे द्विमासमाशौचं। स
र्वत्राशौचांते अमेध्यभूमिवच्छुद्धिः कार्या। विप्रगृहे दग्धे श्वमार्जारादिमृते सति तद्गृहस्य कर्षणप्रो
क्षणाच्छुद्धिः। श्वकाकादौ स्पृष्टे नैवं। कर्षणे विशेषः। प्रतिमा लोहजा अल्पोपहति दूषिता भस्मना
घर्षणात्पंचगव्येन शुद्ध्यति। प्रतिमा पाषाणजाल्पोपहति दूषिता चेद्वल्मीकम्हत्तिकाजलैः प्रक्षा
लिता पंचगव्येन शुद्ध्येत्। प्रतिमा विण्मूत्रग्राम्यरसादिनातिदूषिता चेत् पंचगव्यैः पंचाहमधिवास्यो ४३
त्स्नाप्य गोमूत्रगोमयवल्मीकम्हत्तिकाभिः सम्यक्प्रक्षाल्य पुनःप्रतिष्ठया शुद्ध्येत्। रत्नजानां पंचगव्यैः

प्रक्षाल्य पुनःप्रक्षाळनं कुर्यात्। जलं भूमिस्थं गंधवर्णरसान्वितं विण्मूत्रादिदूषितं त्रिगवांपानसमर्थं शुद्धं।
ततोल्पं श्वकाकाद्युपहतं एकगोपानसमर्थं तत्थैव शुद्धं। जलं शुद्धभांडाहृतं तस्मिन्नेवादिने शुद्धं। तेनान्यदि
ने नुष्ठानं न कुर्यात्। चूहद्भांडगतं चतुर्द्रोणाधिकं विण्मूत्रादिदूषितं जलं परित्यज्य भांडं प्रक्षाल्य कुशसंघ
र्षणात्पुनःप्रक्षाल्य पंचगव्येन प्रोक्ष्य पुनर्जलपूरणाच्छुद्ध्येत्॥ वापीकूपतडागादिषु अल्पजलेषु श्वमार्जा
रादिशवे क्लिन्ने जीर्णे सति तज्जलं सर्वमुद्धृत्य म्हत्तिकां तारेत जलं प्रत्यक्षो। द्वत्पंचगव्येन प्रोक्षणाच्छुद्ध्येत्।
पाषाणेष्टिकादिभिर्बद्धो वा तत्क्षणस्थाने दहनं। दारुबद्धे प्रक्षाळनमेव। बहुजले षष्टिकुंभोद्धारः। मूष
कादिक्षुद्रप्राणिघाते त्रिंशत्कुंभोद्धारः। गोमूत्रादिप्रक्षेपश्च। जले जलप्राणिशवे न दोषः। वापीकूपज
ले नरशवे स्थिते घटशतं जलमुद्धृत्य पंचगव्यप्रक्षेपाच्छुद्धिः। पशुशवपाते षष्ट्याशुद्धिः। कूपादिजले
अशुद्धरजसा तत्र जले नरमरणात् जलस्य त्रिरात्रमाशौचं। आशौचांते पूर्वोक्तविधिः कार्यः। वापीकू
पजले उपानत्शुष्कास्थिविण्मूत्रकवसामज्जास्थिदूषिते षष्टिकुंभोद्धाराच्छुद्धिः। जलबाहुल्ये शतकुंभो
द्धारात्पंचगव्यप्रोक्षणाच्छुद्धिः। कूपादिजले अशुद्धरजसा दूषिते दिवा सूर्यरश्मिवायुस्पर्शाच्छुद्धिः
रात्रौ दृष्ट्वा पुनः नक्षत्रचंद्ररश्मिस्पर्शाच्छुद्धिः। संध्यायां वायुस्पर्शाच्छुद्धिः। नदीस्रोतस्तडागजले अं
त्यजे दूषिते तत्सचीकृत तज्जलस्थाना दन्यत्र जलं शुद्धमेवाशौचाने पाणितळेमाने कुडवे प्रस्थमाढकादि

एवं खारिका ३ इति पूर्वपूर्वं चतुर्गुणं। द्रोणप्रमाणश्च निर्मितधान्यान्ने गवाघ्राते सति खरेण वाश्चुना वा विड्वरा
हेण वा ग्रामकुक्कुटकाकैर्वा स्पृष्टे स्पृष्टमात्रमुद्धृत्य शेषमन्नं पर्यग्निकृत्वा सहस्रगायत्र्याभिमंत्रितैर्जलैः
पवमानः सुवर्जन इत्यनुवाकेन सकृदभिमंत्रितैर्वा। शुद्धवतीभिर्ऋग्भिर्वा शुचिलिंगैर्मंत्रैर्वा जले स्पृ
श्य एतत्शुद्धमस्त्विति पवित्रवचनेन लब्धं शुद्ध्येत्। अजामुखेनाघ्रातं शुद्ध्येत्। तदन्ने काकादिलील याव
षितं तावन्मात्रं समुद्धृत्य शेषं कनकवारिणा रौप्यवारिणा वाभ्युक्ष्याल्मुकेन स्पर्शयित्वा साज्य करे स्प
र्शं शुद्ध्येत्। अन्नं पूर्वोक्तं विण्मूत्रखररोमादिदुष्टे दुष्टमात्रमुद्धृत्य पूर्ववन्मंत्रितोदकेनाभ्युक्ष्य भस्म
क्षिप्त्वा घृतेनाभिघार्य शुद्धमस्त्विति विप्रवचनाच्छुद्ध्येत्। घृतस्य नवनीतस्य वा आढकप्रमाणस्य
श्वकाकपिपीलिकादिदुष्टस्य दुष्टांशमुद्धृत्य वस्त्रेण परिशोध्य तज्जातीयेन तद्भांडं पूरयित्वा
सर्वमग्नौ प्रताप्य गायत्र्याभिमंत्रितजलात्[illegible] शुद्धिः। तत्र तैलक्षीरदध्नां द्रोणप्रमाणानां काकादु
पहतो घृतवच्छुद्धिः। तक्रदधिक्षीराणि × स्पृक्षणा × शूद्रभांडस्थानि द्विजभांडप्रक्षेपे शुद्धानि। नव
नीतं घृतं तैलं क्षौद्रं दास्यादिभांडस्थं गृहीत्वा स्वभांडे स्थितं शुद्ध्येत्। नवनीतं घृतं क्षौद्रं चांडालादिभांडस्थं
चेद्द्विजभांडे स्थितं बद्धं शुद्ध्येत्। नवनीतं घृतं चांडालेन प्रमादेन स्पृष्टं जले प्रक्षिप्य घृतं शुद्ध्येत्। द्रोण ४४
प्रमाणात्। न्यूनप्रमाणधान्यनिर्मितानामाढकप्रमाणान्यूनघृतादीनां द्रोणान्यूनतक्रादीनां सर्वो

क्तोपहतौ परित्यागो नापदि। आपदि तु पूर्वोक्तविधिभिः शुद्धिः। अतिक्षामे चतुःपुरुषाशनसमर्थे व्यंज
नप्लावने शुद्धिः। अल्पानां त्यागः। गुडलवणादीनां पर्यग्निकरणं। भोजने केशकीटादिदर्शने तावन्मा
त्रमुद्धृत्य जलं भस्म मृदं वा क्षिप्त्वा शुद्ध्येत्। मुखे दृष्टा निष्ठीव्य जलं प्राश्य निष्ठीव्य घृतं प्राश्याश्नीया
त्। पाके गव्ये शुनो मुखं प्रश्नावनवत्। पक्षिमुखं वा पणद्रव्यं वसदा शुद्धमेव। बालः उपनयनादर्वाक् शु
द्ध एव। स्त्री विवाहादर्वाक् शुद्धैव। मूकमशकपतंगमक्षिकाधान्यस्था धान्यकीटा गोहस्त्यश्वछाया गा
शुकाश्च जलस्थाः सर्वजीवाश्च स्वभावतः शुद्धाः। अशुद्धसंस्पर्शी ने च न दुष्यति। चंद्रसूर्यरश्मयश्च स्व
तः शुद्धाः। सूतिकोदक्याम्लेच्छपतितांत्यजश्मशानसंश्रयं विना ग्निः स्वभावतः शुद्धः। रजो वातो
द्धृतं शुद्धं। हस्त्यश्वरथजातं गवां पादरजश्च प्रशस्तं। श्वविड्वराहखरोष्ट्राजाविककाकोलूकग्रा
म्यपक्षिवस्त्रमार्जनीसमुद्धृतरजस्पृष्टं देवश्रीकरमनायुष्यकरमपुण्यं च। अज्ञातदोषं च द्रव्यं त
त्वत एव शुद्धं। संदिग्धदोषं च द्रव्यं तद्विप्रवाक्येन शुद्धं। शूर्पजातवायुस्पर्शमनायुष्यमपुण्यं च। व
स्त्रकं घटोदकं नित्यं। पशुपक्षिधूलिवातस्पर्शनमनायुष्यमपुण्यं चेत्यादि सर्वं मश्रीकरं च। मुखजा
विप्रुषा मध्या मसृष्टाः नमाबिंदवः। श्मश्रु चास्यगतं शुद्धं दंतमध्यगतं त्यजेत्। विगिरेद्वामा वामे रनुष्ठा

स्मृत्य॰सा॰ नेनसेन्नेव। तांबूले वक्षितेत्यके निगीर्णे वानुतिष्ठतः। नावमेनन्त्यजेडृदंत्यसूतिकादिप्रदर्शने गावस्तरट
४५ ष्ठतोमेध्या अमेध्यानरजामलाः। पंथानश्च विशुध्यंति सोमसूर्यांशुमारुतैः। मार्गकर्दमतोयानि स्पृ
ष्टान्यस्पृश्यवायसैः। मारुतेनैव शुध्यंति पक्वेष्टकचितानि च। शुद्धाश्वसं तता धाराः शुद्धमेव वहज्जलं
। वाकुशस्तमुंबुनिर्णिक्तमज्ञातं वसदाशुचि॥ इति द्रव्यशुद्धिप्रकरणं ॥अथ शरीरशुद्धिः
अमेध्याक्तस्य मृत्तोयैर्गंधलेपापनोदनाच्छुद्धिः। चंडालं पतितं चैव दूरतः परिवर्जयेत्। सूतिकोदक्या
चत्वारस्त्य विषये वर्ज्यैव। असंकटस्थाने चंडालसूतिकोदक्या पतितानां चक्रमात्। चतुस्त्रिद्व्येकयुगां
तरे संधाने सचैलं स्नानं। संकटे गोवाळव्यजना दर्वीकृता रतम्य नसंधाने सचैलं स्नानं कार्यं। श्व
पाकादिच्छायारोहणे तथैव। चंडालसूतिकोदक्या पतितानां मत्यास्पर्शने सचैलं स्नात्वा द्विंगमं
त्रं गायत्रीं वाष्टशतं पादोनमर्द्धपादं च क्रमाज्जपेत्। अत्र च स्वत्रातारित संस्पर्शः साक्षात्स्पर्श एव
चंडालादिस्पृष्टस्पृष्टस्य तृतीयस्य सचैलं स्नानं। तदर्द्धं जपः सर्वत्र। मत्यास्पर्शने चतुर्थे स्नानमा
त्रं। चंडालसूतिकोदक्यापतितानाम मत्यास्पर्शने सचैलं स्नात्वा चतुःपंचाशज्जपः। ×स्य× तत्या
दोनमर्द्धपादं च क्रमात्कुर्यात्। अमत्या चंडालादिस्पृष्टस्पृष्टस्य च सचैलं स्नानं तदर्धं जपः। सर्वत्र ४५
चतुर्थस्याचमनं। रजस्वलादिविषये द्वितीयादिदिने स्नानं पूर्वपादपादोनं जपं प्राहुः। तत्स्पृष्ट

स्पृष्टादिषु स्नात्वा तदर्द्धं जपः। अचेतनेन दंडादिना चंडालादिस्पर्शे स्नानमात्रं। तृतीयस्याचमनं। द्रव्या
णां प्रोक्षणं। मत्या रजकादिस्पर्शने स्नात्वा दशजपं कुर्यात्। मत्या तत्स्पृष्टस्पर्शने सचैलं स्नानं। अमत्या र
जकादिस्पर्शने सचैलं स्नानं। एवं तत्स्पृष्टस्पर्शने सचैलं स्नानं मात्रमेव। तृतीयस्य ज्योतिर्दर्शनं। मत्या
पंचमजातिस्पर्शने सचैलं स्नानं। सच्छूद्रस्य स्पर्शने स्नानमात्रं। निषादस्य स्पर्शने स्नात्वाचमनं कार्यं।
शवाशौच प्रेतधूमदेवद्रव्योपजीवि ग्रामयाजक सोमविक्रयि यूपचितिचितिकाष्ठ श्मशानार्त्तवमद्य भां
डस्त्रीहस्मानुषास्थीनि स्पृष्ट्वा सचैलं स्नात्वा गायत्र्यष्टशतं जप्त्वा घृतं प्राश्य पुनः स्नात्वा त्रिराचमेत्॥
अस्नेहे स्नानमात्रं। अमत्या स्नानमेव। सर्वस्त्रीत्रेणां जपहोमस्थाने अन्नधान्योदकुंभादिदानं का
र्यं। वेदबाह्य शैव शाक्तेय पाशुपत लोकायतिक नास्तिक देवलक विकर्मस्थ द्विजान्। आरूढपतितं वि
स्फोटाग्निमसिशस्त्रं षंढं शठं शववाहकं दाहकं शवं स्पृष्ट्वा सचैलं स्नायात्। अमत्या स्नानमात्रमेव।
अजीर्णे सुप्ते अभ्युदिते ऽस्तमिते रिक्ते दुःस्वप्ने दुर्जनस्पर्शे क्षुरकर्मणि भुक्त्वा मुहूर्तेमुषारि छर्दिते
च स्नानं। अनृतौ मैथुने च सम्यक् शौचाचमनं। ऋतौ मैथुने स्नानं। दिवा मैथुने ष्टम्यां चतुर्दश्यां पर्वणि
मैथुने च सचैलं स्नानं। स्मृतिप्रायश्चित्तं च कार्यं। मूत्रपुरीषादौ शौचमकृत्वा यामहूयाद्धुकाकस्थि
तो सचैलं स्नात्वा व्याहृतिहोमाञ्जपो वा कार्यः। उदयास्तमययोरेतस्कंदित्वा सचैलं स्नात्वा पुनर्मनद

स्मृत्य॰ सा॰ ४८

तिजपित्वा सप्तव्याहृतिभिराज्याहुतिर्जुहुयात्। जपेद्वा। अमत्यासवेलं स्नानमेव। अक्षिस्यंदनेकर्ण
कोशेसचेलंस्नानं। श्वजंबुकगर्दभादिक्रव्यादखरोष्ट्रविड्वराहमेषवारनस्पर्शनेना भेरूर्ध्वंकरौ मुक्ताससैलं
स्नानं। नाभेरधःस्पर्शेस्नानमात्रं। रात्रौ चेन्नाभेरूर्ध्वं स्नानमात्रं। नाभेरधस्पर्शेतुप्रक्षाल्या वज्ञाल्य
पुनराचम्यशुद्ध्येत्। काकोलूकभासघूककपोतग्रामकुक्कुटादिक्रव्यादपक्षिस्पर्शेना भेरूर्ध्वंकरौमुक्ता
सचेलंस्नानं। नाभेरधस्पर्शेतुस्नानं। रात्रौ चेन्नाभेरूर्ध्वेस्नानं। नाभेरधःप्रक्षालनं॥ रथ्याकर्द
मतोयष्ठीवनाद्यैर्नाभेरूर्ध्वंस्पृष्टः सद्यः स्नायात्। नाभेरधःप्रक्षालनं। अमेध्येषुतुसतीयपरकीय
विण्मूत्ररक्तरेतोर्त्तवास्थिमज्जावसाद्यैर्मलैः सुरामद्यैश्चनाभेरधः प्रबाहुषुवुस्पृष्टोम्लज्जलैर्गंधले
पंप्रक्षाल्यस्नानं। नाभेरूर्ध्वंस्पर्शेनुस्नात्वोपवासः। इंद्रियेषु दुष्टेषुवस्पर्शेनिस्नात्वोपोष्यपंचग
व्यंपिबेत्। स्वकीयमलस्पर्शेनितुनाभेरूर्ध्वमपिक्षालनमेव॥ सस्नेहद्विजास्थिस्पर्शेनेविप्रस्य
सचेलंस्नानंनिस्नेहेस्नानमात्रं। चिरंतनेवावम्यगांस्पृष्ट्वा सूर्यंदृष्ट्वाशुद्ध्येत्। अज्ञास्थिसस्नेहे
त्रिरात्रंनिस्नेहेत्वेकरात्रं॥ अमानुषेषुभक्ष्यवर्जेपंचनखभक्ष्यदंतास्थिसस्नेहेस्नानंवस्त्रांतरधा
रणंच। वृष्टौसकर्दमायामसंकटप्रवेशे जंघयोस्तिस्रोमृत्तिकाः। पादयोषट्मृत्तिकाः। क्षिप्त्वाप्र ४८
क्षालनं। वायुशुष्केकर्दमादौनदोषः। श्वपाकादिच्छायारोहणेसचेलंस्नात्वाघृतंवाहिरण्योदकं

(२)

पिबेत्। श्वपाकादिस्पर्शेनसचेलंस्नानोष्टसहस्रजपः। मत्याषडुपवासश्च। तत्स्पृष्टादितारतम्येनयोज्यंकल्प्यं
दिवारजःस्रवेजननेमरणेपातद्दिनादिकमशुचित्वंस्यात्। रात्रौरजस्रावादौसतिअर्धरात्रादर्वाक्चेत्पूर्वदिन
मित्येकःपक्षः। रात्रिंत्रिधाविभज्यपूर्वभागद्वयेचेत्पूर्वदिनमित्यपरःपक्षः। उदयात्पूर्वंचेत्पूर्वदिनमित्यप
रःपक्षः। एतेषांपक्षाणांदेशकालतोव्यवस्था। अज्ञातेरजस्रावेचतुर्थदिनेषुज्ञातेरजस्रावादिकमशु
चित्वंस्यात्। जननादौज्ञानादिकमशुचित्वंसर्वथा अज्ञातेचेच्छुचित्वमेव। अतोज्ञानात्पूर्वंरजस्वलास्पृष्टं
दुष्टमेव। एवंसर्वपापनिमित्तंस्वसत्तांपापोपपादकंसूतकंतुज्ञानादिकमेव। रजस्वला त्रिरात्रमशुचिःस्या
त्। चतुर्थेहनिस्नाताशुद्ध्येत्। भर्तुस्पृश्यास्यात्। दैवपित्र्येनकार्यंपंचमेहनिशुद्धागृहकार्येरजोनिवृत्तौ
शुद्धा। सूतिकाआशौचांतेमलंप्रक्षाल्यदंतान्धावयित्वासचेलंस्नायात्। रजस्वलाचतुर्थेद्विषष्टिमृत्ति
काभिःशौचंकृत्वाक्षत्रादिस्त्रीनपादपादन्यूनमृत्तिकाभिःशौचंकृत्वामलंप्रक्षाल्यदंतधावनपूर्वकंसंगवे
सचेलंस्नायात्। रजस्वलायाःस्नातायाःस्नातायाःपुनरपिरजोदृष्टौअष्टादशदिनादर्वाक्अशुचित्वं
नास्ति। अष्टादशादिनेरजोदृष्टौएकरात्रमशुचित्वं नवदशदिनेद्विरात्रंविंशतिदिनेत्रिरात्रमेव। प्रायशो
विंशतिदिनादूर्ध्वंरजस्राविणीनामभवति। विंशतिदिनादर्वाक्प्रायशोरजोदर्शनवतीनामष्टादशादि
नेपित्रिरात्रमशुचित्वं। किंत्वत्रयादशदिनादूर्ध्वंप्रायशोरजस्राविणीनामेकादशादिनादर्वागशुचित्वंनास्ति।

स्मृत्य॰ सा॰ ४७

एकादशदिनेरजोदृष्टावेकरात्रिमशुचित्वं। द्वादशेऽह्नि त्र्यहं।। त्र्योदशादिषु त्रिरात्रमित्यादिज्ञेयं। सचैलस्नानमुक्त्वा
वस्त्रं प्रक्षाल्य स्नात्वा पुनः सचैलस्नानं। एकत्रस्थस्पृष्टश्चेत्तथास्नातोऽपि सचैलं स्नात एव। संग्रामे हट्टमार्गे
यात्रादेवगृहेषु च। उत्सवक्रतुतीर्थेषु स्पृष्टास्पृष्टिर्न दुष्यति। विष्णुवेष्णवाम्बुशय्योः। महाजलसमीपेषु महा
जनरवेषु च। अग्न्युत्पाते महापत्सु स्पृष्टास्पृष्टिर्न दुष्यति। प्राप्यकारीन्द्रियं स्पृष्टमस्पृष्टिरितरेन्द्रियं। तयोश्च
विषयः प्राक्तः स्पृष्टास्पृष्टाभिधानतः।। इति स्पृष्टास्पृष्टिशुद्धिः समाप्ता ।।अथाशौचविधिः
चतुर्मासाभ्यंतरे गर्भमात्रनाशः स्राव उच्यते। तत्र स्रावे आद्ये मासत्रये मातुस्त्रिरात्रमाशौचं। उपरिमातुर्ग
र्भमाससंख्यया समदिनमाशौचं। सगोत्रसपिंडानां स्नानेन सद्यः शुद्धिः। यतः प्रभृति संतानविश्लेषः
सकूटस्थः। तमारभ्य गणिताः सप्तपुरुषाः सपिंडाः। अत ऊर्ध्वं समानोदकाः। पंचमषष्ठयोर्गर्भमात्रनाशः
पात इत्युच्यते। पाते मातुर्गर्भमाससंख्यासमदिनमाशौचं। सपिंडानां [illegible] दं गर्भमासप्रयुक्ताशौ
चं सर्ववर्णसमानं। सप्तममासप्रभृति पूर्णगर्भनिर्गमात्प्रसव इत्युच्यते। प्रसवजनननिमित्ताशौचं
सपिंडानां पूर्णदशाहादिकं सर्वेषां यथावर्णं भवति सोदकानां त्रिरात्रं। जनननिमित्तास्पृश्यत्वं मातु
रेवयावद्दशाशौचं। न पितुः। तस्य स्नानानंतरं स्पृश्यत्वं मातुश्चैव सपिंडानामस्पृश्यत्वं सर्वदानास्त्ये
व। सूतिकास्ववर्णाशौचे निगतेस्वव्यवहार्यैव। अष्टाद्यर्थेषु तु कर्मसु पुत्रप्रसूर्विंशतिरात्रेणयो ४७

ग्या। स्त्रीप्रसूर्मासेनयोग्या। पुत्रजननदिवसे हिरण्यभूगवाश्वाजवासः शय्यागृहादिकं सर्वं प्रतिग्राह्यं।
कृतान्नं वर्ज्यं। कृतान्नग्रहणे चांद्रायणं कार्यं। पुत्रजन्मदिवसे दानं कुर्यात्। हिरण्याद्यभावे संकल्प्यप
श्चाद्दद्यात्। प्रथमदिवसे हिरण्यादिदानं। षष्ठे सप्तमे वा बलिदानं। दशमे दिने अन्नदानमित्यादि यथा
चारं कुर्यात्। सूतिकागृहे रक्षा च कार्या रात्रौ विशेषेण।। जन्माशौचमध्ये तच्छिशुमरणे तूच्यते। नाभिच्छे
दनादूर्ध्वं शिशुमरणे निःप्राणशिशुगमने च जनननिमित्तमाशौचं कृत्स्नं यथावर्णं सर्वेषां सपिंडानाम
स्त्येव। मरणनिमित्तं सद्यः शुद्धिः। मातुर्जनन [illegible] निमित्ताशौचं कृत्स्नं यथावर्णमस्ति। मरणनिमित्तं सद्यः
शुद्धिः। नामकरणात्पूर्वं शिशुमरणे निखननमेव। मातुरनुगमनं नास्त्युदकादिकं च। ज्ञातीनां सचैल
स्नानात्सद्यः शुद्धिः। ततो दंतजननात्पूर्वं निखननं तूष्णीं दहनोदकादिदानं वा कार्यं। अनुगमनं कृताकृ
तं। खननपक्षे सद्यः शुद्धिः। दहने त्वेकाहं। खननं च शवमलं प्रक्षाल्य घृतेनाभ्यज्य संस्नाप्य नववा
स्त्रेषु गंधमाल्यानुलेपनाद्यैः शवं यथालंकृत्य ग्रामाद्बहिः शुचौदेशे कार्यं। दहनं चैवं तथा संस्नाप्या
लंकृत्य बांधवा अपत्यपूर्वाः श्मशानं नीत्वा लौकिकाग्निना तूष्णीं कुर्युः। तूष्णीमुदकादिदानं च। दहनेऽप्य
मध्यं डालसूतिकापतितचिताग्निवर्जयेत्।। दंतजननादूर्ध्वं त्रिवर्षपर्यंतमकृतचौलस्य मरणे
खननं। दहनं वा कार्यं। खनने त्वेकाहमाशौचं। दहने त्रिरात्रं। अत्र कृतचूडस्य द्विवर्षातं मातुरनुगमनं कृताकृतं।

संस्ल.सा. पश्चान्नित्यं। दंताजननादूर्ध्वं त्रिवर्षपर्यंतं चौलाकरणे तूष्णीं दहनं तूष्णीमुदकादिदानं त्रिरात्रमाशौचं नि
यतमेव कार्यं। त्रिवर्षात्परं कृतचौला कृतचौलस्यापि मरणे यावदुपनयनं तावदनुगमनं तूष्णीं दहनोदकादि
४८ दानं त्रिरात्रमाशौचानि नियतानि कर्माणि। अनुपनीतमरणे मातापित्रोर्दशाहाशौचपक्षो नादृतः।
अनुपनीतमृताशौचे चूर्णास्वाशौचकालत्रिभागादूर्ध्वं स्पृश्याः। अनुपनीतमरणे श्रुते ऽतीताशौचं
नास्ति। स्नानमेव कार्यं। इदं वयः प्रयुक्ताशौचं सर्ववर्णसमानं। आशौचांते स्नात्वा स्वस्तिवाचनपूर्वं ब्रा
ह्मणान्भोजयित्वा स्वस्तिवाचनं कार्यं। स्त्रीमरणे त्रिपुरुषविषयं ज्ञातीनामा चौलकालाद्वा स्नानेन सद्यः
शुद्धिः। स्त्रीषु सापिंड्यं त्रिपुरुषमेव प्रत्तासु। ततो वाग्दानादर्वागेकाहमाशौचं। ततो विवाहादर्वाक्पति
पक्षे च त्रिपुरुषपर्यंतं त्रिरात्रं। वाग्दानाभावे विवाहनिश्चयावधिरित्येके। अत्र पुनर्द्विवर्षे निखननं प
श्चाद्दहनं पुरुषवद्वा। अस्पृश्यत्वादि सर्वं पूर्ववत्। उपनयनादूर्ध्वं पुरुषमरणे विवाहितस्त्रीमरणे
शूद्रमरणे च यथाविधि दग्ध्वा उदकं पिंडदानं सहितं यथावर्णं पूर्णाशौचं कार्यं। तत्र दहनं ब्रह्मचार्यादि
रनग्निकस्य विधवादेश्च कपालाग्निना स्वशाखोक्तविधिना कार्यं। गृहस्थस्य गृह्याग्निना। आहि
ताग्नेस्त्रेताग्निभिर्दहनं कार्यं। तथाशौचं ब्राह्मणानां दशाहं। क्षत्रियाणां द्वादशाहं। वैश्यानां ४८
पंचदशाहं। शूद्राणां मासं। वृत्तस्थानां द्विजशुश्रूषावतां सच्छूद्राणां पंचदशाहं। चतुर्थे दशरात्रं

स्यादित्यादिपक्षा दूषिताः। चतुर्थे दशरात्रं स्यात्षडहं पुंसि पंचमे। षष्ठे चतुरहाच्छुद्धिः सप्तमे च दिनत्रयमित्य
नादृतः। एकाहाच्छुध्यते विप्र इत्याद्या अनादृताः। तत्राशौचमाहिताग्नेः विधिवद्दहनं कृत्वा दहनदिवस
मारभ्यैव कार्यं। विदेशस्थे मृते यावद्विनान संस्कारस्तावत्तत्पुत्रादीनां संध्यादिकर्मलोपो नास्त्येव। अ
नाहिताग्नेर्विधिवद्दहनाभावे तदानीमाशौचग्रहणं कृताकृतं। आहिताग्नेर्विधिवद्दहनाभावे आशौ
चादिग्रहणं नास्त्येव। वपनं च पुत्राणां प्रथमेऽह्नि कार्यं दशमे वा। श्राद्धादेरर्वाक् कस्मिंश्चिद्दिवसे वा।
ग्रामाद्बहिः कार्यं। नखनिकृंतनं च। गुरुमरणे चैवं॥ मृतशरीराभावे सद्यः संस्कारं कुर्यात्। अस्थ्ना
मभावे पलाशवृंतैर्वा शरीरप्रतिकृतिं कृत्वा पुनः संस्कारं कुर्यात्। आहिताग्नेः पुनः संस्कारे प्रत्य
क्षशववद्दशाहादिकं संपूर्णाशौचं यथावर्णं कार्यं। अनाहिताग्नेः पुनः संस्कारस्तु सूतकमध्ये चे
त्कृतस्तत्सूतकशेषेणैव शुद्धिः। अतीतसूतके तु पुनः संस्कारे पूर्वमगृहीताशौचस्य पुत्रस्य पत्न्या
श्च दशाहादिकं संपूर्णाशौचं। गृहीताशौचस्य पुत्रस्य पत्न्याश्च त्रिरात्रं। पत्नी पुनः संस्कारे पत्यु
श्चैवं। अगृहीताशौचानां सपिंडानां त्रिरात्रं। गृहीताशौचानां सपिंडानां पुनराशौचं नास्ति॥ वि
देशस्थजननं मरणं वा प्रथमदिवसादूर्ध्वं ज्ञाने पुत्रादीनां स्वाशौचशेषेणैव शुद्धिः। हीनवर्णस्य ब्रा

स्मृत्य·सा· ४९ क्षणात्युत्कृष्टजात्याशौचमेव। दासीदासस्य प्रेष्यस्य स्वामिकार्ये स्वाम्याशौचसमकाले गते स्पृश्यः स्वक
र्माधिकस्त्वस्वाशौचांत एव। प्रतिलोमजानां नाशौचं। तेषां मलप्रक्षालनमेव। शवं दग्ध्वा पृष्ठतोऽनवेक्ष्य
माणा आगच्छेतां स्फुटितपाषाणं श्लक्ष्णं गृहीत्वा महाजलं गत्वा तत्र महाजले शरीरमलं प्रक्षाल्य वस्त्र
संशोध्य स्नात्वा पुनः सचैलं स्नात्वा वाग्यताः सगोत्रसपिंडाः समानोदकाश्च वृद्धपूर्वाः प्राचीनावीति
नो दक्षिणामुखा प्रेतस्य नामगोत्रे उच्चार्य प्रेतस्त्वप्यत्विति जलपूर्णांजलिं सतिलं सव्योत्तरपाणिकाः
पाषाणे सकृत्प्रसिंचेयुः। एवमुदकं दत्वा जलात्समुत्तीर्णा नवजाततृणके स्थप्रदेशे सम्यक्स्थितान्
पुत्रादीन्कुलवृद्धाः पूर्वेतिहासैः शोको निष्फलः। श्लेष्माश्रु बांधवैर्मुक्तं प्रेतास्यैतन्निपतति तस्मा
न्नरोदनं कार्यं। विहिताः क्रियाः कार्याः। इत्याश्वासयेयुः। एवमाश्वासिता वस्त्राणि निष्पीड्य शोष
यित्वा बालपूर्वं गृहं गत्वा द्वारि स्थित्वा समाहिता निंबपत्राणि शनैर्भक्षयित्वाचम्याग्न्युदकगोम
यगौरसर्षपदूर्वांकुरगोवृषभान्स्पृष्ट्वा मणिप्रवालादीन्स्वशाखोक्तानपि यथालाभं स्पृष्ट्वाश्म
नि पदं शनैर्निधाय गृहं प्रविशेयुः। तस्मिन्नहनि एकस्मिन्मृन्मयपात्रे जलं प्रेतात्र स्नाहीति आ
काशे शिक्यादौ स्थाप्यं। अन्यस्मिन्मृन्मये क्षीरं प्रेतेदं पिबेति तथैव स्थाप्यं। निंबपत्रभक्षणं पात्र ४९
स्थापनं न वा कार्यं। ततस्तस्मिन्दिने तस्मिन्गृहे अन्नं न पचेयुः। क्रीतान्नेन अयाचितान्नेन वान्य

गृहपक्वेन वा हविष्येण वर्तेरन्। न स्वगृहपक्वेन। क्षीरलवणमाषमांसानूपपायसवर्जं अधःशयनासनाः
बालातुरवृद्धवर्जं। पृथक्पृथक् ब्रह्मचर्ययुक्ता आसीरेयुः। गुरौ मृते उपवसेयुः। पुत्राः पत्नी च। जातसूतके
ते नियमाः सर्वे न स्युः। महागुरुमरणे अक्षारलवणाशिनो द्वादशरात्रं। दानाध्ययने वर्जयेरन्। पिता
पुत्रमुत्पाद्य संस्कृत्य वेदं वेदार्थं ग्राहयित्वा वृत्तिं कल्पयित्वा महागुरुर्भवति। ततो यावदाशौचं तावत्प्र
त्यहमेकैकमंजलिं दद्युः। तथा वसति दशसु दिनेषु दर्शाजलयः स्युः। एवं मातामहानामाचार्याणां चोद
कदानं कुर्यात्। सखीनां प्रत्तानां दुहितॄणां भगिन्यादीनां श्वश्रूश्वशुरभ्रातृभागिनेयर्त्विजां वैकल्प्योद
कदानं कुर्यात्। अस्थिसंचयनमाहिताग्नेरनग्नेश्च संस्कारमारभ्य प्रथमदिने द्वितीये तृतीये वा
चतुर्थे सप्तमे नवमे वा अविरुद्धस्वशाखोक्तविधिना कार्यं। तत्रापिंडत्रयं देयम् एकं पिंडं श्मशानवासि
भ्यः पूर्वं प्रेतेभ्यः मध्यत एकः पिंडः इदानीतनप्रेताय दक्षिणत एकः पिंडस्तत्सखिभ्य इति दक्षिणसंस्थं
दद्यात्। अस्थीनि गंगायां वा क्षिपेत्। अन्यतीर्थे वा शुद्धदेशे वा संचयने कृते वर्णस्वाशौचकालत्रिभा
गे त्रिरहः पंचदिनैः स्पृश्याः दशद्वादशपंचदशभिर्द्विजान्याः॥ ब्रह्मचारी मातृपितृमहागु
र्वाचार्योपाध्यायानां दहनाशौचोदकदानादिकं कुर्यात्। तद्व्यतिरिक्तानां दहनाशौचोदकदाना
दिकं न कुर्यात्। आसमावर्तनात्। मात्रादीनां तु कुर्यादेव। प्रक्रांतप्रायश्चित्तव्रतस्थ व्रतसमाप्ति

 दहनादिकं न कुर्यात्। स्वकर्मरहितश्च न कुर्यात्। कृतेपि नोपतिष्ठति। मातापितृगुर्वाचार्योपाध्यायानां प्रेतकार्ये
 पुत्रो ब्रह्मचारिणो व्रतलोपो नास्ति। न सूतकान्नमश्नीयात्। न सूतकिभिः सह वसेत्। अन्यप्रेतकार्यकरणे
पुनरुपनयनं कार्यं। समावृत्तशिष्यस्य दशाहमाशौचं। गुरुदहने स्वकर्मपतिता महापातकपतिताः पुरुषाः
स्त्रियश्च हीनजातिगामिन्यो ब्राह्मणगर्भघातिन्यो भर्तृद्रुहश्च स्तेयस्त्वा विधर्माणश्च क्लीबाद्याश्च दह
नोदकं न कुर्युः। मोहात्कृतेपि नोपतिष्ठति। प्रेतस्य पुत्रो दिनत्रये ग्रामाद्बहिः पाषाणस्य पुरतः श्रमं त्र्यर्ककु
शेषु नामगोत्रेणापिंडपितृयज्ञप्रयोगेण त्रीन्पिंडान्दद्यात्। तत्र पिंडपाषाणयोः अक्षतगंधधूपदीपमा
ल्यादीन्दद्यात्। यद्वा दशदिनेषु दशपिंडान्दद्यात्। आशौचवृद्धावपि त्रयः पिंडा दश वा। अनेकपु
त्रत्वे इतरानुमतो ज्येष्ठ एव दद्यात्। द्रव्येण विभक्तेन वा। पुत्राभावे पितृसपिंडे य मातृसपिंडाश्च
शिष्यास्तदर्थं जीविनो वा संबंधिनो बांधवा वा दद्युः। असगोत्रः सगोत्रो वा पुरुषो वा स्त्री वा प्रथमे
ह्नि यो दद्याद्दशाहांतं स एव। प्रथमेह्नि यद्द्रव्यं दशाहांतं तदेव। दशमे ह्न्यधिकं पिंडत्रयं देयं। एकः
पिंडस्तावत्सखिभ्य इदानींतन प्रेताय मध्यमः पिंडः दक्षिणेन एकः पिंडोयमाय। ततः कर्त्ता प्रार्थिता
बांधवाः संबंधिनश्च त्रीन्त्रीन्धर्मोदकांजलीन्दद्युः। न पाषाणे नियमः। ततः सुवासिन्यो भ्यंगस्ना
ताः शुक्लवाससः कलशपूर्वा बालपूर्वा वा स्वगृहं गत्वा अन्यभोजनादिस्वगृहपाकेन यथा वा रं कुर्युः॥

त्रिरात्राशौचे दशांजलयश्च वा शतांजलयः। दशांजलिपक्षे प्रथमेह्नि त्रयोंजलयः। द्वितीयदिने चत्वारः तृ
तीये त्रयः। शतांजलिपक्षे प्रथमेह्नि त्रिंशत् द्वितीये चत्वारिंशत् तृतीये त्रिंशत्। पिंडाश्च प्रथमेह्नि त्रयः
द्वितीये चत्वारः। तृतीये त्रयः। संचयनं च द्वितीयेह्नि। अनुपनीतस्य पिंडं भूमौ दद्यात्। अर्वाग्द्विवर्षस्त्रीशू
द्रयोर्विवाहादर्वागेव। आशौचमध्ये पुनःसंस्कारे दुष्टबाधो भयात्तद्दिने संभवे शोध्यं कालांतरकृत्य
प्रेतकार्ये तु दिनं शोध्यमेव। संवत्सरादूर्ध्वं प्रेतकार्यकृत्ये उत्तरायणकालः श्रेयान्। तत्रापि कृष्णप
क्षः श्रेयान्। तत्रापि नंदा त्रयोदशी चतुर्दशी दिनक्षयं च वर्जयेत्। शुक्रशनैश्चरवारौ वर्ज्यौ। नक्षत्रे
षु भरणी कृत्तिकार्द्राश्लेषा ज्येष्ठा मघा मूल धनिष्ठादिपंचकं त्रिपुष्कराणि चातिदुष्टानि सर्वथा वर्ज्या
नि। व्यतीपातपरिघवैधृतियोगा विष्टिकरणं च। चतुर्थ्यष्टमद्वादशी सुचंद्रे चातिदोषः। रोहिणी मृग
शीर्षपुनर्वसुपूर्वोत्तराचित्राविशाखानुराधापूर्वाषाढोत्तराषाढानि द्विपुष्कराणि षट् दुष्टानि संभवे व
र्ज्यानि। शिष्टान्यदुष्टानि ग्राह्याणि। सर्वथा दिनशुद्ध्यसंभवे अनतिदुष्टवारनक्षत्रे ग्राह्ये। नंदायां
शुक्रवारे चतुर्दश्यां त्रिजन्मनक्षत्रे एकोद्दिष्टं निषिद्धं। साक्षादेकोदशाहे प्राप्ते चैकोद्दिष्टं प्राप्तमेव।
तत्रापि तिथिनक्षत्रवारादिकं शोध्यमेव। युगादिमन्वादिसंक्रांत्यमावास्यासु प्रेतकार्ये पुनःसंस्कारे च नै
व किंचिच्छोध्यं। कुंभादिक्षिप्तः धराक्षिप्ताश्लेषाद्यास्त्रयो धिष्ण्यास्तत्रयस्रे मरणस्व [illegible]मरणाबद्ध

स्मृ·स·सा· मरणादिषु सत्सु प्रत्यक्षसंस्कारे पुनःसंस्कारे च कर्तव्ये त्रीन्कृच्छ्रान् षट्कृच्छ्रान्द्वादशकृच्छ्रान्पंचदशकृच्छ्रान्वा प्राय
५१ श्चित्तं वित्तानुसारेण स्वनाङ्कृहीत्वा शक्तौ तद्देवप्रत्याम्नायं धेनुं हिरण्यं भूधान्यादि वस्त्रादि दत्वा तदनंतरं शु
द्धिं संपाद्य दहनादिकं कार्यं। शक्तौ सत्यां पुत्रादिः पित्रादेः पापिनः सर्वात्मना शुद्धिमिच्छेत्। प्रायश्चित्तप्रयोगं कृत्वा २
क्षः सर्वप्रायश्चित्तानामन्यतमं योग्यं कृत्वा दहनादिकं कुर्यात्। दहनादिकर्तृष्व्यधिकारित्वाभावे एवमेव
विशुद्धिमात्मनः संपाद्य दहनादिकं कुर्यात्। एवं प्रेतादिकस्याप्यात्मनश्च शुद्धिमनापाद्य पुनःसंस्कारेनां
तरं नक्षत्रं ग्राह्यं। लोभादिना दहने कृते तत्सर्वं नोपतिष्ठति। अंतरिक्षं विनश्यति। उभयोरपि नरकपतनं ध्रु
वं। पाषंडिनां वेदबाह्यलिंगि ×नादि× नां सत्यधिकारे अनाश्रमिणां स्वकर्महानिपतितानां महापातकप
तितानां स्त्रीणां च हीनजातिगामिनीनां ब्राह्मणगर्भघ्नीनां कुलटानां च प्रायो नाशकशस्त्राग्निविषोद्बंध
नप्रपतनाद्यैर्बुद्धिपूर्वकमात्मघातीनां दहनादिकं न कुर्यात्। चंडाळसर्पजलब्राह्मणवैद्युततदंष्ट्रिश्रृंगि
पशुभिर्हतानां तद्देहं तूष्णीं दहेत्। अन्यस्यां वा महानद्यां क्षिपेत्। दर्पक्रोधादिनाम्हतानां च दहनाशौ
चोदकदानादिकं न कुर्यात्। मोहात्कृते नोपतिष्ठति। अंतरिक्षे विनश्यत्येव। तदानीं प्रायश्चित्तस्मरणात्
संवत्सरांते लोकगर्हाभयपरिहारार्थं शुद्ध्यर्थं श्राद्धादौ योग्यत्वार्थं च तेषां शरीरं गंगायां क्षिपेत्॥ ५१
अन्यस्यां वा महानद्यां। गृह्याग्नौ चतुष्पथे यज्ञपात्राणि दहेत्। तेषां शवानां स्पर्शनस्नानालंकारवा

वाहनरज्जुच्छेदनदहनाश्रुपातकथादीन् अज्ञानतः कृत्वा महासांतपनं चरेत्। ज्ञानात्तप्तकृच्छ्रमेतेष्वेकैककरणे त
ज्ज्ञानादुपवासः। मत्याभ्यासे कृच्छ्रातिकृच्छ्रं चांद्रायणानि योग्यतया कुर्यात्। एतेषां सापिंड्यादीनां सर्वेषां नि
ष्कृतिर्नास्ति। प्रायश्चित्ताकरणे तदानीं संवत्सरांते लोकगर्हापरिहारार्थं शुद्ध्यर्थं श्राद्धादौ योग्यत्वार्थं च ना
रायणबलिं कृत्वा श्राद्धं कुर्यात्। अथ तेषां मतिविरक्ताः प्रायश्चित्तसमर्था भक्ताः पुत्रादयः संति चेत्।
आत्मघातके प्रायश्चित्तं चांद्रद्वयं। तप्तकृच्छ्रचतुष्कं च। षट्त्रिंशत्कृच्छ्राणि कृत्वा पाषंड्यादीनां सर्वप्राय
श्चित्तं योग्यं कृत्वा तदैव वा कालांतरे वा संवत्सरादर्वाक् दहनादिकं कृत्वा श्राद्धं कुर्युः। अनित्यत्वादायुषः
प्रायो महाप्रस्थानं प्रपतनं गिरिवृक्षयोः॥ अथ नारायणबलिः ॥ कांस्यं शुक्लैकादश्यां वा
कृष्णैकादश्यां विष्णुं वैवस्वतं यमं यथावदभ्यर्च्य। तत्समीपे मधुघृतप्लुतांस्तिलमिश्रान्दश पिंडान्वि
ष्णुरूपेण प्रेतमनुस्मरन्प्रेतनामगोत्र उच्चार्य दक्षिणाग्रेषु दर्भेषु दक्षिणामुखो दत्वा गंधाद्यैरभ्यर्च्य पिंड
प्रवहणं तत्कृत्वा नद्यां प्रक्षिपेत्। न पत्न्यादिभ्यो दद्यात्। ततस्तस्यामेव रात्रौ अयुग्मान्ब्राह्मणानामंत्र्यो
पोषितः श्वोभूते मध्याह्ने विष्णुमभ्यर्च्य एकोद्दिष्टविधिना ब्राह्मणपादप्रक्षालनादि तृप्तिप्रश्नांतं कृत्वा
पिंडपितृयज्ञवदुल्लेखनाद्यवनेजनांतं कृत्वा विष्णवे ब्रह्मणे शिवाय यमाय सपरिवाराय च चतुःपिंडा
न्दत्वा नामगोत्रसहितं प्रेतं संस्मृत्य विष्णो नाम संकीर्त्य पंचमं पिंडं दद्यात्। ततो विप्रानाशीतान्दक्षि

स्मृत्य॰ सा॰ ५२

णादिभिस्तोषयित्वा तन्मध्ये वैकं गुणवंतं प्रेतबुध्यासंस्मरन्भूमिहिरण्यादिभिरतिशयेन संतोष्य पवित्रपाणि
भिर्विप्रैः प्रेतायतिलादिसहितमुदकुं संदापयित्वा स्वजनैः सह भुंजीत॥ सर्पहते त्वयं विशेषः। तत्र नागव्र
तं कार्यं। तत्र संवत्सरं भाद्रपद शुक्लपंचमीमारभ्य अन्यां वा शुक्लपंचमीमारभ्य पंचम्यामुपवासः। यद्वा चतु
र्थ्यामेकभक्तं पंचम्यां नक्तं कुर्वन्। दारुमयं मृन्मयं वा नागं पंचफणं कृत्वा गंधैः करवीरैः शतपत्रैर्जातिपुष्पैः
धूपैरर्चनं तं वासुकिं शंखं पद्मकं बळं कर्कोटकमश्वतरं धृतराष्ट्रं शंखपालं कालीयं तक्षकं कपिलं चपंचम्यां
संपूज्य पश्चाद्ब्राह्मणान्घृतपायसमोदकैर्भोजयेत्। संवत्सरांते चैवं संपूज्य महाब्राह्मणभोजनं सौव
र्णनागदानं गोदानं च कुर्यात्। अथवोभयोः पक्षयोः पंचम्यां भूमौ नागं पिष्टेनालिख्य सितपुष्पैर्गंधैः सितेन रव्य
गंधेन वासिततंदुलैरभ्यर्च्य गव्यक्षीरं मोदकं भूमौ निवेद्य उपस्थायैवं वदेत्। मुंचमुंचेन मिति तद्दिने मध
रमश्नीयात्। एवमुक्तविधिना नागमभ्यर्च्य पूर्णे संवत्सरे नारायणबलिं कृत्वा सौवर्णनागं गां च दद्यात्।
ततः श्राद्धादिकं सर्वं कुर्यात्। चंडालगोब्राह्मणपशुदंष्ट्रिसर्पाग्न्युदकादिभिः प्रमादान्मरणे तु तद्धृतकृच्छ्र
द्वयं चांद्रायणं च कृत्वा यथार्थं चद्राकृच्छ्रान् कृत्वा विधिनादहनोदक्रशौचोदकदानादिकं सर्वं कार्यमेव।
॥ अथानुष्ठानासमर्थजीर्णवानप्रस्थादीनां अचिकित्स्य गुरुव्याधिपीडितानां अग्न्युदकानशा
नगिरिप्रपतनादिभिर्बुद्धिपूर्वकमात्मघातकर्त्वमभ्यनुज्ञायते तेषां विधिवद्दहनं कृत्वा त्रिरात्रमाशौचं ५२
कार्यं द्वितीयेह्नि संचयनं तृतीये तूदकदानं। चतुर्थे श्राद्धं कुर्यात्। एवमन्येषां विध्यनुगृहीतात्मघात

कानां कार्यं। अभिषिक्तक्षत्रियादिहतानां सद्यःशौचं। गोविप्रैरंत्यजैः पशुदंष्ट्र्यादिभिर्युद्धबुद्धिपूर्वात्मघातका
नां पाषंडजनाश्रमिपतितानां सद्यःशौचं॥ जाताशौचे मृताशौचे च त्रेताग्निसाध्याग्निहोत्रदर्शपौर्णमासा
दिनित्यनैमित्तिकाः क्रियाः कार्याः। औपासनाग्निसाध्याश्च प्रातःसायं होमः पार्वणस्थालीपाकाद्याः श्रौति
चोदितत्वात् कार्या एव। असंभवे हावयेत् सर्वथा न हावयेत्। स्मार्ते त्वपि पिंडपितृयज्ञश्रवणाकर्माश्वयुजी
कर्मादिकं असगोत्रेण कारयेत्। न हावयेत्। यजमानस्तु स्नात्वा चम्य उद्देशत्यागं कुर्यात्। सर्वकाम्यं नि
वर्त्यमेव। स्मार्तत्वेपि संध्यायां गायत्र्यांजलिदानं कार्यं। मार्जनं कार्यं न वा। यद्वा प्राणान्नियम्य शत्वयाम
नसा मंत्रमुच्चारयन् मार्जनादिकं कृत्वा वाचा गायत्रीमुच्चार्यांजलिं दद्यात्। दानप्रतिग्रह पंचमहायज्ञनि
त्यश्राद्ध स्वाध्यायादीनां स्मार्तानां त्याग एव। नित्यस्नानशौचाचमनभोजनानां न अस्पृश्यस्पर्शने स्ना
नं च कुर्यात्। सूतकान्नभोजनमस्वकुल्यानां न कार्यं। स्वकुल्यानां न दोषः। दातृभोक्त्रोरन्यतरेणासू
ने तके ज्ञाने भोक्तव्यं। उभाभ्यामपरिज्ञानेन न दोषः। विवाहोत्सवयज्ञेषु अंतरा जननमरणाशौचे पूर्वसंकल्पि
तद्रव्ये न दोषः। तत्रकृतान्नेषु परैरन्नं दातव्यं। दातृभोक्त्रोः सूतकिनं न स्पृशेत्। भुंजानेषु विप्रेष्वन्यतरा
श्राद्धे आशौचे अन्यगृहोदकानां ताः शुद्धाः॥ सर्वचाशौचे लवणमधुमांसे पुष्पफलमूलेषु शा
ककाष्ठतृणेषु पयोदधिघृतेषु तिलौषधांजनेषु नास्त्याशौचं। स्वाम्यनुज्ञया स्वयमेव गृह्णीयात्।

अन्नसत्रप्रवृत्तानांतंडुलादिष्वपक्केषुचसर्वेषुपण्यद्रव्येषुचनाशौचं। शावसंसर्गनिमित्ताशौचेअनुगमनाशौ
चंच। शावसंसर्गिणएवनतत्कार्यापुत्रादीनांद्रव्याणांच॥ अतिक्रांताशौचंवैतद्द्रव्याणांनास्त्येव। कारु
शिल्पिवैद्यदासीदासराजप्रेष्यराजमूल्यकर्मकारिणांसद्यःस्नातानांतत्तद्व्यापारिणांनाशौचं। ग
त्यंतराभावेधकविहृष्टस्यलंस्यात्। स्वविहितस्नातकव्रतिनांकार्येष्वाशौचमस्त्येव। कारवःसूपकाराद्याः
शिल्पिनश्चित्रकर्मचैलनिर्णेजकाद्याः॥ वृतानामृत्विजांमूल्यदीक्षणीयेष्ट्यादिदीक्षितानांय
ज्ञियंकर्मकुर्वतांअन्नसत्रिणांकृच्छ्रचांद्रायणादिव्रतिनांप्रायश्चित्तेतेनप्रवृत्तनिवृत्तिनांचब्रह्मचार्या
दिव्रतीनांचप्रवृत्तेश्राद्धकर्मणिकर्तृणांनिमंत्रितानांभोक्तॄणांयत्किंचिन्नियमस्थानांअप्रतिषिद्धग्रा
हिणांनित्यदातॄणामेतेषांयावदुपाधिस्तावदाशौचंनास्त्येव। ब्रह्मचारिणांयतीनांचसर्वदाशौचं
नास्त्येव। ऋत्विगादीनांस्नानमस्ति॥ पूर्वप्रवृत्तचौलोपनयनविवाहादिसंस्कारकर्मसुपूर्वप्रवृ
त्तयज्ञेषुचपूर्वप्रवृत्तप्रतिष्ठाद्युत्सवमात्रेषुचपूर्वप्रवृत्तवृषोत्सर्गादिपाकयज्ञेषुयुद्धार्थंविहितशां
तिकर्मसुचस्फोटकादिभिरुपसर्गेणराजभयेनवादेशस्यविप्लवेनचविवाहोत्सवदुर्गयज्ञयात्रातीर्थ
युद्धकर्मसुचसद्यःशौचंतत्तदर्थशांतिकर्मणिचसद्यःशौचं। व्याध्यादिनामुमूर्षावस्थायांतदुपश ५३
मनार्थदानेचतथासंकुचितवृत्तेःक्षुत्परिश्रांतमातापित्रादिबहुकुटुंबस्यतद्रक्षणयोग्यप्रतिग्र

हेचाश्वस्तनिकस्यसद्यःशौचं। अतिकष्टापदिविप्लवेच विशेषेणसद्यःशौचं। एकाहसंचितधान्यस्यैकाह
माशौचं। त्र्यहःसंचितधान्यस्यत्र्यहंचतुरब्दार्थसंचितधान्यस्यकुंभीधान्यस्यचचतुरहं। कुसूलधान्यस्यदशा
हं। आशौचकालमध्येनुपपत्त्यपगमेचावशिष्टंशौचमस्त्येव। एवंदशाहस्थानेत्रिरात्रपक्षिण्येकाहःसद्यःशौ
चपराणिवाक्यानिआपद्विषयाणियोज्यानि। समानोदकविषयाश्चसंकुचिताशौचाःकल्प्याःपक्षिण्ये
काहःसद्यःशौचोपायाआपद्विषयाः। येनप्रतिग्रहादिनावृत्तिर्विषयानश्येत्। नसर्वत्र। ब्राह्मणोऽन्ना
दिनिमित्तंबहुवेदस्यस्वाध्यायेनसद्यःशौचं॥ आशौचानंतरंसर्ववर्णाःसचेलंस्नातितताब्रा
ह्मणोदक्षिणहस्तेनापःस्पृष्ट्वाशुध्येत्। क्षत्रियोवाहनमायुधंवावैश्यःप्रतोदंरश्मीन्वा। शूद्रोय
ष्टीस्पृष्ट्वाशुध्येत्। शवंसपिंडैःसमानोदकैर्वस्त्रयुगादिभिर्भूषितंनयेयुः। नग्नंस्थामाभिमुखंप्रे
तंनयेयुः। नग्नद्रुःपतिताश्चशवस्पाकाष्ठहवींषिनयेयुः। ननग्नंशवंदहेयुः॥ धर्मार्थंब्राह्मणाश
वनिर्हरणस्नानालंकारवाहनदहनादिकेकृतेद्विजानांसचैलस्नानाच्छुद्धिः। महापुण्यंशुभंचायु
श्चभवतितत्राप्यनाथप्रेतेप्यनंतंपुण्यंशुभंचायुर्वर्धते। धर्मार्थमुत्कृष्टजातिप्रेतानिर्हरणादिकेसचै
लस्नानाच्छुद्धिः। धर्मार्थंसजातिप्रेतनिर्हरणेसचैलस्नानप्राणायामैःशुद्धिः। धर्मोर्थहीनजातिप्रेतनि
र्हरणादिकेसचैलस्नात्वानिंबपत्रभक्षणादिगृहप्रवेशनांतेकृतेशुद्धिः। स्नेहादिनासजातिषूत्कृष्ट

स्मृ॰सं॰सा॰ ५४ जातिषु प्रेतनिर्हरणे कृते त्वेकाहाशौचेन शुद्धिः। स्नेहादिना सजातिनिर्हरणे तद्गृहे स्थितो त्रिरात्रमाशौचं।
स्नेहादिना सजाति^मात्रे^ निर्हृत्य तद्गृहे स्थित्वा तदन्नाशने दशाहाशौचेनैव शुद्धिः। स्नेहादिनान्यजाति
निर्हरणे तु तज्जातीयमेवाशौचं कार्यं॥ अनुगमनं सजातिष्वपि ब्राह्मणाद्यैर्न कार्यं। स्नेहादिना स
जातिषु वोत्कृष्टजातिषु वानुगमने कृते सचैलं स्नात्वाग्निं स्पृष्ट्वा घृतं प्राश्य शुध्येत्। घृतप्राशनं विशुद्ध
र्थमेव। न भोजनस्थाने। सपिंडेष्वनुगमनं विहितमेव। हीनजातिषु त्वेवं। ब्राह्मणस्य क्षत्रियानुगम
ने एकाहमाशौचं। वैश्यानुगमने पक्षिणी। शूद्रानुगमने त्रिरात्रमाशौचं। कृत्वा समुद्रगायां नद्यां स्ना
त्वा प्राणायामशतं कृत्वा घृतं प्राश्य शुध्येत्। क्षत्रियस्य वैश्यानुगमने त्वेकाहं। शूद्रानुगमने पक्षि
णी। वैश्यस्य शूद्रानुगमने त्वेकाहः। रोदनस्थेवं। असपिंडस्य दहनादिकरणे पादकृच्छ्रं। त्रिरात्र
माशौचं। अत्राक्रस्य मरणभये सति शुद्धिः कार्या यथा योग्य प्रायश्चित्तेऽसौ स्नानपूर्वकं॥ ॥
रजस्वला त्रिरात्रमशुचिर्भवति। स्नाने नैमित्तिके प्राप्ते रजोदृष्टौ पात्रांतरितताये न स्नाना शुद्धिः
सिक्तमात्रा सवासा वस्त्रपीडनमन्यवस्त्रधारणं च कृत्वा व्रतानि चरेत्। रजस्वलां ज्वरितां चतुर्थेऽह्नि अ
न्या स्त्री सचैला वगाह्यावगाह्याचम्य दशकृत्वो द्वादशकृत्वो वा स्पृशेत्। अंते वाससां त्यागः ततः सा र ग: ५४
जस्वला शुद्धा। शक्त्या दानं कृत्वा पुण्याहं न विशेषतः शुध्येत्। आतुरे स्नान प्राप्ते अनातुरा दश

कृत्वः शतकृत्वो वा स्नात्वा स्नात्वा चम्याचम्यातुरं स्पृशेत्। तत आतुरः शुध्येत्॥ सूतिकायां मृतायां कुंभे जल
मादाय तत्र पंचगव्यं क्षिप्त्वापो हिष्ठा वामदेव्यादि पुण्यैरभिमंत्र्य ब्राह्मणः स्नानं कार्यमित्याद्युः। तदा सूतिकां र
जस्वलां वा मलं प्रक्षाल्य स्नापयित्वा काष्ठवद्दग्ध्वा ब्राह्मणवर्नलक्ष्म्या अस्थिनि विधिवद्दहेत्। अर्द्धेन मरणं र
आदर्शनं वक तदाविद्भवति तदाशौचादि रात्रिगणनाकारात्रौ रजोदर्शनादिकं स्याच्चेत्। तदा त्रयः पक्षाः। अर्द्धरात्रा
दर्वाक्पूर्वदिनमित्येकः पक्षः। रात्रिं त्रिधा विभज्य पूर्वभागयोर्जननादिकं चेत् आद्यदिनमित्यपरः पक्षः। उदयादर्वा
ग्दिनमित्येकः पक्षः एतेषां पक्षाणां देशाचारतो व्यवस्था॥ अतीताशौचे तु स्वाशौचकालादूर्ध्वं ब्राह्मणादीनां स
र्वेषां वर्णानां उपनयनादूर्ध्वं स्त्रीशूद्राणां विवाहादूर्ध्वं भवति। तत्र मासत्रये त्रिरात्रं। षण्मासे पक्षिणी। नव
मासे त्वेकाहः। ततः परं स्नात्वोदकदानाच्छुद्धिः। इदं सर्ववर्णसमं। अतीताशौचे स्वाशौचकालत्रिभागादूर्ध्वं
स्पृश्याः। जन्मन्यतिक्रांताशौचे सपिंडानां नास्त्येव। पुत्रजन्मनि पितुः स्नानमेव॥ देशांतरादर्शकेन देशे
स्यात्स्वाशौचकालादूर्ध्वं श्रुते तद्देशे विंशतियोजनाधिके त्रिधा विभज्याद्य स्वसमीपभागे त्रिरात्रं ततो
दूरभागे पक्षिणी। ततो दूरभागे त्वेकाहः स्यात्। एवं देशकालं पर्यालोच्य यत्रात्म शौचं तद्देवग्राह्यं। अत्राप्य
हानिनवर्द्धयेत्। देशांतरस्थे मृते स्वाशौचकालादूर्ध्वं श्रुते सर्वेषां सपिंडानां सचैलस्नानं न त्रिरात्रादि। माता
पित्रोर्मरणे दशाहादूर्ध्वं दूरदेशेपि संवत्सरादूर्ध्वं श्रुतमपि पुत्राः श्रुत्वा मरणश्रवणदिनमारभ्य दशाहादिकं

स्मृ॰स॰सा॰ जातिषु प्रेतनिर्हरणे कृते त्वेकाहाशौचेन शुद्धिः। स्नेहादिनासजातिनिर्हरणे तद्गृहे स्थितो त्रिरात्रमाशौचं।
५४ स्नेहादिनासजाति×मात्रे×निर्हृत्य तद्गृहे स्थित्वा तदन्नाशने दशाहाशौचेनैव शुद्धिः। स्नेहादिनात्वन्यजाति
निर्हरणे तु तज्जातीयमेवाशौचं कार्यं॥ अनुगमनं सजातिष्वपि ब्राह्मणादिभिर्न कार्यं। स्नेहादिनास
जातिषु वोत्कृष्टजातिषु वानुगमने कृते सचैलं स्नात्वाग्निं स्पृष्ट्वा घृतं प्राश्य शुद्ध्येत्। घृतप्राशनं विशुद्ध्य
र्थमेव। न भोजनस्थाने। सपिंडेष्वनुगमनं विहितमेव। हीनजातिषु त्वेवं। ब्राह्मणस्य क्षत्रियानुगम
ने एकाहमाशौचं। वैश्यानुगमने पक्षिणी। शूद्रानुगमने त्रिरात्रमाशौचं। कृत्वा समुद्रगायां नद्यां स्ना
त्वा प्राणायामशतं कृत्वा घृतं प्राश्य शुद्ध्येत्। क्षत्रियस्य वैश्यानुगमने त्वेकाहं। शूद्रानुगमने पक्षि
णी। वैश्यस्य शूद्रानुगमने त्वेकाहं। रोदनस्त्वेवं। असपिंडस्य दहनादिकरणे पादकृच्छ्रं। त्रिरात्र
माशौचं। अनाथस्य मरणभये सति शुद्धिः कार्या यथायोग्यप्रायश्चित्तेः स्नानपूर्वकं॥ ॥
रजस्वला त्रिरात्रमशुचिर्भवति। स्नाने नैमित्तिके प्राप्ते रजोदृष्टे पातं तरिततायेन स्नाना शुद्धिः
सिक्तमात्रा सवासा वस्त्रापीडनमन्यवस्त्रधारणं च कृत्वा व्रतानि चरेत्। रजस्वलां ज्वरितां चतुर्थेह्नि अ
न्या स्त्री सचेला वगाह्यावगाह्याचम्य दशकृत्वो द्वादशकृत्वो वा स्पृशेत्। अंते वाससां त्यागः ततः सार ग: ५४
जस्वला शुद्धि। शक्त्या दानं कृत्वा पुण्याहं न विशेषतः शुद्ध्येत्। आतुरे स्नान प्राप्ते अनातुराः दश

कृत्वः शतकृत्वो वा स्नात्वा स्नात्वा चम्याचम्यातुरं स्पृशेत्। तत आतुरः शुद्ध्येत्॥ सूतिकायां मृतायां कुंभे जल
मादाय तत्र पंचगव्यं क्षिप्त्वा पोहिष्ठा वामदेव्यादि पुण्यैरभिमंत्र्य ब्राह्मणस्वनं कार्यमित्याङ्गिराः। तदा सूतिकां र
जस्वलां वमलं प्रक्षाल्य स्नापयित्वा काष्ठवद्दग्ध्वा ब्राह्मणेनैव वर्नलक्ष्या। अस्थिनि विधिवद्दहेत्। जलेन मरणं र
जोदर्शनं च कदाचिद्भवति तदाशौचादि रात्रिगणनाकारा चोरजोदर्शनादिकं स्याच्चेत्। तदा त्रयः पक्षाः। अर्द्धरात्रा
दर्वाक् दिनमित्येकः पक्षः। रात्रिं त्रिधा विभज्य पूर्वभागयोर्जननादिकं चेत् आद्यदिनमित्यपरः पक्षः। उदयादर्वा
ग्दिनमित्येकः पक्षः एतेषां पक्षाणां देशाचारतो व्यवस्था अतीताशौचे तु स्वाशौचकालादूर्ध्वं ब्राह्मणादीनां स
र्वेषां वर्णानां उपनयनादूर्ध्वं स्त्रीशूद्राणां विवाहादूर्ध्वं भवति। तत्र मासत्रये त्रिरात्रं। षण्मासे पक्षिणी। नव
मासे त्वेकाहं। ततः परं स्नात्वोदकदानाच्छुद्धिः। इदं सर्ववर्णसमं। अतीताशौचे स्वाशौचकालत्रिपक्षादूर्ध्वं
स्पृश्याः। जन्मन्यतिक्रांताशौचं सपिंडानां नास्त्येव। पुत्रजन्मनि पितुः स्नानमेव॥ देशांतरादर्वाक्त्वेनदेशे
स्याते स्वाशौचकालादूर्ध्वं श्रुते तद्दशविंशतियोजनाधिकं त्रिधा विभज्याद्य स्वसमीपभागे त्रिरात्रं ततो
दूरभागे पक्षिणी। ततो दूरभागे त्वेकाहं स्यात्। एवं देशकालं पर्यालोच्य यत्राल्पशौचं तदेव ग्राह्यं। अत्राप्य
ह्नानि नवर्द्धयेत्। देशांतरस्थे मृते स्वाशौचकालादूर्ध्वं श्रुते सर्वेषां सपिंडानां सचैलस्नानं न त्रिरात्रादि। माता
पित्रमरणे दशाहादूर्ध्वं दूरदेशेपि संवत्सरादूर्ध्वं शतमपि पुत्राः श्रुत्वा मरणश्रवणदिनमारभ्य दशाहादिकं

स्मृ.सा. यथावर्णपूर्णमाशौचं कुर्यात्। उदकपिंडदानादिकं च महागुरुमरणे दूरदेशेऽपि अतीतेऽपि आर्द्रवस्त्रोपधायि
५५ नातथैवाशौचादिकं कार्यं। स्त्रीपुरुषयोः परस्परं चैवं। सवर्णा त्वसवर्णासु सपत्नीषु चैवं। देशांतरे कालांतरे च स्वग
हीनवर्णाया मातुः सपत्न्या मरणे तु पुत्रस्य त्रिरात्रं। हीनवर्णसपत्नीषु चैवं। संवत्सरेऽतीतेऽपि सपत्न्योः परस्प
रं चैवं। इदं चाशौचं सर्ववर्णसमं। देशांतरगमनमनेकधा स्मृतं। स्मृतिपुराणकल्पतीर्थे आशौच मध्ये यत्र
मतवार्ता न श्रूयते। योजनाद्वहिस्तु देशांतरं। तत्र योजनद्वयाधिकं प्रमाणस्यानिषिद्धत्वात् द्विविधं तेन विप्र
स्य दशाहाशौचिनो विंशतियोजनं देशांतरं। क्षत्रियस्य द्वादशाहाशौचिनश्चतुर्विंशतियोजनं वैश्यस्य पं
चदशाहाशौचिनस्त्रिंशद्योजनं। शूद्रस्य मासाशौचिनः षष्टियोजनं देशांतरं स्मृतं। तथा षष्टियोजनमे
कं। चत्वारिंशद्योजनं चतुश्चत्वारिंशद्योजनमन्ये तु त्रिंशद्योजनमपरं। एतानि योग्यतया व्यवस्थितानि इ
ति। विद्वत्काळसुगमदुर्गममार्गपर्यालोचनया सर्वेषामविशेषेण भवति। अन्ययोजनदेशांतरं क्षत्रि
यस्य द्वादशाहाशौचिनश्चतुर्विंशतियोजनमित्यन्ये। तथान्यानि योजनानि तद्वहिरेव षट् चतुर्द्वियोजनानि
त्रीणि देशांतराणि स्मृतानि त्रिरात्रपक्षिण्येकाहाशौचविषयाणि। तथा भाषाभेदविशेषः। महागिरिव्य
वधानमहानदीव्यवधानानि त्रीणि देशांतराणि द्वादशाष्टचतुर्योजनानि त्रीणि देशांतराणि। तानि ५५
समानि उक्तानि तानि त्रिरात्रविषयाण्यपि भवंति। तानि भाषाभेदादीनि त्रीणि पूर्वोक्तचतुर्विधदेशांतरे

पुसंति चेत्। क्रमेण द्वादशाष्टचतुर्योजनन्यूनानि देशांतराणि भवंति। तत्रोभयोर्भेदमत्रागिरिव्यवधानि त्री
णि देशांतराणि स्मृतानि। षट्चतुर्द्वियोजनसमानि वा तानि त्रिरात्रादीनि भवंति तानि भाषाभेदादीनि पू
र्वोक्तचतुर्विधदेशांतरेषु संति चेत्। क्रमेण षट्चतुर्द्वियोजनानि तु तानि देशांतराणि भवंति स्याद्वारित्यादि॥ ॥
यं तिर्यग्यवोदरान्यष्टौ ऊर्ध्वा वा व्रीहयः स्त्रयः प्रमाणमंगुलस्योक्तं वितस्तिर्द्वादशांगुला वितस्तिर्द्विगुणा
रत्नी स्तती किष्कुस्ततो धनुः धनुर्दंड सहस्रे भवेत् क्रोशश्चतुः क्रोशं तु योजनं॥ मातापितृगृहे व्यू
ढायाः पुत्र्याः प्रसवे मातापित्रादिकानामेकाहमाशौचं॥ तत्र तस्या मरणे तेषां त्रिरात्रं गृहांतरमर
णे पित्रोरेवं॥ ग्रामांतरमरणे पक्षिणी। असपिंडे गृहे मृते त्रिरात्रं सपिंडे एकाहं। अन्यस्त्रीपुसप ना
त्नीषु परपत्नीपरा तेषु च पितुस्त्रिरात्रं। सपिंडानामेकाहं। असन्निधौ पितुरेकाहं। सपिंडानां स्ना
नमित्याद्यधिकाशौचं असन्निधौ न्यूनं इदं च सर्ववर्णसमं मातापितृमरणे सवर्णव्यूढ
पुत्र्यास्त्रिरात्रं तातातातेमृताशौचे च सोदकानां त्रिरात्रं। ग्रामांतरे पक्षिणी अंगुष्ठैकग्रामे
पक्षिणी मातामहगुरौ चाचार्ये दौहित्रस्वस्त्रीय संबंधे श्रोत्रिय बंधुयज्ञकृत्तु कर्मकृद् इत्यिस्याज्ञे

स्मृ॰स॰सा॰ षुगुणज्येष्ठे ध्येकग्रामे मृतेषु त्रिरात्रं। ग्रामांतरे पक्षिणी। अगुणेष्वेकग्रामे पक्षिणी ग्रामांतरे ध्येकाहं॥ अनौरसे
५६ षुपुत्रेषु क्षेत्रजदत्तकादिष्वेकाहं। यौज्यलिंग्दौहित्रसहाध्यायिसहोपनीतात्मबंधुपितृबंधुमातृबंधुषु श्व
शुरमातुलशिष्योपाध्यायानूचानगुरुपुत्राचार्यपुत्रसुमित्रभागिनेयेषु स्वसृभगिनीमातामहीषु मातृ
ष्वसृपितृष्वसृमातुलानीश्वश्रूराचार्यपत्नीषु मरणे एकग्रामे पक्षिण्याशौचं ग्रामांतरे त्वेकाहं। अगुणवत्सु
तु एकग्रामे त्वेकाहं ग्रामांतरे स्नानं। उपनयनादूर्ध्वं सौनसंस्कारपूर्वकं वेदाध्यापको गुरुः मंत्रदातोपदेश
कश्च उपनयनपूर्वकं वेदाध्यापक आचार्यः। शास्त्रकर्त्राचार्यश्च वेदाध्यापकोपाध्यायो वेदैकदेशाध्यापक स्मृ
श्चानूचानो वेदांतवक्ता सच्छात्रवक्ता च श्रोत्रियएकशाखाध्यायी आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः
पुत्रा आत्ममातुलपुत्रा विज्ञेया विज्ञेया आत्मबांधवाः। पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः। पि
तुर्मातुलपुत्राश्च विज्ञेयाः पितृबांधवाः। मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः। मातुर्मातुलपुत्रा
श्च विज्ञेया मातृबांधवाः॥ सब्रह्मचारिणि त्रिरात्रं। एकाचार्योपनीतः सब्रह्मचारी सुवंशजजैरोमरणे
स्वदेशराजमरणे तु दिने मरणे दिनांतराशौचं रात्रिमरणे रात्र्यंतराशौचं॥ ग्राममध्ये शवे स्थिते ग्रामस्य
तावदाशौचं। क्षत्रियादीनां भूमिरक्षार्थं अभिषिक्तानां माशौचं नास्तिभूरक्षार्थमनन्यसाध्ये व्यापारे ५६
भिवारादौ पुरोहितादेर्वाशौचं स्वविहितेषु भूपादेरनधिकार एव स्त्री विप्रार्थं गोरक्षार्थं वर्सं ग्रामे हतानां

विद्धता हतानां च सपिंडानां नाशौचं। युद्धक्षते न कालांतरे मरणे सै ग्रामेश्वरे कुलपतौ च मृते त्वेकाहं। भागिन्यां सं
स्कृतायां संस्कर्त्रा। तरि संस्कृते पुत्रे जामातरि दौहित्रे भागिनेये श्यालके तत्सुते च एतेषु सवर्णेषु सद्यः स्ना
नेन शुद्धिः। स्वल्पसंबंधे ज्ञाने स्नेवेलौमित्यादि सर्वे वर्णाः समं सवर्णानाम वर्णा भ्यां नष्टासार्यमिंत्रांभर्तुरेका २
हमाशौचं। जारजस्य त्रिरात्रं। प्रतिलोमगतानां कृतप्रायश्चित्तानां माशौचादिकं कार्यमेव। अकृतप्रायश्चित्ता
नामाशौचादिकं नास्त्येव। स्वैरिण्याद्यानामाश्रयस्य त्रिरात्रं सृन्निधौ पितुस्त्रिरात्रं॥ जाताशौचमध्ये तत्स
मतोतान्यूनेन वा जाताशौचे सति ततो न्यूने मृताशौचे सत्यपि पूर्वशेषेणैव शुद्धिः। जाताशौचमध्ये मृताशौ
चे समे लेनन्यातिमृताशौचेनैव तत्र शुद्धिः। न जाताशौचेन मृताशौचमध्ये तत्समे ततो न्यूने वा जाताशौचे मृ
ताशौचे सति पूर्वसूतकस्य स्वाशौचकाले नैव शुद्धिः॥ जन्ममरणनिमित्तस्य स्वल्पकालाशौचमध्ये दीर्घका
लाशौचे सति दीर्घकालाशौचेनैव शुद्धिः। न स्वल्पकालाशौचेन। पितृमृताशौचमध्ये मातृमृताशौचे स
तिपित्राशौचेनैव शुद्धिः। न मात्राशौचेन पितृमृताशौचमध्ये मातृमृताशौचे सति पित्राशौचं समाप्या
धिकं पक्षिण्याशौचं कुर्यात्। नापि त्राशौचेनैव शुद्धिः। मृताशौचे रात्रिमात्रावशिष्टे मृताशौचांतरे सति
पूर्वाशौचं समाप्यानंतरं द्वाभ्यां रात्रिभ्यां शुद्धिः। तस्या रात्रेश्चतुर्थयामे मृताशौचांतरे सति पश्चात्त्रिरा
त्रेणैव शुद्धिः। न पूर्वाशौचेन॥ जाताशौचमध्ये मृताशौचे सति प्रेतमुद्दिश्य दहनोदकपिंडदानादिकं का

स्मृत्य॰सा॰
५७

र्यमेव। मृताशौचमध्ये जाताशौचे सति जातकर्मादिकं कार्यमेव। मृताशौचे गते कार्यमित्येके। मृताशौचयोः सन्नि
पाते प्रेतकृत्यं कार्यमेव। जाताशौचयोः सन्निपाते जातकर्मादिकं कार्यमेव। तत्र कर्तुस्तात्कालिकी शुद्धिः। स्त्रीपुरु
षयोः समकाल एकस्मिन्दहनकाले प्राप्ते सवर्णानां समानधर्मिणां पत्नीनां पत्या सह दहनं कृत्वा उदकपिंडादिकं
पतिपूर्वं पृथक् कार्यं। सापिंड्यं तु पत्युः पश्चान्मरणे च पत्युः पूर्वं कृत्वा पत्न्याः सापिंड्यं कार्यं। असवर्णानां असमा
नधर्माणां पत्नीनां दहनादिकं सर्वं पृथगेव कार्यं। सवर्णानां समानधर्मिणां सपत्नीनां च सहदहनेनोदकदानपिं
डादिकं ज्येष्ठपूर्वं पृथगेव। सवर्णानां समानधर्माणां सपत्नीनां दहनादिकं सर्वं पृथगेव। पितापुत्रयोः सवर्णयोः
समानधर्मयोः कपालाग्निनादाह्ययोर्दाहः सहैव वा उदकादिकं पितृपूर्वं पृथगेव। भ्रातॄणां सवर्णानां समा
नधर्माणां कपालाग्निदाह्यानां सह वा दाहः। उदकादिकं ज्येष्ठपूर्वं पृथगेव। असमानानां सर्वं पृथगेव। पुंबा
लानां भ्रातॄणां स्त्रीबालानां च दहने खनने चैवं॥ अन्वारोहणं सर्वज्ञातिस्त्रीणां पतिव्रतानां प्रशस्तं
आत्मनो भर्तुश्च सर्वपापक्षयकरं नरकात्तारणमनेकफलदं मोक्षदं च। स्वर्गे तत्र आयुरारोग्यैश्वर्यपुत्र
मित्रादिसर्वसंपत्प्रदं। दुःखदारिद्र्यवैधव्यादिनाशकरमित्यादिपुराणस्मृतिषु श्रूयते। तत्रान्वारोहणं
गर्भिण्या निषिद्धं। ब्राह्मण्यां गर्भिण्यां ब्रह्महत्यासमं। क्षत्रियादिजातिगर्भिण्यां क्षत्रियादिजातिवधए ५७
व। सवर्णाया सपत्न्या सह एकचित्यारोहणं कार्यं। ब्राह्मण्या एकचित्यारोहणं कार्यं। ब्राह्मण्या एकचित्या

रोहणमेव न पृथक्चित्यारोहणं कार्यं। क्षत्रियादिस्त्रियो भर्त्रा दिदेशांतरे मृते पृथक्चित्यारोहणमेव। असवर्णायाः पृ
थक् पृथक्चित्यारोहणं कार्यं। तथान्वारोहणमेव कार्यं। अन्वारोहणं करिष्यामीति संकल्प्य पतिं नत्वा चितिमा
रुह्य सर्वप्रायोगं कारयेत्। संकल्प्य प्रयोगे कृते दह्यमाने भर्तरि तं नत्वाग्निं प्रविशेत्। चितिभ्रष्टा नारी मोहा
त्प्रचालिता च प्राजापत्यं चरेत्। सहदहने पिंडश्राद्धादौ पाकैक्यं कालैक्यं च भवति। एकचित्यारोहणे एकदिनमर
णे स्त्रियाः पृथक् सपिंडीकरणं कार्यं। भर्तुः कृते स्त्रियाश्च कृतं भवति। पृथक्चित्यारोहणे दिनांतरमरणे सर्वत्र
पृथक् पिंडादिदाने योग्यः पुत्रो दद्यात्। पुत्राभावे मिथो दंपती सपत्न्यश्च पत्न्यभावे तदभावे भ्रातृपुत्रास्नुषा
दुहिता दौहित्रमातामहौ परस्परं दत्तः। मातामह्याश्च दौहित्रः अन्यः सगोत्रः सपिंडः सब्रह्मचारी मित्रं शिष्यो
गुरुर्बांधवो धनसंबंधी वा दद्यादेत्। नपुत्रस्य पिता दद्यान्नानुजस्य तथाग्रजः। अपि स्नेहेन कर्तव्या सपिंडी
करणं विना। अदत्तानां तु कन्यानां पितरौ दत्तः पत्यभावे दत्ताया अपि पितरौ दत्तः। दौहित्रमातामहौ परस्प
रं दत्तः। मातामह्याश्च दौहित्रो जामाता श्वशुरौ मिथः श्वश्र्वादेः स्नुषा। भ्रातरो वा मिथो दद्युः। श्वश्र्वादिस्त्रीस्नु
षापतिपत्न्या सिद्धौ दत्तः। पत्न्यो न परस्परं भ्रातरो न मिथः गुरुशिष्यौ परस्परं। उक्तकर्त्रभावे यः कश्चि
त्कुर्यात्। कुर्वतः सर्वसंपत्प्राप्तिरिति देवलो ज्ञायते। एकादशाहादौ पुत्रो ज्येष्ठादियोग्यः कुर्यात्। नवश्राद्धा
नि षोडशश्राद्धानि च भक्ता विभक्ता वा एक एव कुर्यात्। सपिंडीकरणं तु विभक्ताः सधनाः पुत्राः। औरसे कस्मिन्न

वद्दिवसेद्दद्दिकामाश्चेत्पृथक्पृथक्कुर्युः। नान्यथा। तत ऊर्ध्वं सर्वं पृथगेव कुर्युः। शूद्रस्यामंत्रकं सर्वं द्विजवत्कार्यं। सर्व
त्रगोत्राज्ञानेनाम्नेव कार्यं। व्रीह्यादिद्रव्यालाभे फलेन मूलेन पयसा शाकेन गोधूमेन गुडेन वा कार्यं। दशाहांतं कृच्छ्रा
यसपाणिः स्यात्। अनाहिताग्निं यजमानं लौकिकाग्निना दहेत्। पत्न्याः पतिपरोक्षे कपालाग्नेरप्यनुज्ञास्ति। द
हनकाले अग्निनाशे दग्धकाष्ठैरग्निं मथित्वा दहेत्। दशाहं प्रेतपिंडं दत्वा स्नात्वा भुक्त्वा सपिंडस्य त्रिरात्रं। असपिंड
स्योपवासः। मत्या द्विगुणं प्रेतकृत्यं कुर्वतः संवत्सरं नार्वाक् स्त्रीसंगमे चांद्रं। ऊर्ध्वं कार्यं। अन्येषां प्रेताशौचिनां पू
र्वं त्रिरात्रं पश्चादुपवासः। प्रेतकार्यमकृत्वा तद्द्रव्यं हरन्तं तद्गुणं वधप्रायश्चित्तं कुर्यात्॥ देशांतरमरणे पराक
द्वयं अष्टौ कृच्छ्रान्वा कृत्वा दहेत्। दूरदेशांतरगते जीवद्वार्तां पुनः पुनः पर्यालोच्य पुनर्जरी वृत्तान्त्या मश्रूसमा
णयां पूर्ववयस्के विंशत्यब्दादूर्ध्वं मध्यमवयस्के पंचदशादूर्ध्वं अपरवयस्के द्वादशाब्दादूर्ध्वं वा चांद्रायणत्रयं वि
शत्कृच्छ्राणि वा कृत्वा पालाशवृंतैः कुशैर्वा प्रतिकृतिं कृत्वा दाहाशौचादिकपिंडश्राद्धानि कार्याणि। एवं कृते
पुनः स आगतश्चेत्। तं घृतकुंडे निमज्ज्य जातकर्मादिसंस्कारं तस्य कृत्वा पूर्वपत्न्या सह विवाहः कार्यः॥ अथ
श्राद्धक्रमः। तत्रादौ नवश्राद्धं। प्रथमेह्नि तृतीयेह्नि पंचमे सप्तमे नवमे एकादशेह्नि विहितं तत्र प्रथमे च ए
कादशेह्नि उत्कृष्यते न वा उत्कर्षणपक्षे तृतीयाहादिषु पंचाहर्गणसंज्ञं अनुत्कर्षपक्षे एकादशेह्नश्च कृत्य
विकल्पितत्वात्। प्रथमाहादिषु पंचाहर्गणसंज्ञं भवति। नवश्राद्धं यद्वा प्रथमाहे ×णा× तृतीयपंचमसप्तमो

हेष्वेकस्मिन्नवमाहे न एव त्र्यहर्गणसंज्ञं। नवश्राद्धं कार्यं। यद्वा तृतीयेह्नि पंचमसप्तमयोरेकस्मिन्नवमेह्नि इत्येकं त्र्यहर्ग
णमेव कार्यं। अहर्युग्मं तु न कार्यं। एवं नवश्राद्धमेकादशेह्नि वा कार्यं। तथा षोडशश्राद्धानि नवमिश्रसंज्ञानि कार्याणि।
पंचविंशतिरात्र्यंतप्रकुर्यादूनमासिकं। तानि च मासिकानि प्रतिमासं मृताहे संवत्सरविहितानि द्वादशान्यूनमासेत
थाद्वादशाहे त्रिपक्षे ऊनषण्मासे न्यूनाब्दिके चेति चत्वारि एवं षोडशश्राद्धानि सर्वतिताद्यमेकादशेह्नि उत्कृ
ष्यविपीयते। तत्र क्रमः। त्रयोदशेह्नि यश्राद्धं प्रथमं मासिकं स्मृतं। आमेनैव तु कर्तव्यं न पक्वेन कथंचन। त्रिपक्षे
द्वादशे पक्षे चतुर्विंशतिपक्षके। पक्षात्रिपंचकं कुर्याद् दत्वं मघ्यादिपंचके। एकादशाहे द्वादशाहे द्वितीये मासे त्रिप
क्षे तृतीये च तुर्थे पंचमे षष्ठे मासे न्यूनषष्ठे सप्तमे अष्टमे नवमे दशमे एकादशे न्यूनाब्दिके द्वादशे मासे चेति।
ततो परेद्युः संवत्सरांते सापिंडीकरणं। ततः परेद्युः द्वितीयसंवत्सरादावाब्दिकं तृतीयसंवत्सरादौ प्रत्याब्दिक
मिति क्रमः। यद्वा पिंडपितृयज्ञपार्वणश्राद्धार्थमग्निमान्दशाहादूर्ध्वं द्वादशाहे त्रिपक्षे वा वृद्धिश्राद्धे उपस्थिते वा ऽ
सुख्यस्यानित्यत्वाच्चानंतवत्सरात्सापिंडीकरणं कुर्यात्। तत्र षोडशैकोद्दिष्टानि कृत्वैव कार्यं। तत्रैकादशेह्नि
त्वारि श्राद्धानि संभवंति। नवश्राद्धाद्यं नवषष्ठाद्यं मासिकाद्यं स्वतंत्रैकोद्दिष्टं चेति। तत्र स्वतंत्रैकोद्दिष्टे क्रियमा
णे ऽन्येषां तंत्रेणानुष्ठानासिद्धिमिके चेत्सास्ति। अत आद्यैकोद्दिष्टं नवमिश्रमित्युच्यते। नवश्राद्धधर्मकं
नवमिश्रधर्मकं चासयदोषकं भवति। ततो विशिष्टे नवश्राद्धं ततो विशिष्टमासिकं। एषामनुष्ठानपक्षे चादौ
स्वतंत्रैकोद्दिष्टं कार्यं। तत्रासयदोषकमेव। ततो नवश्राद्धं ततो मासिकं। एकादशेह्नि एकादशब्राह्मणभोज

नंप्रेतोद्देशेनरुद्रोद्देशेनवारुद्ररूपप्रेतोद्देशेनवाकार्यं एकादशरुद्रोद्देशेरुद्रगणाइतिप्राहुः। वृषोत्सर्गश्चप्रशस्य
ते। द्वादशाहस्थानेन्यूनमासिकेक्षत्रादिषुभवति। संचयनेकृतेमनुष्यलोकात्प्रेतलोकंगच्छत्त आमेनपाथेयश्रा
द्धमेकोद्दिष्टविधिनाकार्यं। सपिंडीकरणेकृतेप्रेतलोकात्पितृलोकंगच्छत्त आमेनपाथेयश्राद्धंपार्वणविधा
नेनकार्यं। ततःपुण्याहवाचनंकार्यं। संवत्सरार्वाक्सपिंडीकरणेकृतेअनुमासिकानिपृथक्कार्याणि ए
कोद्दिष्टवत्। पार्वणावद्वाम्हताद्दश्राद्धवदनुमासिकांतेसंवत्सरविमोकश्राद्धं पुण्याहवाचनंकार्यमितिक्र
मः॥ अथसंन्यासविधिः ॥संन्यासस्यविधिंकृत्स्नंप्रवक्ष्याम्यनुपूर्वशः। गोविंदराजस्यमतंबौ
धायनमतंतथा। एकोद्दिष्टविधानेनकुर्याच्छ्राद्धानिषोडश। अग्निमान्पार्वणेनैवविधिनानिर्वपेत्स्वयं।
कृच्छ्रांश्चचतुरःकृत्वापावनार्थमनाश्रमी। आश्रमीचेत्तत्कृच्छ्रंतेनासौयोग्यतामियात्। आश्रमीव्रत
मेकंतुसंन्यासेयोग्यतांव्रजेत्। तदेवमार्षकंदिव्यंपित्र्यंमातृकमानुषं। भौतिकंचात्मनश्चांतेष्टौश्राद्धा
निनिर्वपेत्। केशश्मश्रुलोमनखान्वापयित्वोपकल्पयेत्। यष्टिंजलपवित्रंतुशिक्यंपात्रंकमंडलुं। अन
ग्निरग्निमुत्पाद्यनित्येनविधिनाततः। स्वाग्नावेवाग्निमान्कुर्यादपवर्गांतमादितः। ग्रामांतेग्रामसी
मांतेअग्न्यागारेसुरालये। आज्यंपयोदधीत्येतत्त्रिवृत्ताचैयापवासयेत्। अप्सावेग्नावप्सुवा। ॐभूःसा
वित्रींप्रविशामि। ॐतत्सवितुर्वरेण्यं ॐभुवःसावित्रींप्रविशामि ॐ भर्गोदेवस्यधीमहि ॐ स्वःसावि ५९
त्रींप्रविशामि धियोयोनःप्रचोदयात्इतिपच्छोर्धर्चशःसमस्तयावा ॐ भूर्भुवःस्वःसावित्रींप्रविशामि

तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात्इति। अन्वाधानमात्मानमात्मनाश्रमादाश्रमम
नुनीयब्रह्मभूतोभवतीतिविज्ञायते। अथाग्निमुपसमाधायसमित्पूर्णामांस्वाहेतिपूर्णाहुतिंजुहुयात्। तेन
ब्रह्मान्वाधानमितिविज्ञायते॥ अनाहिताग्नेरिष्टिरस्त्येवस्थाने वैश्वानरश्चरुः॥ अनग्नेआग्नेयंब्रह्मचारिण
इष्यते॥ अथाग्निंसमारोप्यगुरवेसर्वस्वंदत्वा ॐ भूर्भुवःस्वःसन्यस्तंमयाइतित्रिरुपांशुत्रिरुच्चैस्त्रैष्टुभ्या
हिदेवादइतिविज्ञायते। तथाचकात्यायनः। पंचायुधधरंसौम्यंसर्वाभरणभूषितं। ध्यात्वाहृदितदनुज्ञातोगु
रूणांप्रेषमीरयेत्॥ ततोऽभयंसर्वभूतेभ्योमत्तःस्वाहेतिमंत्रइतिशपांपूर्णमंजलिंनिनयति ॐ सखामा
गोपायेतिदंडंगृह्णातियदस्यपारेरजसःपारेरजसइतिशिक्यं। येनदेवाःपवित्रेणेतिजलपवित्रंसावित्र्या
कमंडलुं। सर्वाभिर्व्याहृतिभिर्ब्रह्मभाजनंगृह्णाति। ततकुर्त्यंचित्रंतच्चक्षुर्हंसःशुचिषन्नमोमित्रस्येतिनमः
सवित्रइत्यादित्यमुपतिष्ठेत्। तथाचन्यासः। करिप्रक्षालनंकृत्वाप्रणवेनमृदाबहिः। ततःस्नानेप्रकुर्वीत
मंत्रवत्तुजलाशये। तिसृष्वपिसंध्यासुअंजलिंप्रदाय ॐ भूस्तर्पयामि ॐ भुवस्तर्पयामि ॐ स्वस्तर्पया
मि ॐ भूर्भुवःस्वस्तर्पयामिइतितर्पणंकुर्यात्। अथादित्येसानो ॐ भूर्भुवःस्वरित्यंजलिंप्रदाय उदुत्यंचि
त्रंतच्चक्षुर्हंसःशुचिषदिदंविष्णुर्विचक्रमे त्रिर्दिवोब्रह्मजज्ञानमित्यादित्यमुपतिष्ठते। ॐ सर्वभूतेभ्योनमइ
त्यात्मानंप्रदक्षिणीकृत्यनमस्कुर्यात्। ॐ आदित्यायविद्महेसहस्रकिरणायधीमहि। तन्नःसूर्यःप्रचो

र्ण

अनध्यायेध्यायी बद्ध्रुतियाहीव। अन्नंरत्नंवाहृत्वा अजी व्याधिः। अत्यंतदरिद्रोवा। ज्ञानंदेवंदेवार्थेनंपुस्तकंव
मूकः। पत्रशाकंबधिरः। हेमहृत्वा निद्दे माकारीपक्षी। अत्यंतदरिद्रोवा। न्यासमपहृत्यातिदरिद्रोवा। शुभगंधान्
छुछुंदरिः राजमूषिका। धान्यानिमूषकः। तैलंतैलपायीकीटः। परस्वहर्त्तानानातिर्यक्त्वंप्राप्नोति। अद्ध्रु
तंहविरश्नन्दूरन्नश्वावदुःखीव। यानंहरन्नुष्ट्रः। फलंकपिः। जलंप्लवः। पतंगोवापक्षीमत्स्योवा। गृहोप
स्कारंगृहकारीकीटः। मधुदंशकीटः। मांसंगृध्रः। गांगोधासर्पोवा। अग्निंबकः। वस्त्रंकुष्ठीपतंगोवा। र
संश्वा। लवणंचीरिकिरिटः। तेजसंमंडली। गोदेवब्रह्मस्वंपांडुरोगी। न्यासंकाणोनपत्यावा। शय्यांक्षप
क्षणकः। शंखंमुक्तिरत्नकपाली। दीपंकौशिकः। स्नेहंक्षयी। परस्वंपरप्रेष्यः। यद्यद्रूपंहरतितत्तत्का
स्त्राणीजायते। तत्साध्यविकलोश्वा। ब्राह्मणींगत्वानिबरजी। मातरंस्नुषांवाचीतद्दूषणः। चांडालींपु
ल्कशींवाजगरः। प्रव्रजितांमरुपिशाचः। शूद्रांदीर्घकीटः। सवर्णांदरिद्रः। राजस्त्रियंनपुंसकः। गांगत्वा
न्मेडूकः। धान्यमिश्रकोतिरिक्तांगः। पिशुनोदुर्गंधनासिकः। सूचकोदुर्गंधास्यः। देवब्राह्मणाक्रोशको
खलतिः। गरदाग्निदावुन्मत्तो। गुरुप्रतिहंतापस्मारी। रोगीवा। गोघ्नोंधः। धर्मपत्नीमुत्सृज्यान्यत्रप्रवृत्तः
शब्दवेधी। व्रतलोपीकुंडाशीक्षगाक्षः। स्त्रीपण्योपजीवीषंढः। कौमारदारत्यागीदुर्भगः। मृष्टैकाशीवानरः। ६१
वातगुल्मीवा। अभक्ष्यभक्षकोगंडमाळी। क्रूरकर्मावामनः। मित्रध्रुक्क्षयी। मातापित्रोराक्रोशीखंड

कारः। अन्तवाकूस्खलद्वाक्। कूटसाक्षीउच्छिन्नजंघाचरणः। विवाहेविघ्नकर्त्ताविच्छिन्नांगः। गोदारणाच्छिन्न
हस्तः। चतुष्पथेविण्मूत्रविसर्गंउमूत्रकृच्छ्री। कन्यादूषीषंढः। ईर्ष्यालुर्मशकः। पित्राविवदमानोपस्मारी। वि
द्याविक्रयीपुरुषमृगः। वेदविक्रयीद्वीपी। बद्ध्रुयाजकोजलप्लवः। अयाज्ययाजकोवराहः। अनिर्मंत्रिताशो
जीवायसः। इतस्ततोश्नन्मार्जारः। कक्षवनदाहीखद्योतः। दारकाचार्योमुखविगंधः। पर्युषिताशी
क्रमिः। अदत्तादायीबलीवर्दः। मत्सरीभ्रमरः। अग्न्युत्सादीमंडलकुष्ठी। शूद्राचार्यश्वपाकः। वार्द्धुषिको
गहीनः। अविक्रय्यविक्रयीगृध्रः। राजक्रोशकोगर्दभः। अनध्यायेध्यायीशृगालः। मत्स्यवेधकोग
र्भवासीत्यादीन्यनूर्ध्वगमनानि॥ स्त्रियोप्येतेषुनिमित्तेषुतत्तज्जातिषुजायंते। इदानींतत्पाका
नांप्रायश्चित्तोन्मुखार्थपूर्वजन्मकर्मविपाकाद्दर्शिताः। ब्रह्महासुरापोब्राह्मणस्सुवर्णस्तेयीगुरुतल्पगः
एतेमहापातकिनः अंत्यत्तत्संयोगीपंचमस्तद्वत्। साक्षात्कर्त्तुरनुग्राहकः। आज्ञापयिताभ्यर्थिताप्रिता
उपदेशेनप्रयोजयितेतिस्वार्थपरार्थवानुमता। अनिमित्तनिर्भर्त्सनसंताडनार्थहरणादिनाकोपंज
नयन्सनिमित्तकर्त्ता। तत्रकर्त्तृषुसाक्षात्कर्त्तुरनुग्राहकस्याल्पदोषस्तस्मात्प्रयोजकस्यतस्माच्चोपदे
ष्टः प्रयोजकादनुमंतुस्तस्मान्निमित्तकर्त्तुरल्पप्रायश्चित्तंचतद्वत्। अथानुपपातकानि। ब्रह्महत्या
समानि। यागस्थंनृपवैश्यपार्थिवघ्नाराणींगतस्य। रजस्वलायाः गर्भिण्याश्चात्रिगोत्राया अविज्ञातग

भिस्यवासुहृन्मित्रस्य च वधः। विप्रगुरुविषयेज्ञाताज्ञातमिथ्याभिशंसनमधिक्षेपः। सद्रूम्मत्यानिबंधश्चराज
गामिपिशुनंगुरोमहाद्वेषो। नास्तिक्याद्वेषनिंकुशास्त्रीतंत्र्यावावेदनाशश्च॥ अथसुरापानसमानि॥
लसुनविड्वराहछत्राकग्रामकुक्कुटगृंजनादीनां मत्याभक्षणं गुरूविषये असत्याभिशंसनेनापवादित्वं।
मत्याविद्ध्वामत्युकर्तृत्वंजेत्संकौटिल्यंतद्वत्। आम्मोत्कर्षणार्थराजकुलादावनृतो। क्तिः उदक्यावक्त्रा
स्वादामित्रवधः। कूटसाक्ष्यंवेदत्यागोवेदनिंदाव। तयोरल्पभुक्तिः॥ अथस्वर्णस्तेयसमानि॥ ब्रा
ह्मणासंबंधाश्वरत्नमनुष्यस्त्रीभूधेनुहरणंनिक्षेपस्यवावाक्सुवर्णस्तेयसमानि॥ अथगुरुतल्पग
समानि॥ स्नुषाभगिनीसगोत्राचांडालीसखिभार्यातमजातिकन्यासुरेतःसेकः। तथापितुःस्वसा
रंमातुळानींमातुःसपत्नीस्नुषाभगिन्योःसकामेआचार्यपत्नीतनयांश्वश्रूंपितृव्यमातामहमातुळश्रो
त्रियार्त्विगुपाध्यायशिष्यस्त्रियमुत्तमामुदक्यांनिक्षिप्तांप्रव्रजितांव्रतस्थामुत्तमांब्राह्मणींसगोत्रांश
रणागतांसमात्सखीराजपत्नींस्वधात्रींस्वमातरंमातुःस्वसुःसखींमातुलानांसखींगच्छन्गुरुतल्प
गवद्धःपतति। तथापितृमातृत्यानिर्संबंधस्तेनोनास्तिकोनिंदितःकर्मत्यागीपतितोत्यजस्वपतित्या
गिनःपतितपातकसंयोजकाश्चाति। अनुपातकानि॥ तत्रयाज्ञवल्क्यः॥ गोवधोव्रात्यतास्तेयमृ ६२
णानांचानपक्रिया। अनाहिताग्निपण्य⸺विक्रयःपरिवेदनं। भृतकाध्ययनादानंभृतकाध्यापनंतथा॥

ग्नित्वा

पारदार्यंपारिवित्त्यंवार्द्धुष्यंलवणक्रिया। स्त्रीशूद्रविट्क्षत्रवधोनिंदितार्थोपजीवनं। नास्तिक्यंव्रतलोपश्चसु
तानांचैवविक्रयः। धान्यकुप्यपशुस्तेयमयाज्यानांचयाजनं। पितृमातृसुतत्यागस्तडागारामविक्रयः।
कन्यासंदूषणंचैवपरिविंदकयाजनं। कन्याप्रदानंतस्यैवकौटिल्यंव्रतलोपनं। आत्मनोर्थे क्रियारंभोम
द्यपस्त्रीनिषेवणं। स्वाध्यायाग्निसुतत्यागोबांधवानांतथैवच। इंधनार्थंद्रुमछेदःस्त्रीहिंसौषधजीव
नं। हिंस्त्रयंत्रविधानंचव्यसनान्यात्मविक्रयः। शूद्रप्रेष्यंहीनसख्यंहीनयोनिनिषेवणं। तथैवानाश्र
मेवासःपरान्नपरिपुष्टता। असच्छास्त्राधिगमनमाकरेष्वधिकारिता। भार्यायाविक्रयश्चैषामेकैक
मुपपातकं। गोवधःप्रसिद्धः। कालेऽनुपनीतत्वंव्रात्यत्वं। ब्राह्मणस्वर्णतत्सभादन्यपरस्वहर
णंस्तेयं। गृहीतस्यसुवर्णादेरप्रदानमृणानपाकरणं। देवर्षिपितृणांमृणानपाकरणंवासत्य
धिकारेन। ग्नित्वं। अपण्यस्यलवणादेर्विक्रयः। सोदरेज्येष्ठेभ्रातरिस्थितेकनिष्ठस्यदाराग्निहोत्रग्र
हणंपरिवेदनं। पणपूर्वाध्यापनंभृतकाध्यापनं। गुरुतल्पगतस्समव्यतिरिक्तपरस्त्रीगमनंपारदार्यं
।ज्येष्ठस्याविवाहेदाराहृत्यैकनिष्ठस्यविवाहःपारिवित्त्यं। निषिद्धवृत्त्युपजीवनंवार्द्धुष्यं। लवणस्योत्पाद
नंलवणक्रिया। अनात्रेयागर्भिण्याअपिस्त्रियोवधःस्त्रीवधः। शूद्रवधोऽविवक्षितक्षत्रवैश्यवध
श्च। अराजस्वापितार्थजीवनंनिंदितार्थोपजीवनं। परलोकाद्यबुद्धिर्नास्तिक्यं। ब्रह्मचारिणःस्त्रीसंयो

गोव्रतलोपः। देवताराधनार्थं गृहीतव्रतलोपश्च। अपत्यानां विक्रयो दासीभावार्थं। आत्मनो भार्यायाश्च
तडागारामोपवनानां च विक्रयः। द्रव्यग्रहणेन। व्रीह्यादिधान्यानां स्तेयं। असारत्रपुसीसादिकुप्यं वाग
वादः परोशश्च। जातिदुष्टशूद्रादीनां कर्म दुष्टव्रात्यादीनां याजनं भोजनं नोक्षयत्र। अपतितानां पितृ
मातृसुतानां गृहान्निर्गमस्त्यागः। अंगुल्यादिनायोनिविदारणं कन्यादूषणं। परिविदकयाजनं त
स्मै कन्याप्रदानं वा। स्वगुरौ कौटिल्यं। देवर्षिपितॄणामृणानपाकरणं च। आत्मार्थं पाकादिक्रिया।
मद्यपस्त्रियश्चोपभोगः। कुटुंबरक्षार्थमसच्छास्त्रपठनात्स्वाध्यायस्य परित्यागः। श्रौतस्मार्ताग्नी
नां संस्कारध्यकरणेन। सुतस्य वशक्तौ। बांधवानां यपातकादिदुष्टकार्यार्थमार्द्रद्रुमछेदः। भार्या
पण्यभवनं प्रयुक्तेन लब्धोपजीवनं स्त्रीजीवनं वा। स्त्रीधनोपजीवनं च। प्राणिवधेनजीवनं वा
हिंसाजीवनं। वश्याद्यं त्रौषधजीवनं। तिलादिपीडार्थं हिंस्त्रयंत्रप्रवर्तनं च। व्यसनानि मृगयादी
न्यष्टादश। शूद्रसेवा शूद्रप्रेष्यं हीनेषु मैत्री हीनसख्यं। अकृतसवर्णविवाहो हीनवर्णविवाहो
हीनयोनिनिषेवणं। साधारणस्त्रीसंभोगो गृहीताश्रमित्वमनाश्रमित्वं। परपाकरतिः परान्न
परिपुष्टता। चार्वाकादिग्रंथाभ्यासो ऽसच्छास्त्राधिगमः। सुवर्णाद्युत्पत्तिस्थानेषु राजाज्ञयाधिका ६३
रित्वं आकरेष्वधिकारित्वं। अभिचारश्चालम्बुनादरसमांसाभक्षणं मित्यादीनि॥ ॥अथ

जातिभ्रंशकरसंज्ञानि। ब्राह्मणस्यारुजकरणं। घ्रातिरघ्रेयमद्ययोर्घ्राणं। जैह्म्यं पुंसि मैथुनं। अथ संकरीकरणा
नि। खरश्वोष्ट्रमृगेभाजाविमीनाहिमहिषाणां अन्येषां ग्राम्यारण्यानां पशूनां वधः। अथापात्रीकरणानि।
निंदितेभ्यो धनादिदानं वाणिज्यं शूद्रसेवनं। कुसीदजीवनमसत्यभाषणं। अथ मलिनीकरणानि। बहुकृ
मिकीटजलस्थलजीवानां हत्या मद्यानुगतभोजनं वृक्षफलैधःपुष्पस्तेयं। अधैर्यं च॥ अन्यानि पापानि प्र
कीर्णसंज्ञानि॥ अथ महापातकप्रायश्चित्तानि अज्ञानाद्ब्राह्मणं हत्वा वाल्कलचीवरादि
वासा जटी वा पिस्त्रेन घातितस्य ब्राह्मणस्य शिरःकपाले भिक्षार्थं तद्दलाभे न्यस्य वा नाथब्रह्मणस्य वा। त
दन्यस्य वा शिरःकपालं ध्वजं दंडे धारयन्नन्यैः पात्रादिभिः केवारं पत्रामात्रादिषु मिताशी संयतस्त्रिकालं स्नायी
संध्योपासनं विधिवन्मंत्रपूर्वकं कुर्वन् अध्ययनाध्यापनप्रवचनयागदानयाजनप्रतिग्रहादिवर्जयेत्।
ब्रह्मचारी स्त्रीमधुमांसगंधमाल्यादि दिवानिद्रां अंजनाभ्यंजनोपानहच्छत्रकामक्रोधलोभमोहहर्षनृत्य
गीतपरिवादादि वर्जयेत्। सर्वभूतहित आचार्यसंदर्शनेयथापि क्रमेण स्थानासनाभ्यां विहरन् तीर्था
न्युपवसन्वने वा पुण्याश्रमे वा कुटीं कुर्वन् वा निवसन् ग्रामांते गोव्रजे वा वृक्षमूले वा निवसन् द्वादश वर्षं व्र
तेचरित्वा शुद्धिः। यदि वा पुनर्येन जीवति तदा भिक्षार्थं ग्रामं प्रविशेत्। तत्र लोहितकेन मृन्मयखंडशरा
वेणवा गृहद्वारि स्थितो। ब्रह्महास्मीति स्वपापं प्रख्याप्य सप्तागारं रक्ष्यापक्ष्य विवेकेन वा चातुर्वर्ण्ये त्रै

स्मृत्य॰सा॰ ५८ न

वर्ण्यं वा भिक्षां याचयित्वैककालमेव मिताशी द्वादशाब्दव्रतं चरित्वा शुद्धिः। यद्वा द्वादशाब्दं नियतः प्राजापत्यकृ
च्छ्रं निरंतरमावृत्य षष्ठ्याधिकत्रिशतं चरित्वा शुद्ध्यति। द्वितीये ब्रह्मवधे द्विगुणं प्रायश्चित्तं। तृतीये त्रिगुणं।
चतुर्थे निष्कृतिः। यद्वा चतुर्थादिषु प्रतिपापं गोसहस्रं निर्द्धनोऽग्निप्रवेशं मरणांतिकं कुर्यात्। अज्ञा। तिवर्षा
तं स्वयमेव चरेयुः। गुरुप्रायश्चित्ते लघुप्रायश्चित्तस्य। तत्रशाव प्रसंगादनुष्ठानाच्छुद्धिः। सोमयागस्थ ब्राह्म
णवधे द्विगुणं व्रतं। तदशक्तौ गवां सहस्रं विधिवत्पात्रेभ्यो दद्यात्। आचार्यवधे द्वादशाब्दव्रतं गोसहस्रं च।
उपाध्यायवधे गवक्रन्नवत्नेषु त्रक्रत्विग्वधे द्वादशाब्दव्रतादूर्ध्वं गोसहस्रं पादोनमर्द्धपादं चरेत्। इत्या
दि ब्रह्महननेतारतम्यकूल्प्यं। तथा लिंकृक्षत्रं गुरुवधे यावज्जीवं व्रतं चरेत्। त्रिगुणं वा तुर्गुणं वा। तदश
क्तौ द्वादशाब्दं व्रतं कृत्वा गोसहस्रं कुर्यात्। अथ यदि द्वादशाब्दव्रतमध्ये चारण्या धाद्ये हन्यमान
मेकं वात्मानमंतरे कृत्वा रक्षेत्। असावसंपूर्णद्वादशाब्दोऽपि तद्दैव शुद्धिः। यदि [illegible] हन्यमानयोर्गुण
विशेषेण प्रायश्चित्तविशेषो ज्ञेयः। तत्र प्रवृत्तस्तदकृत्वे वं त्रियते तथापि तद्दैव शुद्ध्येत्॥ ज्ञान ब्राह्म ५८
णवधे सत्वारो वर्णा भृगुपतनमग्निपतनं वा कुर्युः। तत्रयेत्रैवर्णिका इष्टप्रथमयज्ञास्तेग्निपतनोऽस्व
र्जितां गुष्ठादिपरार्श्वमेधादि महायज्ञावभृथे यजमानसन्निधौ स्वपापं प्रख्याप्यैतैरनुज्ञा
तः स्नात्वा तद्दैव शुद्ध्येत्। यद्वा व्रतमध्ये कुष्ठादिदीर्घतीव्रव्याधिग्रस्तब्राह्मणं गां वा औषधैः संरक्षयत

त

दैव शुद्ध्यति। यद्वा व्रतमध्ये विप्रस्य स्वहेमादि सर्वस्वं चौरैर्हृतं सर्वं दत्वा शुद्ध्येत्। तत्र प्रवृत्तस्तैर्हतोऽभावद्भुक्षतो मृ
तकल्पो जीवन्नपि तद्दैव शुद्ध्येत्॥ ज्ञाना ब्राह्मणवधे चतुर्वर्णा भृगुपतनमग्निपतनं वा कुर्युः। [illegible]यत्रैव
र्णिकाः इष्टप्रथमयज्ञास्तेग्निपतनं वा स्वर्जितं गोसवमभिजिद्विश्वजितौ त्रिवृदग्निष्टुतौ वा व्रतं वा नेमि साल्प
दक्षिणाः कुर्युः। क्षत्रियः सार्वभौमश्चेदश्वमेधं कुर्यात्। अयज्ञानास्त्रैवर्णिकाः साग्निका महापापं कुर्युः।
तदग्निनाऽदोषक्षया नृपुत्रादयो रक्षेयुः। ज्ञाना वेद्व्याग्निं शमयेत्। चेतानिकान स्रुचु प्रक्षिपेत्। ततोऽग्निना
प्रायश्चित्ताकरणे कुर्वतां मरणे चैवं सपरिच्छेदं। विद्वांश्चेन्निर्द्धनो गुणी हंता हतो निर्गुणोऽरण्ये नियतस्त्रि
वारं वेदं जपेत्। तदशक्तश्चेद्वेदं जपन्योजनशतं व्रजेत्। अविद्वांश्चेन्निर्धनो गुणी कृशः प्रस्रवणादाषष्ठि
मादधः प्रतिस्रोतं सरस्वतीं हविष्यमिताशी गच्छेत्। निर्गुणो धनी हंता चेत्पात्रेभ्यो यावज्जीवनसमर्थं द
द्यात्। गृहावासोपस्कारमुक्तं जीवसमर्थं दद्यात्। अनपत्यश्चेत्सर्वस्वं प्रयच्छेत्। तदीयमन्यतमं गृही
त्वा आहिताग्निर्वैश्वानरेष्टिमनाहिताग्निर्वैश्वानरस्थालीपाकं कुर्यात्। हंता मूर्खो निर्द्धनो विप्रमा
त्रवधे धःशायी त्रिषवणस्नायी स्वकर्म वेदयन् भैक्षाशी महानदीसंगमादिषु पुण्याश्रमगोष्ठपर्वत
प्रस्रवणतपोवनविहारिस्थानवीरासनी वत्सरं कृच्छ्रं चरित्वा रत्नहेमगोधान्यतिलदधिसर्पींषि विप्रेभ्यो
दद्यात्। मनसा ब्रह्मवधे व्यवसाय कृत्वा स्वयमेवोपरतो द्वादशाहं एककाशी द्वादशाहमुपवसेत्। इत्या

यत्रसमेषुविकल्पोविषयेषुव्यवस्थाकल्पनीया। उक्तानिद्वादशाब्दादीनिब्राह्मणस्यैवद्विगुणं। क्षत्रियस्यत्रिगुणं। वै
श्यस्यचतुर्गुणं। तत्रापिहंतृहन्यमानयोर्गुणविशेषेणप्रायश्चित्तविशेषोज्ञेयः। एवंक्षत्रियवैश्यादावपि
हीनोत्कृष्टवधेप्रायश्चित्ततारतम्यं। दंडगोरवाल्कल्प्यं। अनुलोमप्रतिलोमजानांतुदंडवत्प्रायश्चित्तं गृहस्थात्
द्विगुणंब्रह्मचारिणोवानप्रस्थस्यत्रिगुणं। ब्रह्मचारिणोद्विगुणंषोडशाब्दादूर्ध्वमेव। सर्वत्रप्रक्रांतप्रायश्चित्त
स्यमरणेतदैवशुद्धिः॥ अथातिदेशः॥सोमयागस्थक्षत्रवैश्यवधेब्रह्महत्याव्रतंद्वादशाब्दंचरेत्। ज्ञानाच्च
द्विगुणमेवानप्राणांतिकं। तत्रवजातिशक्तिगुणाद्यपेक्षयाव्यवस्थासर्वत्र। स्त्रीपुंनपुंसकत्वेनाविज्ञातगर्भ
स्यवधेतु। मत्वात्रेयीअत्रिगोत्रावात्रेयीतस्याश्चवधेयथावधेपुरुषहत्यावत्। व्यवहारेसाक्षात्सत्योक्त्या
वर्णानांवधप्राप्तौसाक्षीच। गुरोक्रोधावेशीवा ब्राह्मणनिक्षेपहृच्च। आहिताग्निब्राह्मणभार्याचसगुणासो
मयागस्थघातकोब्रह्महत्याव्रतंचरेत्। अतिदेशेषुपादोनंप्रायश्चित्तं॥ ॥प्रायश्चित्तातिदेशेनापातित्य
स्यच। ब्राह्मणादिवधार्थशस्त्रप्रहारेकेनचित्प्रतिबंधेनासोनमृतः। तथापिब्रह्महत्यादिव्रतंपादोनं
चरेत्। आगतमनेर्द्धं। प्रयत्नेपादः। ब्रह्महत्यासमानानांमुर्द्धप्रायश्चित्तंसर्वत्र। साक्षात्कर्तुरनुग्राहक
स्यपादोनं। प्रयोजकस्यार्द्धं। अनुमंतुःसार्द्धपादं। निमित्तकर्तुःपादं प्रोत्साहकादीनांतुतरतम्येनविधानं।
सर्वत्रबालवृद्धस्त्रियोरोगिणश्चसाक्षात्कर्तृत्वेपिप्रायश्चित्तार्द्धमर्हंति। अशीतिवर्षादूर्ध्ववृद्धःषोडशा

ब्दात्प्राग्बालः। अनुपनीतानांबालानांकन्यानांचपादप्रायश्चित्तं। तत्रपिताभ्रातावान्योवासुहृत्सुतश्चरेत्।
ततोद्वादशाब्दातेतेश्चाचरेयुः। ऊर्ध्वंस्वयमेवचरेयुः। सर्वत्रजातिशक्तिगुणाद्यपेक्षयाव्यवस्था॥ इति
स्मृत्यर्थसारेब्रह्महत्याप्रायश्चित्तं॥ अथसुरापानप्रायश्चित्तं ॥तत्रमुख्यासुरापैष्टीगौडीमाध्वी
च। तत्रसुरांत्रैवर्णिकास्तथाशूद्रश्चस्त्रीचचातुर्वर्ण्यविवाहेऊढस्त्यादिनपिबेत्। यदिसुरांज्ञानात्सकृत्पिबे
त्। तत्रसुरांबुगोमूत्रक्षीरघृतानामन्यतममग्निसंभिन्नंपत्वार्द्रवासालोहेनपात्रेणायसेनताम्रेणवापी
त्वामरणाद्बुद्ध्येत्। अज्ञानात्जलबुद्ध्यासुरापानेजटीबालचीरादिवासाब्रह्महत्याव्रतंतत्चिह्नवर्जंद्वाद
शाब्दंसंपूर्णंकुर्यात्। पादोनंसर्वत्रस्त्रीबालवृद्धादीनांवार्द्धंषडब्दं। अनुपनीतानांकन्यानांचपादं त्र्यब्दं
मचविधानं। ज्ञानाच्चेत्तद्द्विगुणं। यदिपीत्वाछर्दितवान्त्र्यब्दं रात्रौसकृत्पिण्याकमेवद्दिवान्नंनाश्नीया
त्। कणान्नंतथैववाद्यात्। सुरापानेतालुमात्रसंयोगेवर्षंबालवासाजटीध्वजीतथाकुर्यात्। सुरैकोषधरो
त्। कणान्नंतथैववाद्यात्। सुरापानेतालुमात्रसंयोगेवर्षंबालवासाजटीध्वजीतथाकुर्यात्। सुरैकोषधरो
गार्थपानेत्वज्ञानेकृच्छ्रार्द्धपादंचांद्रायणंवाकृत्वापुनरुपनयनंकार्यं। बालेतुतत्रपितामाताभ्रातावाकु
र्यात्। ज्ञानेतुतत्तत्कृच्छ्रपराकंचांद्रायणंचक्रमात्कुर्यात्। सुरासंस्पृष्टपानमार्द्धभक्षणेचांद्रोसुराभांडो
दकपानेचसुरापानमेवो। सुरासंस्पृष्टशुष्कुरसान्नस्यमूत्रविड्रेतःप्राशनवादीनांचज्ञानाद्भक्षणेकार्यंपुन
रुपनयनंच। शुष्कसुराभांडोदकपानेषड्दिनंउपवासोघृतप्राशनंच। तज्जलंपर्युषितंपीत्वाशंखपुष्पी

स्मृत्य॰ सा॰ ६६

विपक्वं क्षीरं त्र्यहं पिबेत्। अज्ञानाभ्यासे पंचरात्रं पिबेत्। सुरापस्य मुखगंधस्याघ्राणे सोमपाश्चेदप्सु प्राणाया न
मान्कुशोदकं वा द्रुः। असाक्षात्सुरागंधघ्राणे तु जातिभ्रंशकरेषूक्तं। सांतपनं मत्या वेत्कार्यं ज्ञेयमिति॥ इति सुराप
नप्रायश्चित्तं॥ ॥अथ मद्यपानप्रायश्चित्तं॥ तत्र गौडी माध्वी सुरा। मद्यं तालं पानसं द्राक्षं माधूकं खार्जूरं सै
रमारिष्टं मैरेयं नारिकेलं मेतान्येकादश मद्यानि विद्यात्। एतानि मद्यादीनि उत्पत्त्यादि ब्राह्मणानां स्त्रीणां चा
नुपनीतस्य कन्यसाश्चापेयानि। क्षत्रियवैश्ययोर्मद्यं न दुष्यति। अज्ञानाज्ज्ञानबुद्ध्या तालादिमद्यपानेत
प्तकृच्छ्रं पुनरुपनयनं वा मूत्रविड्रेतःप्राशनादि भक्ष्ये द्विजानां चैवं। अज्ञानाद्गौडीमाध्व्योः ज्ञानात्तालादिम
द्येषु पाने कृत्वातिकृच्छ्रं चांद्रायणं कृत्वा पुनरुपनयनं घृतप्राशनं वा गौडीमाध्व्योर्ज्ञानात्पाने तु पिप्या
केन कोणवर्तित्रैवार्षिकं। अत्याभ्यासे षडब्दं। अत्यंताभ्यासे निरंतराभ्यासे द्वादशाब्दं। बहुकालाभ्यासे
षु अग्निवर्णमद्यं पीत्वा मृतः शुद्ध्येत्। तालादिषु तदर्द्धं कल्प्यं। सर्वत्र स्त्रीबालवृद्धादीनामर्द्धं। अनुपनी
तस्य कन्यायाश्च पादं। माता भ्राता पिता वा पितृ तेषां कुर्यात्। तालादिमद्यायपेयालि ह्यामक्ष्यमूत्रवि
ड्रेतःप्राशनादीनां मुखमात्रप्रवेशे क्षीरोदुंबरबिल्वपलाशकुशोदकं षडरात्रं पिबेत्। गौडीमाध्व्योस्तु ६६
द्विगुणं। अज्ञानाद्गौडीमाध्वीमद्यं वासितशुष्कभांडांबुपाने कुशमूलविपक्वं क्षीरं त्र्यहं पिबेत्। अ
न ज्ञाताभ्यासे तु क्षीरोदुंबरबिल्वपलाशकुशोदकं त्र्यहं। ज्ञानात्पाने शंखपुष्पीसृतं क्षीरं पंचरात्रं पिबेत्।

ज्ञानताभ्यासे तु गोमूत्रयावकं सप्तरात्रं। अत्यंताभ्यासे ब्राह्मीसुवर्चलां पयसा द्वादशरात्रं। तालादिमद्यभांडोदक
पानेषु अर्द्धं कल्प्यं। सर्वत्र स्त्रीबालादीनां योग्यं कल्प्यमित्यादि॥ इति स्मृत्यर्थसारे मद्यपानप्रायश्चित्तं ॥ अ
थ स्वर्णस्तेयप्रायश्चित्तं। स्तेयशब्देन समक्षं परोक्षं वा बलाच्चौर्येण वा क्रयादिस्वत्वहेतुं विना ग्रहणमुच्यते। तत्र
सुवर्णप्रमाणमुच्यते। गवाक्षागतसूर्यरश्मिमध्ये दृश्यमानं त्रसरेणुप्रमाणमित्युच्यते रजः। त्रसरेणवष्टा
नां लिक्षा। लिक्षात्रयं राजसर्षपः। राजसर्षपत्रयं गौरसर्षपः। गौरसर्षपषट्कं यवः। यवत्रयं कृ
ष्णलः। कृष्णलपंचकं माषः। माषषोडशकं सुवर्णं। अमत्या ब्राह्मणस्य सुवर्णं हृत्वा द्वादशवर्षाणि ब्रह्मह
त्याव्रतं। शवशिरोध्वजस्तत्कपालधारणरहितं चरेत्। यस्य कस्यापि हिरण्यं यः कश्चिद्धरति तं सेस्येकाद
शगुणं दत्वा प्रायश्चित्तं समाचरेत्। गुरूणामग्निकर्तॄणां श्रोत्रियाणां वा धार्मिकब्राह्मणानां वा सुवर्णं हृ
त्वाऽऽत्मनो मुंडनं कृत्वाऽऽत्मशरीरं घृतेनाभ्यज्य करीषाच्छादितो दग्धः शुद्ध्येत्। निर्गुणविप्रसुवर्णहरणे
न वाष्टमी दशमे वा चरेत्। क्षुत्क्षामकुटुंबरक्षणार्थं हरणे कृच्छ्रं षडब्दं स्वार्जितादिकं दत्वा कुर्यात्। मत्यायःक
श्चिद्ब्राह्मणसुवर्णहारी। एकसुवर्णमारभ्य स्वपापं भूपाय निवेद्य आयसं दंडं खादिरं वा प्रदाय मुक्तकेशो
स्कंधाराद्धा सकृद्दंडेन ताडितो मृतो वा जीवन्वा शुद्ध्येत्। स्वशक्त्या ताडने राज्ञो दोषः स्यात्। सुवर्णास्ते
यी ब्राह्मणो व्रतमेवाचरेत्। न देहनाशमानं घातयेत्। न वधि प्रं राजा हन्यात्। हनने ब्रह्महत्या भवत्येव। अग्नि

स्व

होत्री धार्मिकश्च श्रोत्रियो विद्वान् ब्राह्मणसुवर्णहारी अश्वमेधेन यजेत् शुद्धो भवति। गोसवयज्ञेन वा आत्मसं
मितं हेम दत्वा वा शुद्ध्येत्। तावद्धनाभावे तपस्य शक्तो विप्रस्य कुटुंबरक्षणपर्याप्तं धनं दद्यात्। अब्राह्मण
श्च ब्राह्मणसुवर्णहारी दंडताडनेन मरणमनिच्छन् सुरापानव्रतं कृत्वा शुद्ध्येत्। यदि त्वप्रहारानंतरं ज्ञा
तानुतापः प्रत्यर्पयति त्यजति वा तत्रापस्तंबोक्तं चतुर्थकालमिताशने त्र्यब्दं। मनसा स्वर्णस्तेये प्रवृत्तः स्व
यमेवोपरतश्चेत् द्वादशाहं वायुभक्षः शुद्ध्येत्॥ सुवर्णस्तेयसम अश्वरत्नमनुष्यस्त्री भूधेनुहरणा
दिषु सुवर्णस्तेयप्रायश्चित्तार्द्धं कार्यं। त्रसरेणुप्रमाण हेमस्तेये एकः प्राणायामः। लिक्षाप्रमाणस्तेये
त्रयः। राजसर्षपप्रमाणहेमस्तेये चत्वारः। षड्वा सु प्राणायामाः। गौरसर्षपप्रमाणहेमस्तेये अष्टसहस्रं गा
यत्रीजपः गोमूत्रपक्वयवभुक् मासत्रयेण शुद्ध्येत् जपः। यवप्रमाणहेमस्तेये प्रातरारभ्य सायंकालांतं गा
यत्रीजपः। कृष्णलप्रमाणहेमस्तेये सांतपनं। माषप्रमाणहेमस्तेये गोमूत्रपक्वयवभुक् मासत्रयेण शु
द्ध्येत्। सुवर्णप्रमाणात् किंचिन्न्यूनहेमस्तेये गोमूत्रपक्वयवभुक् संवत्सरेण शुद्ध्येत्। संपूर्णप्रमाणब्रा
ह्मणहेमस्तेये द्वादशाब्दं व्रतादिकार्यमित्युक्तं। सुवर्णप्रमाणान्न्यूनरजतस्तेये सांतपनं। निष्कचतुष्क
प्रमाणादूर्ध्वं दशनिष्कांतरजतस्तेये चांद्रायणं। दशनिष्कप्रमाणादूर्ध्वं शतनिष्कप्रमाणरजतस्तेये चा ६७
द्रद्वयं। शतनिष्कादूर्ध्वं सहस्रनिष्कांतरजतस्तेये चांद्रत्रयं। सहस्रप्रमाणनिष्काधिकरजतस्तेये पा

यः

दोनं ब्रह्महत्याव्रतं चरेत्। नागवंगापस्ताम्रपित्तलकांस्यानां सहस्रनिष्कप्रमाणानां तं स्तेये पराकः। एतेषां निष्कस
हस्रादिमूल्यानां स्तेये ब्रह्महत्याप्रायश्चित्तं द्वादशाब्दिकं। चतुर्निष्कमूल्यरत्नस्तेये सांतपनं। चतुर्निष्कमूल्या
दूर्ध्वं दशनिष्कमूल्यांतरत्नस्तेये चांद्रं। दशनिष्कप्रमाणादूर्ध्वं शतनिष्कमूल्यांतरत्नस्तेये चांद्रद्वयं। शत
निष्कमूल्यादूर्ध्वं सहस्रनिष्कमूल्यांतरत्नस्तेये चांद्रत्रयं। सहस्रमूल्यादधिकरत्नस्तेये ब्रह्महत्याप्रा
यश्चित्तं। पादोनं नवाब्दं। अब्राह्मणस्य निक्षेपसुवर्णं हृत्वा षडब्दं चरेत्। नराश्वभूमितुरंगहरणे षडब्दं॥
॥ इति सुवर्णस्तेयप्रायश्चित्तं ॥ अथ गुरुतल्पगप्रायश्चित्तं। तत्र जनको गुरुः। तल्पं तस्य भार्या
च्यते। अज्ञाने मातरं गत्वा मातृसपत्नीं सवर्णां उत्तमवर्णां वा तया प्रोत्साहितो ऽज्ञानात् ज्ञानाद्वा गत्वा वा
पिता लोहीं स्त्रियं सुतप्तामालिंग्य मृतः शुद्ध्येत्। सुप्त्वा यद्वा शयने सुप्त्वा मृतो वा शुद्ध्येत्। उभयप्रोत्सा
हे सुतप्तायःशयने तत्स्यालिंगनाच्छुद्धिः। स्वयं प्रोत्साह्य गतश्चेत् स्वस्य गुह्यं सवृषणं स्वहस्ते छित्वा स्वां
जलिना धृत्वा नैरृतीं दिशं गच्छन् यत्र तस्थितिमविचारयन् पृष्ठतोऽपश्यन् प्राणांतं गत्वा शुद्ध्येत्। असम
त्यासवर्णोत्तमवर्णास्त्रीगमने द्वादशाब्दं ब्रह्महत्याव्रतं चरेत्। असत्याभ्यासे पतितश्च क्रोधमुद्रितः करी
षराशिमध्यस्थः पादादिसर्वांगदाहान्मृतः शुद्ध्येत्। जनन्यामसत्या चैव। जनन्यामसत्या प्रवृत्तो रेतःसे
कात्प्राङ्निवृत्तस्य द्वादशाब्दं। असत्या षडब्दं। सवर्णोत्तमवर्णासु असत्या प्रवृत्तो रेतःसेकात्प्राङ्निवृत्तस्य षडब्दं।

अमत्यामातुःसपत्नींसवर्णांव्यभिचारिणींगत्वावेदजपसहितंचांद्रद्वयं। मत्वा द्वंद्वकृच्छ्रंक्षत्रियांपितृभार्यांमत्वावि
प्रःसकृद्गत्वानवाब्दंचरेत्। मत्वाभ्यासेतुवृषणौविनालिंगछेदाच्छुद्ध्येत्। अमत्यासकृद्गमनेत्रैवार्षिकमभ्यासकाला
ज्ञानेअमत्याभ्यासेलिंगंविनावृषणछेदाच्छुद्धिः। क्षत्रियायांमत्याप्रवृत्तस्यरेतःसेकात्प्राङ्निवृत्तौतयाप्रो
त्साहितस्यत्रैमासिकंकार्यं। उभयप्रोत्साहप्रवृत्तस्यअतिकृच्छ्रत्रैमासिकं। स्वेनप्रोत्साहितायांकृच्छ्रातिकृ
च्छ्रत्रैमासिकं। तत्रैवमत्याप्रवृत्तस्यरेतःसेकात्प्राङ्निवृत्तस्ययोषिदुभयोत्साहप्रोत्साहेषुक्रमादतिकृच्छ्रत
प्तकृच्छ्रचांद्राणि। वैश्यायांगुरुतल्पांमत्यासकृद्गमनेषडब्दंचरेत्। मत्वाभ्यासेलिंगार्धछेदनाच्छुद्धिः। अ
मत्यासकृद्गमनेत्र्यब्दं। अमत्याभ्यासेयावज्जीवंव्रतंचरेत्। वैश्यायांमत्याप्रवृत्तस्यरेतःसेकात्प्राङ्नि
वृत्तस्योभयथात्मायोषित्प्रोत्साहेषुक्रमात्तप्तकृच्छ्रपराकसांतपनमासानि। अमत्याप्रवृत्तस्ययोषिदु
भयात्मप्रोत्साहेषुक्रमात्र्यंबरात्रसप्तरात्राष्टरात्राणि। शूद्रांगुरुभार्यांमत्यामत्याविप्रःसकृद्गत्वात्र्यब्दं
चरेत्। मत्याभ्यासेद्वादशाब्दं। अमत्यासकृद्गमनेब्दंकार्यं। मत्याभ्यासेनिरंतरंचांद्रत्रयं। शूद्रायांम
त्याप्रवृत्तस्यरेतःसेकात्प्राङ्निवृत्तस्ययोषिदुभयात्मप्रोत्साहेषुक्रमादतिकृच्छ्रतप्तकृच्छ्रपराकाः। त
त्रैवामत्याप्रवृत्तस्यकार्यंसांतपनंसप्तरात्रोपवासः। एवंक्षत्रियपुत्रस्यवैश्यायांमातरिमत्यासकृ ६९
द्गमनादिषुनवाब्दादीनियोज्यानि। वैश्यपुत्रस्यशूद्रायांनवाब्दादीनियोज्यानि। सर्वत्रग

मनंचमैथुनधातुविसर्गांतमुच्यते। सर्वत्ररेतःसेकात्प्राङ्निवृत्तौमरणांतिकेद्वादशाब्दमन्यत्रार्धंकार्यं। पुरुष
वत्स्त्रीणांमहापातकानिसंत्येव। अतस्तासांमत्याप्रवृत्तौमरणांतिकप्रायश्चित्तं। अमत्याप्रवृत्तौद्वादशा
ब्दादिषुसर्वत्रार्धव्रतंकृत्वाकृच्छ्रसायोज्यं। पुरुषोक्तवत्कार्यं॥ जात्युत्कर्षपारदार्यवत्कन्यादूषणमेवच। साधा
रणास्त्रियांनास्तिगुरुतल्पत्वमेवच॥ अथातिपातकानिउच्यंते। उपपातकानिउच्यंते। मत्वासमान
गोत्रांसमानप्रवरांमूढांगत्वागुरुतल्पगव्रताच्छुद्ध्येत्। तज्जोगर्भश्चांडालःस्यात्। सापत्नीसंभोगेत्या
ज्यारक्ष्यैव। अमत्योढांगत्वात्रिचांद्रैःशुद्ध्येत्। गर्भःकश्यपःस्यात्। सवर्णकन्यांमित्रस्त्रियंभगिनीं
सजातीयांसमानगोत्रांचंडालीमातंगीवात्मजस्त्रियंसकृदज्ञानाद्गत्वाचांद्रद्वयाच्छुद्ध्येत्। ज्ञानात्स
कृद्गमनेकृच्छ्राब्दाच्छुद्धिः। आसाम[redacted]तमामे[redacted]स्यां रात्रौबहुवारंगत्वाब्रह्महत्याव्रतं। त्रैवार्षिकंच
ने रेत्। आसामन्यतमामेकदिनेषुगत्वाब्रह्महत्याव्रतंषडब्दंचरेत्। आसामेकांबुद्धिपूर्वंबहुदिनेषु
गत्वाग्निंप्रविश्यमृतःशुद्ध्येत्। मातृष्वसारंपितृष्वसारंआचार्यभार्यांआचार्यपुत्रीअनुजपत्नीं
निजात्मसुतांमातुलानींसकृदज्ञानाद्गत्वाअब्दकृच्छ्रेणशुद्ध्येत्। आसामेकामेकस्मिन्दिनेबहु
वारंगत्वात्रैवार्षिकंब्रह्महत्याव्रतंचरेत्। आसामेकांबहुदिनेषु[redacted]अनुबंधनबुद्धिपूर्वंगत्वाब्रह्मह
त्याप्रायश्चित्तंकुर्यात्। आसामेकांसकृदज्ञानाद्गत्वात्रैवार्षिकंब्रह्महत्याव्रतंचरेत्। आसामेकांमे

स्मृत्य० सा०
६९

कस्मिन्दिनेसकृत्ज्ञानाद्गत्वा षडब्दं ब्रह्महत्याव्रतं चरेत्। आसामेकां बहुदिनेषु बुद्धिपूर्वं गत्वाग्निं प्रविश्य मृतः शुद्ध्ये
त्। चंडालीं पुल्कसीं व्याधस्त्रियं भगिनीं स्नुषां मातृष्वसारं पितृष्वसारं सखीं विश्वस्तां प्रव्रजितां मातुलानीं श
रणागतां म्लेच्छपुरस्त्रियं शिष्यपत्नीं गुरुपत्नीं पतितां सगोत्रां च गत्वा रेतोनिःसरणात्पूर्वं निवृत्तस्य मासोपवा
सेन शुद्धिः। चांद्रायणेन वा। एतासु व्यभिचारिणीं यदि सकृद्गच्छेद्द्वाचांद्रायणेन शुद्धिः। अज्ञानात्तां स्त्रियं सकृ
द्गत्वा तप्तकृच्छ्रेण शुद्धिः॥ इति गुरुतल्पगप्रायश्चित्तं अथ महापातकिसंसर्गिप्रायश्चित्तमुच्यते॥
एतैर्महापातकिभिश्चतुर्भिरध्ययनाध्यापनविवाहादियजनयाजनसहभोजनानि कृत्वा सद्यः पातित्यमा
प्नोति। एतैरेकासनस्थितिमेकपंक्तिभोजनमेकशयनस्थापनमेकवाहनगतिं च एकसंवत्सरं सेवकृत्वा
पातित्यमाप्नोति। येन महापातकिना यः संसर्गं पतितः स तस्योक्तव्रताच्छुध्येत्। अस्य मरणोत्पादकं प्रायश्चित्त
स्थाने ब्रह्महत्याव्रतं द्वादशाब्दिकं स्यात्। अज्ञानाद्यस्य येन संसर्गो जातस्तस्य तदुक्तव्रतार्द्धेन शुद्धिः। अ
ज्ञानाच्चतुर्भिर्महापातकिभिः पंचरात्रसंसर्गे त्रिरात्रं दशरात्रसंसर्गे कार्यं कृच्छ्रं द्वादशरात्रसंसर्गे सांतपनं। पक्ष
संसर्गे दशोपवासाः। माससंसर्गे पराकः। त्रिमाससंसर्गे चांद्रायणं षण्माससंसर्गे चांद्रद्वयं। किंचिन्न्यूनाब्दं नैरं
तर्यसंसर्गे षण्मासकृच्छ्रः। ज्ञानाच्चतुर्भिर्महापातकिभिः पंचाहसंसर्गे कृच्छ्रः। दशाहसंसर्गे तप्तकृच्छ्रः। द्वाद ६९
शाहसंसर्गे दशोपवासाः। पक्षसंसर्गे पराकः। माससंसर्गे चांद्रं। त्रिमाससंसर्गे कृच्छ्रचांद्रौ षण्माससंसर्गे

त्रिमासकृच्छ्रः। किंचिन्न्यूनाब्दसंसर्गे चांद्रायणद्वयं। एतैश्चतुर्भिः संसर्गे स्त्रीबालवृद्धातुरास्तदुक्तव्रतार्द्धं कुर्युः। महापा
तकिसंसर्गिसंसर्गे तु तत्संसर्गिव्रतस्यार्द्धं कार्यं॥ इति स्मृत्यर्थसारे संसर्गिप्रायश्चित्तं ॥ अथोपपातकप्रा
यश्चित्तान्युच्यंते॥ अज्ञानाद्ब्राह्मणस्य गोमात्रं ब्राह्मणो हत्वा त्रिरात्रमुपोष्य वृषभैकादशगा दत्वा शुद्ध्यति।
द्वादशप्राजापत्यैर्वा। प्रत्याम्नाये द्वादशधेनूर्वा दत्वा शुद्ध्यति। ज्ञानाच्चेद्गोहितो गोरगमनस्थानासनशयनेषु स्वयं
न तथा कुर्वन्भयव्याधिक्षुत्पिपासाशीतादिभ्यो रक्षन्नात्मीयपरकीयभक्षपानेष्ववारयन्नवदन्रात्रौ गां नत्वा
वीरासनो न वज्राकाद्याहारो मासत्रयांते वृषभैकादशगा दद्यात्। अशक्तः सर्वस्वं दत्वा शुद्ध्यति। प्राजा
पत्यप्रत्याम्नायपक्षे तु पूर्वोक्तद्विगुणं। अज्ञानात्क्षत्रियस्य गोमात्रं हत्वा गोहितो गोनुगामी गोष्ठशायी त्रि
षवणस्नायी संयतः पंचगव्यं पिबेत्। मासांते धेनुं दत्वा शुद्ध्येत्। षट्प्राजापत्यैर्वा। प्रत्याम्नाये षड्धेनवो
देयाः। ज्ञानाच्चेच्चतुर्थकाले हविष्यमक्षारलवणं मिताशी अनुगोमूत्रस्नायी द्वौ मासौ नीत्वा शुद्ध्येत्। प्रा
जापत्यप्रत्याम्नाययोर्द्विगुणो। अज्ञानाद्वैश्यगोमात्रं हत्वा गोहितादिकृद्दतिकृच्छ्रनिरतः सन्मासांते धे
नुं दत्वा शुद्ध्यति। येन प्राजापत्यैर्वा प्रत्याम्नाये पंचधेनूर्दद्यात्। ज्ञानाच्चेद्वैश्यस्य गोमात्रं हत्वा तद्द्विगुणं स
वेत्। अज्ञानाच्छूद्रस्य गोमात्रं हत्वा गोहितादिकृत्प्राजापत्यं निरंतरं चरन्मासांते धेनुं दत्वा शुद्ध्यति। प्रत्या
म्नाये धेनुचतुष्कं। ज्ञानाच्चेत्कृतवधगोचर्मणा ईषत्संवृतो गोष्ठे वसन्षण्मासं यवागूं पिबन्शुद्ध्यति। प्रत्या

प्रायश्चित्तप्रत्याम्नायोवृद्धिगुणो। अकामीसोमयागस्थश्रोत्रियस्यगोमात्रंहत्वागोहितादिकृच्छ्राकादिभु
गद्वांनेवृषभैकादशीदद्यात्। गोग्रासमुख्यप्राणमासैर्वाशुद्धः। कामात्वेद्गोहितादिकृन्मुंडीशाकादिभुक्
च्यब्दंचरेत्। धनीवक्ष्यमाणंगोशतंचरेत्। ज्ञानात्सोमयागस्थश्रोत्रियातिदुर्गतकुटुंब्यातिथ्यकृद्वि
ब्राह्मणस्यकपिलांहोमार्थगर्भिणींबहुक्षीरांसुरूपांतरुणींद्विगुणांनिर्गुणोधनवान्प्रतिज्ञयाखड्गा
दिनाहत्वाभ्रूणहाभवतीतिब्रह्महत्याद्विगुणंव्रतंचरेत्। यद्वागोहितादिकृन्मुंडीदंडबिभ्रल्लक्ष्मखल
वणंरूक्षंषष्ठेकालेअश्नन्गोमतींप्राणवंवेदंवाजपन्द्विमासांतेगोसहस्रंदद्यात्। अज्ञानान्मुंडीशा
कादिभुक्च्यब्दंचरेत्ब्रह्महत्याव्रतंत्रैवार्षिकंवृषभैकशतगोदानं। अगर्भिण्याःकामतश्चेतत्। अ
कामतश्चगोहितादिकृन्मुंडीशाकादिभुक्च्यब्दंचरेत्। यद्वितांकाष्ठेनहत्वासांतपनपूर्वंगोसहस्रश
तदानंच्यब्दादिषु। लोष्ठकार्यंपाषाणेनतेलकृच्छ्रः। शस्त्रेतिकृच्छ्रपूर्वंव्रतांतेविप्रान्संभोज्यतेभ्यस्त्रि
शद्गावृषभंचदद्यात्। बालामतिवृद्धामतिकृशांरोगिणींवाहत्वासर्वत्रव्रतोक्तार्धव्रतंकृत्वाविप्रान्संभोज्य
शक्त्याहेमतिलान्दद्यात्। एकाब्देगोवित्ततेपादंद्व्यब्देऽर्धंत्र्यब्देपादोनंततःसर्वंकार्यं॥ गर्भिण्यावधेतद्
यागे। उत्पन्नेगर्भेपादादार्धं। आपूर्तेःपादोनं। चेतन्येगोव्रतंद्विगुणं। अज्ञानादेकांबहवोहत्वोक्त ७०
व्रतस्यपादंप्रत्येकंकुर्युः। दाहेत्वर्धं। बद्धीःपादोनं। ज्ञानाच्चेत्प्रत्येकंकृत्स्नमेव। एकत्ररोधादिनाबहूनांव

द्वे धेद्विगुणंव्रतं। अज्ञानाद्वैद्येनमिथ्यौषधेनैकस्याश्चवधेद्विगुणं। अज्ञानाद्वैद्येनहितबुद्ध्यौषधदानेपा
दंव्रतं। रोधादौव्यवहितंकर्षेषुरोधेनपादः। बंधनेर्धंयोजनेपादोनं। निपातनेसर्वं। अज्ञानाद्रोधादि
कृत्वातज्जन्यप्रमादपरिहारार्थमवेक्ष्यकमाणेमृतेकार्यंकृत्वाविप्रान्संभोज्यगोमिथुनंदद्यात्। रोध
नादिप्रमाणरक्षणाकरणेक्रमात्पादार्धत्रिपादसर्वाणित्रिमासिकादीनिकार्याणि। निकृष्यादेघोर
न्यत्रदाहेऽतिवाहेनासापुच्छछेदनदीपर्वतादिरोधेतिदाहेदमनेसंघातेयोजनेमृतेखलानारिके
लश्वाणवालमौंजादिदृढपाशादिबद्धेमृतेपादोनं। सर्वत्रघंटादिभूषणनिमित्तेकृच्छ्रं। मृतकल्पव
धेतुसक्तुयावकभैक्षपयोदधिघृतानिक्रमान्मासार्धंभुक्त्वाविप्रान्संभोज्यगाःदद्यात्। मरणहे
तुव्याधिमुत्पाद्यद्वादशरात्रंपंचगव्यंपिबेत्। शृंगादिभंगेचर्मविलोपनादौगविजीवितिमासंर्धंयवा
गूंपिबेत्। अशक्तौपयोदधिघृतंवादशरात्रंपिबेत्। अनुग्राहकप्रयोजकादीनांपूर्वपूर्वदोषतारत
म्यंकल्प्यं। अथरक्षोपेक्षानिमित्तंजलपंकोच्चनीचादिविषमस्थानेदुर्गेवन्यग्रहबंधनविद्युत्सर्प
नां चामत्योपवासो मत्या त्रिरात्रं यावकं। आहिताग्निस्तु मत्या त्रिरात्रं कार्यं कुर्यात्। शूद्रभोजने भिन्नभां
डस्थान्ने भुजनभांडेषु भुक्त्वा चोपवासः। पंचगव्यं चमत्या त्रिरात्रं। भिन्नकांस्यकार्यं। भिन्नभांडान्नभोजने
पंचगव्यं कृत्वा वा ब्राह्मी वापि पिबेत्। वटकाश्वत्थार्कुसीतिंदुककोविदारकर्दंबपत्रेषु भुक्त्वा चांद्रं। लतापलाश
पद्मवृक्षपत्रेषु भुक्त्वा चांद्रं चरेत्। वनस्थो यति श्च भुक्त्वा चांद्रफलं लभते। नान्यः पर्णपलाशेषु॥ अथहस्त

दानादिक्रियादुष्टाभोज्यभोजने। तत्रहस्तभोजनेवा ब्राह्मणसमीपेभोजनेदुष्टपं कौवषकाल्पंकृच्छ्रेव
शूद्रहस्तेनभोजनेवामत्यानक्तंमत्यापवासः। पंचगव्यंच। माक्षिकशाकगोरसलवणघृतेषुहस्तदाने
तथैव। आसनारूढपादोवस्त्रार्द्धप्रावृतोपिवामुखेनधमितंभुक्त्वाकृच्छ्रंसांतपनं। अथश्राद्धभोजनेपि
त्राद्युद्देशेनत्यक्तान्नेतु। तत्रश्राद्धानित्रिविधानि। तत्रांतर्दशाहाद्यैकादशाहेनवश्राद्धानि। एकाद
शाहादूनाब्दांतानिषोडशैकोद्दिष्टानि। नवमिश्राणि। सपिंडीकरणंमिश्रं। ततःपुराणानि। एकाद
शाहश्राद्धंनवेषुमिश्रं। तत्रप्रायश्चित्तगौरवात्दोषगौरवंवास्ति। आद्यैकोद्दिष्टंस्वर्तंत्रमित्येके।
तत्राणुभयधर्मप्रायश्चित्तदोषदंडाःस्युः। तत्रापदिसूतकसंबंधेषुनवमिश्रेषुभोजनेकार्य। एका
दशाहैकोद्दिष्टेकार्य। पादोनेकार्यस्वद्वादशाहेवोनमासेवापादोनमेकेकार्यंकुर्यात्। द्विमासे
त्रिपक्षेवोनषण्मासेवोनाब्दिकेवार्द्धकृच्छ्रं। त्रिमासाद्यब्दमाकांतेषुसपिंडनेवाद्याब्दिकेत्वोपवा
सः। पादकृच्छ्रंवा। प्रत्यब्दंपुराणेवव्रतेपारणेवनक्तंगुरुविषयेद्रव्यार्थेनवश्राद्धेत्रिरात्रमाद्ये
त्रिरात्रं। द्विरात्रं। द्वादशाहादौद्विरात्रंद्विमासादावुपवासः। त्रिमासादौनक्तं। पंचगव्यंवाप्रत्यब्दे
वान्यपुराणेषुषट्प्राणायामाः। द्वावेत्र्यःप्राणायामः। तत्रैवनिस्पृहभोक्तुर्जपश्चीडिनोवा ८८
तत्तदर्द्धं॥ क्षत्रियादिश्राद्धेषुद्वित्रिचतुर्गुणानिक्रमात्कार्याणि। अनापदितुनवश्राद्धेचांद्रं

वाद्यमासिकेचांद्रंकार्यंच। द्वादशाहादौकार्यमेकं द्विमासादौपादोनं त्रिमासाद्यब्दांतेषुसापिंड्येचत्रिरात्रं। त्र्य
र्द्धंकार्यंवा। आब्दिकेपादंकार्य। प्रत्याब्दिकेतूपवासः। क्षत्रियस्यतुनवश्राद्धेचांद्रं आद्यमासिकेचांद्रंपराकश्च।
द्वादशाहादौपराकएव। द्विमासत्रिमासादौमहासांतपनं। त्रिमासादौकार्य। आब्दिकेपादोनं। प्रत्याब्दिके
त्वर्द्धं। पुराणेत्वर्द्धपादं। वैश्यस्यत्वेतान्येवव्रतानिश्राद्धानि। शूद्रस्यतुद्विगुणानि। यद्वानवश्राद्धेचांद्रद्वयंआ
द्यमासिकेचांद्रद्वयं। सार्द्धचांद्रंवा। द्वादशाहादौसार्द्धचांद्रमेव। द्विमासत्रिपक्षादौचांद्रं त्रिमासादौपराके।
महासांतपनं। प्रत्यब्दंमहासांतपनं। चंडालोदकसर्पब्राह्मणपशुदंष्ट्रिवैद्युतप्रपतनविषोद्बंधननाश
केर्मृतानांपतितानांचैस्तेनपतितादिभोज्यान्नानांनवश्राद्धेषुतुनवश्राद्धेचांद्रमाद्यमासिकेचांद्रंपराकश्च।
द्वादशाहादौपराकएवंद्विमासत्रिपक्षादावतिकृच्छ्रः। त्रिमासादौकार्यः। आब्दिकेपादः। प्रत्याब्दिकेतूपवासः।
सम्यग्विप्रपिंडद्रव्यार्थभोजिनश्चेवं। अपांक्तेयानामेकादशाहेश्राद्धेत्रिरात्रुचांद्रं। यतिव्रतिब्रह्मचारिणः
सूतकान्ननवश्राद्धमासिकादौभुक्त्वाकृच्छ्रत्वाधिकंत्रिरात्रमेकोपवासेत्रिःप्राणायामाःघृतप्राशनेन
कृत्वाव्रतशेषंसमापयेत्। अनापदितुकार्यंत्रिरात्रमेकरात्रोपवासंषट्प्राणायामान्पंचगव्यप्राशन
मधिकमत्यासतुतप्तकृच्छ्रादिद्विगुणं। आमहेमसंकल्पितश्राद्धेतुउपवासंत्रिरात्रंवा। तदेवसूतक
व्यवहितेषुतुब्राह्मणाक्षत्रियवैश्यशूद्रश्राद्धेषुकोद्दिष्टेषुकृच्छ्रातिकृच्छ्रतप्तकृच्छ्रचांद्राणि। द्वादशाहा

स्मृत्य॰ सा॰ दिषुपादंपादं क्रासयेत्। आतिथ्यवर्हितेषु तु त्रिरात्रादिकं। गुरौ विषये तूपवासनकं षड्प्राणायामाः। अना
८० पदि द्विगुणं। सर्वत्र अतिश्रोत्रियः पुराणेषु अनुक्त प्रायश्चित्तेषु गायत्र्यादशकलापूः पीत्वा शुद्ध्यति। त
तःसंध्योपासनं होमं च यथाशक्ति कुर्यात्। निवृत्ते चूडाहोममेव प्राङ्नामकरणाद्वजातकर्मणि वा गश्राद्धसूत
केप्यसूतकेन नामश्राद्धं चूडाहोमांतं चौलश्राद्धसीमंतसोमवाधानब्रह्मौदने नामत्याश्वापदि तु सुक्ता
सांतपनं। मूल्यानापदि तु चौद्रं। अन्येषु संस्कारेषु तूपवासो नित्यः त्रिरात्रं वानापदि। अन्यदत्ता कन्या
न्यस्मै पुनर्दत्ता या सा पुनर्भूः। असंस्कृते पूर्वगर्भे प्रसूते द्वितीये गर्भसंस्कारे या सा पुनरेता कृला
दिष्वाद्या श्रौतं तद्वैयागर्भिणी सा रेताधाः। भर्तृशासनोल्लंघिनी कामचारिणी। आसांगर्भे पूर्वं
वत्सांतपनं। चांद्रं वा सर्वं प्रथमगर्भे च॥ अथ परिग्रहदुष्टेषु दुष्टभोजने। तत्र श्रोत्रियकृते
यज्ञे ग्रामयाजककृते यज्ञे स्त्रीकृते वान्ने क्लीबकृते वान्ने भोजने वा राजपुरोहिते राजभृत्ये वैश्ये शू
द्राणां क्लीबाजाविकमाहिषिकस्त्री निकृष्टभूमिपानाम्ले हगायनतक्षवार्धुषिकदीक्षावस्थितानां क
दर्यबद्धनिगडाभिशस्तषंढा ×श्वा× नां पुंश्चली दांभिक वैद्य कुणिसांवत्सरिकाणां मत्तकुम्भातुर ८१
गणगणिकानां चक्रमातृखरस्त्रीमृगजीविनां सर्वशिष्टभोज्यमपतितपिशुनानां शैलूषतंतुवा
यनुन्नचामयाकिरातप्रव्रजितानां कामचारिचोपतरुवाहकवाजिकानां घृतक्षीरतिलवणगुड
विक्रयिणामग्निदनित्यरोगिघांटिकविषशस्त्रकारविप्रगोदेवद्रव्यघ्नानां वेणपपापिवेश्यापाषंडजीवीशूद्रा
दिप्रतिलोमजानां कर्मारक्तघ्नपुण्यसोमात्मकर्मणां शास्त्रविक्रयिणां विषदद्रूषिरंगावतारिसुवर्णकारान्त
तिना शौण्डिकनस्त्रनिर्णेजकरजकवेनश्वपतां कुटंनरनर्तकवृषलीतत्पतीनां नष्टशंसोपपतिराज्ञकमूर्खस्त्री
जितकितवानां शूद्राध्यापकयाजकोपपतिमर्षकपुत्राधर्मायतिस्त्रीणां ग्रामयाजिवृषलीजर्वणिक्कांडपृ
ष्ठसेवकानां पर्याहितपरीष्टिपारिवित्तिपरिविंदानां पुनर्भूजाग्रेदिधिषूपपतितकृतैलौषधवर्धजीवि
नांभगवद्धन्तिपक्षिरक्षिसमुद्रतारकहीनांगातिरिक्तांगानां मातृपितृसुतगुर्वग्नित्यागिनां कूटमान
कूटकसूनकान्यास्त्रीसत्यविक्रयिणां सीसकारगोधलोहकारसूविकापुत्रब्रह्मचारिणां कुंडाश्रीवीर
हगुरुस्तु भिर्वागरदरूपाजीविनां सूतिकशौनिकपौर्णिककुलालचित्रकर्मणां योनिसंकरिकाश्रम
भेदतस्करत्यथाश्रमवृथाहोद्दणां मित्यादि पापिनां मार्गे तिष्ठतां स्वैक्षान्ले चांद्र। एषामकृतनिष्कृ
तीनामन्नभोजने याजने प्रतिग्रहे च तथा कुनखिकृष्णदंतकुष्ठीब्राह्मणान्नाद शूद्रशूद्रान्नादब्रा
ह्मणानामभोज्यान्नेनांनप्रपासत्रसोमएकादशाहश्राद्धदुष्टान्नं दुष्टवद्घुष्टं विदुषा लुप्तमहा
पाप्यवेक्षितं शुनास्पृष्टोदक्यादिसंघुष्टमवघ्रातपक्ष्युच्छिष्टमसत्कृतं वकुर्यादितिसरोषं सर्वि
स्मयान्नं नपदस्पृष्टमनज्ञातमनार्तिं पर्यावीतस्त्रीशूद्रोच्छिष्टं तथा मासजन्मतिस्तरस्तकसूतिका

प्रेतान्नं वा तुष्टिकरं वा तोन्यतमस्यान्नं भुक्त्वा दलारेतो विण्मूत्रभक्षणे वा मत्या त्रिरात्रं अभ्यासे कृच्छ्रः। मत्या
तिकृच्छ्रो मत्याभ्यासे तिकृच्छ्रः। ब्रह्मचार्यादिः कायातितप्तकृच्छ्रं चांद्राणि पुनःसंस्कारश्च। यद्वा त्रिषट्नव
द्वादशरात्राणि पयसा। अभ्यासे चांद्रं। अत्यंताभ्यासे चांद्रवृद्धिः। आपद्येकद्वित्रिचतुरुपवासाः। अ
त्यंतापदि त्रिषट्नवद्वादशप्राणायामाः। आमिषु स्नानं। पङ्क्तिभुक्तेः एकभक्तं। अनाचारे दुराचारे नक्तं।
ब्राह्मणादुष्टे स्नानमष्टशतजपः। गुर्वाचार्याग्निधर्मशास्त्रगोब्राह्मणदूष्यान्ने शाखारंडान्ने चैवं। बलाद्दासी
कृतानां म्लेच्छचंडालदस्युभिः। अशुभं कारितास्तेन गवादिप्राणिहिंसनं। इति योगीश्वरस्मरणा
त्। तथा च पुंश्चल्याभिशस्तम्लेच्छचंडालदस्युभिर्बलाद्दासीकृतानां गवादिप्राणिहिंसने तदुच्छिष्टमा
जने भोजने खरोष्ट्रविड्वराहभक्षणे तत्स्त्रीभिः संगमे भोजने च मासोषितद्विजस्य कायमाहितान्ने
श्चांद्रं पराको वा। संवत्सरोषितो द्विजस्य चांद्रं पराकश्च॥ अथ ज्ञानमृताशौचान्नभोजने। तत्र
द्विजाशौचे सवर्णानामुपवासस्त्रिरात्रं वा। विप्रक्षत्रवैश्यशूद्राशौचे च मत्या विप्रो भुक्त्वा नक्तैकभि
क्षोपवासान्कुर्यात्। अभ्यासे त्वेकद्वित्रिपंचसप्तोपवासान्। यद्वाभ्यासे द्वादशत्रिंशत्षष्टिश
तप्राणायामान्कुर्यात्। मत्याचित्सांतपनं कार्यं महासांतपनं चांद्राणि। सर्वत्र पंचगव्यं च। एकद्वित्रि ९०
चतुःकायानि वा। मत्याभ्यासे कायातिकृच्छ्रतप्तकृच्छ्रचांद्राणि। यद्वाभ्यासे त्वेकद्वित्रिषण्मासानियाव

कृत्व्रतानि। अत्यंतापदि द्वादशत्रिंशत्षष्टिशतप्राणायामाः॥ क्षत्रियस्य वैश्यशूद्राशौचयोर्वैश्यस्य शूद्रा
शौचे चैवं। विप्राशौचे क्षत्रवैश्ययोरष्टशतजपो नक्तं वा। क्षत्राशौचे वैश्यस्य चैवं। द्विजाशौचे शूद्रस्य स्नानं। पंच
गव्यं च। शूद्रसंस्पर्शे पंचपने स्नानं। पाने पंचगव्यं च। ब्रह्मचार्यादेरुपवासः। शतजपः पंचगव्यं च त्रिरात्रं। सह
स्रजपः पंचगव्यं वा धिकं नाज्ञानाशौचे ल्पयुपोष्य मित्येके। आहिताग्न्याशौचे चैवं॥ आशौचे तु भुक्त्वा वर्तेन
स्पर्शात्। आपुरीषोत्सर्गात्। तत्प्रायश्चित्तं तदाशौचे विगते कार्यं। सकृद्भोजनमात्रेण सोत्कृष्टं यावदाशौचि
त्वादनधिकारात्। तद्गृहान्नभोजनेन कृच्छ्रमुपवासो वा॥ कापालिकेन्नेपाने च कृच्छ्रमात्कार्यं तदर्द्धं च अभ्या
से द्विगुणं मत्या त्रिगुणं। अत्याभ्यासे चतुर्गुणं। मत्याभ्यासे द्विचांद्रं। तदर्द्धं वा। तत्स्त्रीगमने चैवं। अत्यंताभ्या
से कृच्छ्रं॥ पतितान्ने द्रव्ये च सति तत्समुत्सृज्याति कृच्छ्रं कुर्यात्। अन्नसत्रप्रवृत्तस्याग्निहोत्रिणश्चा
मन्ने दोषः। पक्वान्ने त्वेकरात्रं। त्रिरात्रं वा यावकं। द्वादश चतुर्विंशतिर्वा प्राणायामाः॥ गृहीताग्नि समारो
प्य पंचयज्ञान्न कुर्वन्। परपाकरतः। पंचयज्ञान्कृत्वा। नित्यं परान्नोपजीवी परपाकरतः। दान्वक्षितो ऽपकः।
पक्षमासं वा देवपितृन्नमभोजयन्न श्राद्धदस्तेषामन्नाशनाभ्यासे चांद्रं। पर्वपरिगणितमतिरिक्तानि
षिद्धाचरणशीलान्नभोजने तदुपवासो ऽह्नि। संवत्सराभ्यासे पराकः। अत्रादिष्टं विप्रस्यैव तत्र क्षत्रस्य पा
दोनं वैश्यस्यार्द्धं। शूद्रस्य पादः॥ इति भक्ष्याभक्ष्यप्रायश्चित्तं अथ जातिभ्रंशकरादिप्रायश्चित्तं॥

जातिभ्रंशकरे धिक्ष्यासांतपनं अभिक्ष्या कार्यं। संकरीकरणे मासं यावकं। पुमान्स यावकं कृच्छ्रातिकृच्छ्रं
वा। अपात्रीकरणेषु तप्तकृच्छ्रः। अतिकृच्छ्रं वा मलिनीकरणेषु महासांतपनं तप्तकृच्छ्रं॥ ब्राह्मणस्य रुजःकृ
त्वा रासभस्य घ्राणं वा निंदितार्थधनदानं कृत्वा कृच्छ्रार्द्धं चरेत्। अचरस्त्रीणामर्द्धं। रजस्वलानां तत्रतत्रोक्तमे
व कार्यं॥ इत्युपपातकप्रायश्चित्तं। अथ प्रकीर्णप्रायश्चित्तानि खरयुक्तमुष्ट्रयुक्तं वा यानमारुह्याप्वा
नं गत्वा नग्नस्नात्वा वस्त्रं स्त्रियं दिवा गत्वा सुप्तस्त्रोपो वगाह्य प्राणायामेन शुद्ध्येत्। अमत्यास्नानमात्रं। मत्यासा
क्षात्खराद्यारोहणे तु द्विगुणं। गुरुं त्वंकृत्य हुंकृत्वा विप्रं वा वादेन वा निर्जित्य वाससा बध्वा वा शीघ्रं प्र
साद्योपवसेत्। अभ्यासे त्रिरात्रं। विप्रं हंतुं दंडोद्यमे कृच्छ्रः। ताडने तिकृच्छ्रः रक्तस्रावे कृच्छ्रातिकृच्छ्रौ त्यं
तरक्ते त्वग्भेदे कृच्छ्रो स्थिभेदे नेकृच्छ्रो गकर्तने पराकः। पादेन प्रहृत्यापोष्य स्नात्वा प्रसादयेत्। पादेन स्प
र्शने तु प्रसादनं। अथ संनीता अप्सु निधाव पशुवाग्नौ वा र्तविण्मूत्रनिषेवणे सचेलो जलमाप्लुत्य गां स्प
ष्ट्वा घृतं प्राश्य शुध्येत्। मत्या पोष्य सचैलं स्नायात्। अभ्यासे वैतस्य तप्तकृच्छ्रः॥ श्रौतस्मार्तकर्मलोपे तूपवा
सः। पश्चात्प्रातिदोषेष्वादिष्टं। सूर्योदये स्वस्थो मत्या सुप्तो ह्नि तिष्ठन्सावित्रीं जपन्नुपवसेत्। सूर्यास्तम
ये सुप्तो रात्रौ तिष्ठन्सावित्रीं जपन्नाध्यात्। स्नानादिकर्मलोपे तूपवासोष्टशतं जपो वा। जीर्णमलवद्वस्त्र ९१
धारणादिस्नातकव्रतलोपेवोपवासोष्टशतजपो वा। पंचमहायज्ञेष्वन्यतमलोपे तन्नातुरस्योपवासो धनि

नः कृच्छ्रार्द्धं। आहिताग्नेः पर्वण्युपवासस्थाने नैवं। ऋतौ भार्यागमनलोपे नैवं। प्रथमायां भार्यायां जीवत्यां द्वितीया
यां भार्यायां वैतानिकाग्निदहने सुरापानसमं वा। स्वभार्यां क्रोधादवमन्यते नेदेश्वे दूणनीकृच्छ्रं नवषट्त्रि
रात्राणि। अस्नात्वा भोजनादौ तूपवासो दिनजपं वा। एकपंक्त्युपविष्टानां स्नेहादिविषमदाने दापने च
कार्यं। उदकावतरणमार्गहंतुः कन्याविघ्नकरस्य च समेषु विषमेषु पूजादिकर्तुश्च भैक्षान्नेन सहर्वा
द्रं। सुरापस्य गंधमाघ्राय सोमपो ब्राह्मणोप्सु निमग्नः त्रिः प्राणायामान्कृत्वा त्रिरघमर्षणं वा कृत्वा घृ
तप्राशनं च कुर्यात्। असोमपो नाप्सु इत स्यामंत्रकः प्राणायाम एव। मद्यपगंधे तु तदर्द्धं। साक्षात्सु
राघ्राणात्सुरापानसमं वा। अमत्याघ्राणे त्रिः प्राणायामाः। मद्यघ्राणे विण्मूत्रक्रव्याद पूतिगंधा
घ्राणे त्रिः प्राणायामाः। दर्शने प्राणायामः। स्पर्शने स्नानं घृतप्राशनं वा। सुरास्पर्शने निरन्नानं पंचगव्यं
वा। शवगंधाघ्राणेप्सु प्राणायामाः। असोमपस्यानप्सु द्वारस्यामंत्रकः प्राणायामः। शुष्कसुरासं
डस्थापः पीत्वा पर्णयावकं। सुराभाजनस्थास्वु क्षीरवपुष्पीपक्वं पयः पंचरात्रं। पर्युषितास्वु क्षीरवपु
ष्पीप्रयः पदं। शुष्कमद्यभांडस्थाप्सु सप्तरात्रं यावकं। अन्यच्च पूर्वोक्तं। सुरामद्ययोः स्नानरतम्यं
कल्प्यं। वमनं चात्र कार्यं वा। मूत्रपुरीषादिदूषितापः पीत्वा सांतपनं त्र्यहं। रसोपलक्षे पादकृच्छ्रः। मू
त्रविण्मूत्रे वाभिप्रायादिभिः संस्पृष्टे सुरां पीत्वा स्पृष्ट्वा प्रतिग्रहस्य चस्नात्वा सेकुशाम्बु त्र्यहं॥ संक्रां

त्यादिनिमित्तस्नानंहोममकृत्वांबुपीत्वाष्टसहस्रंजपेत्। शूद्रादिस्पर्शनिमित्तेतूपवासः। चंडालादिस्पर्श
निमित्तेकार्यएवातत्स्पृष्टस्पर्शेतूपवासस्त्रिरात्रंवा॥ नित्यस्नानमकृत्वाभुक्त्वोपवासस्त्रिरात्रंवा। नै
मित्तिके त्रिरात्रं। केस्नानेसर्वत्राष्टसहस्रजपोद्वादशप्राणायामाधिकः। अमेध्यश्वादिस्पर्शनेस्नात्वा स्मृत्य
त्वाभुक्त्वो गृहस्थादेस्त्रिरात्रं। मत्यात्रिरात्रं। व्रतिनःकार्यंचांद्रंवा। चंडालादिस्पर्शनेत्वस्नात्वाभुक्तो
चांद्रंमत्याभुक्तोकार्यं। रजकाद्यंत्यस्पर्शेत्वस्नात्वाभुक्तोमत्यात्रिरात्रंकार्यंवा। प्रत्यंतेस्नानेभुक्त्वा
पीत्वात्रिरात्रं। सांतपनंवा। अनाचम्यभक्षणेपानेचाष्टशतजपः। भोजनेतूपवासः। भोक्तुकाम
स्यापोशानात्पश्चादभ्यवहारात्पूर्वंपुरीषविनिर्गमेसचैलोबहिराप्लवःषट्प्राणायामाः। भुं
जानस्यगुदस्रावेपोशौचंकृत्वास्नात्वोपोष्यपंचगव्यं। भुंजानस्याशुचिलिप्तग्रासंभूमौक्षिप्त्वा
स्नायात्। तद्ग्रासाशनेतूपवासः। सर्वान्नाशनेत्रिरात्रं। भुंजानस्यमस्तकेविण्मूत्रादिपतनेऽन्नंत्यक्त्वा
नद्यांस्नात्वात्रिप्राणायामाः। भुंजानस्यसगोत्रस्पर्शनेन्नंत्यक्त्वेदुदकंस्पृष्ट्वाशुद्धिः। भुंजानस्यासगोत्रस्प
र्शनेभाजनंविसृज्यैवशुद्धिः। भुंजनयोःसवर्णयोःस्पर्शेचाविसृज्यैवशुद्धिः। भुंजानस्योच्छिष्टक्षत्रियस्प
र्शेस्नानंजपंचकृत्वादिनांतेघृतप्राशनं। भुंजनस्योच्छिष्टवैश्यस्पर्शनेचैवंत्रिषवणस्नानादिकं। भु ९२
क्तोच्छिष्टस्यदृष्टोसवर्णस्नानंशतजपोवा। असवर्णेतूपवासःसहस्रजपोवा। भुक्तोच्छिष्टस्यशूद्रादि

कस्पर्शेतुपोष्यपंचगव्यं। रजकादिस्पर्शेत्रिरात्रं। ऊर्ध्वोच्छिष्टस्यचंडालादिस्पर्शनेकार्यं। अधरोच्छि
ष्टस्यत्वर्द्धं। उच्छिष्टाद्द्विजउच्छिष्टंद्विजंस्पृष्ट्वाशूद्रश्वादीन्वास्पृष्टोपोष्यपंचगव्यंपिबेत्। उच्छिष्टो
द्विजश्चंडालादिस्पृष्ट्वात्रिरात्रंकुर्यात्। रजकादिस्पर्शेतदर्द्धंपंचगव्यंच। अनुच्छिष्टापस्पृष्टोयत्रस्ना
नंविहितंतत्रोच्छिष्टस्पृष्टोत्रिरात्रंकार्यंवा। उच्छिष्टस्पृष्टोस्नानमात्रंविहितं। उच्छिष्टोच्छिष्टस्पृष्टएवे
कएवदुष्यति। तत्स्पर्शिनोनदुष्यंति। येनकेनचिदुच्छिष्टःपरस्पृष्टःसद्यआप्लुत्यप्रायश्चित्तंसर्वत्र
कुर्यात्। विण्मूत्राद्युत्सर्गभुक्त्वापीत्वावात्रिरात्रमुपवासस्त्रिरात्रंवागोमूत्रयावकेन। अशक्तोया
वकं। जलपानेतूपवासःपंचगव्येन। कांजिकादिनाशौचंकृत्वाभुक्त्वापुनर्जलेनशुद्धिंकृत्वोपोष्य
पंचगव्यंपिबेत्। नीलीवस्त्रादिधारणेज्ञानिमित्तोर्ध्ववस्त्रधारणेचोपवासःपंचगव्यंचततोहि
क्याद्दंचाधिकं। नीलीमध्यगमनेस्नात्वात्रिःप्राणायामाः। नीलीविक्रयन्पालयन्नीलीवृत्त्यांजी
वंश्चमतिचिरतोश्चत्रिभिःकृच्छ्रैःशुध्येत्। नीलीवस्त्रधारणेपिस्नानदानजपहोमस्वाध्यायदे
वतार्चनादिसर्वंनिःफलं। नीलीक्षेत्रोत्पन्नेभुक्तेचांद्रं। नीलीक्षेत्रेनीलीमुत्पाद्यद्वादशाब्दात्संशुद्ध्ये
त्। नीलीजन्यांचांद्रं। नीलीघ्नलामैथुनेगर्भश्चंडालोजायते। नीलीघ्नलामृतःषष्टिवर्षसहस्रंविष्ठा

स्मृत्य॰ सा॰ क्रमिः स्यात्। मृते भर्तरि पत्नी नीलीं धृत्वा महारौरवे नरके भर्त्रा वसेत्। नीलीं धृत्वा यदन्नं दीयते तत्र
९३ दातुर्भोक्तुश्च सांतपनं। नीलीदारुभेदे रक्तदर्शने चांद्रं। कंबलपट्टसूत्रेन नीलीदोषो नास्ति। इंद्रलापंप
लाशाग्निं वान्यस्य प्रदेशाप शोष्य क्रमाद्धेनुं दंडं च दक्षिणां दद्यात्॥ पतितम्लेच्छशूद्राधार्मिकसं
भाषणे पुण्यकृतो ध्यायेत्। ब्राह्मणेन वा सह संभाषणे विनायज्ञोपवीतेनोच्छिष्टत्वे लमत्या भक्षणे च।
बुपाने च त्रि प्राणायामाः। भोजने नक्तं विण्मूत्रे षट् प्राणायामाः। मत्या चैक्षपाने विण्मूत्रे ष्टशतजपो भो
जने तूपवासः। भुक्त्वा नाचम्योत्थाने सद्यः स्नानं। दंड्ये चोरादावुत्सर्गे राज्ञ उपवासः। पुरोहितस्य त्रिरात्रं।
अदंड्यदंडने राज्ञस्त्रिरात्रं। पुरोहितस्य कृच्छ्रः। स्नेहेन पतिताद्यपंक्तेयपंक्तिभोजने तूपवासः पंचगव्यं
च। पलाशखट्वाशयनासनपादुकारोहणे त्रिरात्रं यावकं। पलवृक्षच्छेदने कृच्छ्रं। पलायनेन्त्यस्पर्शे
वं। विप्रस्याग्निविप्रयोर्गोविप्रयोर्दंपत्योश्च मध्ये गंतुः सांतपनं। होमकाले गवां दोहे सान्नाय्ये गेस्वा
ध्याये विवादे च मध्ये गंतुः सांतपनं। अभ्यासे चांद्रं। दुःस्वप्नदुरिष्टदर्शने दो घृतं हिरण्यं च दद्यात्। अ
तीर्थार्थिनः सिंधुसौवीरसौराष्ट्राब्धिप्रत्यंतमागधवंगकलिंगांध्रदेशगमने पुनः संस्कारः। तीर्थार्थिनि ९३
दोषः। प्रत्यर्कादिमेहने चात्मशकृद्दर्शने सूर्यविप्रगां वापश्येत्। नक्षिरधःकरणे पादप्रतापने कु
शेः पादप्रमार्जने चोपवासः। यावकं वा। क्षत्रवैश्ययोरक्षिवादने शय्यापादुकोपानद्धाधिकारस्थः

श्राद्धकृद्धोमकृज्जपदेवपूजारताः समित्पुष्पकुशाग्न्यंबुगंधाक्षतान्नपाणिनः एतेषां चाभिवादने चैतेनाभिवा
द्याः सर्वे त्रिरात्रं कुर्युः। अन्यत्र निमंत्रितस्याप्यन्यत्र भोजने प्येवं। इत्यादि देशकालवयोव्यवस्थया शक्त्या
प्रायश्चित्तं ज्ञेयं। अनुपदिष्टेषु दंडार्थवादस्मृतिनिंदाभिः कल्प्यं। स्त्रीबालवृद्धातुराणां च योग्यं योज्य
देयं॥ इत्यादिसंकीर्णप्रायश्चित्तं॥ ॥ यश्चोक्तो महापातकी प्रायश्चित्तं न कुर्यात्। तस्य पतितस्य
सर्वे सपिंडा बांधवाश्च रिक्ततिथौ सायाह्ने ग्रामाद्बहिः पापूर्णदास्यानीतं कुंभं प्राचीनावीतिनो मुक्त
शिखा दक्षिणामुखा गुरुसन्निधावस्माकं लंपटत्वादिति नियमेन। ततोऽनीक्षमाणा अप उपस्पृश्य ग्राम
प्रविशेयुः। ततस्तं सर्वधर्मबहिष्कृतं संभाषणादिषु वर्जयेत्। यदि प्रमादात् संभाषणादि कृतं अभ
त्यासा सावित्रीं जपन्नेकरात्रं तिष्ठेत्। मत्या त्रिरात्रं। अभ्यासे ष्टपातिसं। अथ कृतप्रायश्चित्ते आग
ते सपिंडाद्यास्तेन सह पुण्यजले स्नात्वापां पूर्णं कुंभं पुण्ये देशे काले च प्रत्यङ्मुखा अस्माकमिति विनये
युः। ततः स गाश्च यायवसं दद्यात्। भक्षितो रुद्धः न चेत्पुनः प्रायश्चित्तं चरेत्। संव्यवहार्यश्च। स्त्रीणां पति
तानां चैवं त्यागः। परिग्रहश्च। किंतु प्रधानगृहसमीपे कुटीं कृत्वा प्राणधारणार्थं मन्नं मलिनवासश्च दत्वा
भोगरहिता रक्षेत्। स्त्रीणामपि महापापातिपापानुपापान्यप्यस्तानि चोपपापानि पतननिमित्तानि

स्मृत्य॰सा॰
९४

विशेषतो हीनवर्णगमनं। गर्भपातनं ब्राह्मण्याश्च पि भर्तृहिंसनम ब्राह्मण्या। अपि चैतानि पतनहेतवः। शिष्य
गागुरुगा। भर्तृघ्नी वृगिति पगतानामप्येवं प्रायश्चित्तं। क्षत्रियादेः प्रायश्चित्तं ब्राह्मणामंतरे कृत्वा ब्रूयात्। स्त्री
शूद्राणां जपहोमवर्ज्यमर्मेत्तक प्राणायामाः सर्वत्र वाच्याएव॥ योगाद्यनुष्ठानेऽशीलानां जपादिरितरेषां
तपआदिना। धारकनिर्धनमूर्खाणां तपएव। अनधीतानां च। कर्तृव्यतिरिक्तविज्ञातदोषा विख्यातदोषः।
तं विद्वानपि शीघ्रं पर्षदनुमतं व्रतं प्रायश्चित्तं कुर्यात्। तत्र वेदधर्मज्ञाः सहस्राद्येकांता विप्रायावंतेयथा
योग्यं पर्षद्यतिवर्ज्यं। पर्षद्दक्षिणा स्वलक्षगवादिकं विंदेत्यथायोग्यं कृच्छ्रसंस्थावा। पर्षत्तुष्टिर्वा तत्र सकृ
दाप्लुत्य सचैलो वाग्यतः स्नात्वार्द्रवासाः पर्षद्दक्षिणां दत्वा पापं विख्याप्य प्रायश्चित्तं व्रतमादाय पुनः
स्नात्वा व्रतं चरेत् पर्षद्य ब्रूयात्। न चेत्समाख्यातु राज्ञा त्वा वदेत्पापं सर्वमापतेत्। पर्षन्मतं विनाकुर्वन्
द्विगुणं चरेत्। विद्वद्विप्रनृपस्त्रीणां च पनं नेष्यते॥ इति स्मृत्यर्थसारप्रकाशप्रायश्चित्तं ॥अथ
रहस्यप्रायश्चित्तमुच्यते॥ ॥तत्र कर्तृव्यतिरिक्तैरविज्ञातदोषो रहस्यं तत्प्रायश्चित्तं चरेत्। अविद्वां
स्तु मुख्यान्तरेण रहस्या रहस्यप्रायश्चित्तं ज्ञात्वा चरेत्। स्त्रीशूद्रस्येवं जपहोमवर्ज्यं। तत्राहाराविरो
धानुक्तौ पयः प्रभृतीदयः। कालविशेषानुक्तौ वत्सरादयो मासांताः। देशविशेषानुक्तौ शैलीं छादयो ९४
गौतमोक्ताः। जपेषु ऋषिदेवच्छंदो विनियोगा विज्ञेयाः। अमत्या ब्राह्मणवधेऽनश्नन् त्रिरात्रं मंत्तर्जले

भिमग्नः ऋतं च सत्यं चेत्यघमर्षणसूक्तमावर्त्य त्रिरात्रांते पयस्विनीं गां दत्वा शुद्ध्येत्। दानाशक्तौ सव्या
हृतिकाः षोडश प्राणायामाः प्रतिदिनं मासमावर्त्याद्युः। अभ्यासे तु त्रिंशद्रात्रव्रतस्थः प्राणायामेश्वांक्षो
घमर्षणं जपेत् महापापेः शुद्ध्येत्। मत्या चेत् ग्रामो दग्ग्रामान्निःक्रम्य स्रवतः शुचिस्त्रा जले। तत्स्थंडि
लमुपलिप्य गोशकृत्क्लिन्नवासा गोशकृत्सूतेन पाणिना अर्काभिमुखो घमर्षणं प्रातः शतं मध्याह्ने
शतमपराह्णे शतमुदितेषु नक्षत्रेषु शनैर्वा परिमितं जपेत्। स्त्रे प्रतं यावकं पिबेत्। सप्तरात्रादुपपापेभ्यो द
शरात्रान्महापापसमैर्विंशति ×द× तिरात्रान्महापापेः शुद्ध्येत्। अमत्या श्रोत्रियाचार्यसवनस्थवधे चै
वं। मत्या श्रोत्रियादिवधे वा महापापेवारण्ये वेदसंहितां त्रिरभ्यस्य त्रिपराकैः शुद्ध्येत्। अमत्या महापापेष्वम
त्याभ्यासे चैवं। निर्गुणब्राह्मणवधे तु ग्रामाद्वा ग्रामान्निःक्रम्य प्रहृद्वागताव स्रसदस्ताद्गुतीर्जुहु
यात्। अनुग्राहककर्तृश्चैवं निर्गुणाश्रस्तवधे गुणवतो हंतुस्त्रिरात्रं चोपोष्य णं त्रिषवणस्नानं त्रिरघ
मर्षणं जले च। प्रयोजकानुमति कृंवं। निमित्तकर्तुरघमर्षणस्यैव त्रिर्जपः। इदं प्रायश्चित्तं ज्ञातेया
गस्थ क्षत्रवैश्ययोरात्रेय्यामाहि × कर्तु× ताग्निपत्न्यां गर्भिण्याम विज्ञाते गर्भे चतुर्थांश न्यूनं कार्यं॥
यद्वा पक्षमहोरात्रे पोषितो रात्रावुदवासं न कृत्वा तरीयं लोमभ्यः स्वाहेत्यथैतैरष्टभिर्मंत्रैः प्रत्येकं च

द्रुपदंवाद्याकूतीरेवंचत्वारिंशज्जुहुयात्॥ इतिरहस्यब्रह्महत्याप्रायश्चित्तं ॥अथसुरापाने।मत्यापे तत्र
ष्ट्याःसकृत्याश्च्नेगोडीमाध्व्योःपानाद्धृतोत्रिरात्रोपोषितःकूष्मांडीभिर्ऋग्भिश्चत्वारिंशद्धृताहुतीर्जुहु
यात्।त्रिरात्रोपवासाशक्तोमासंप्रत्यहंषोडशकृत्वोपनःशाशुचदघंप्रातिस्तोमेभिरुषसवसिष्ठां।मे
हित्रीणामवोस्तु।एतोन्विंद्रंस्तवामेत्येषामन्यतमंजपेत्।मत्यासेन्महापापेऽहंत्र्यहंदेवकृतस्येनस
इत्यादिभिर्मंत्रैर्होमः।नमइदुग्रंनमआविवासे।एतस्याकृत्वोवाजपंकुर्यात्।महापापाभ्यासेतुसमा
हितोगामनुगच्छेदष्टभिक्षाशीपावमानीर्जपेत्।महापापसमुच्चयेसैवं॥ इतिरहस्यसुरापानप्रा
यश्चित्तं॥ ॥अथरहस्यस्वर्णस्तेये।तत्रब्राह्मणस्वर्णहारीजलेस्थितः।एकादशरुद्रजापीत्रि
रात्रोपोषितःशुद्ध्येत्।यद्वाभस्मछन्नोभस्मशय्यासनोरुद्रजापीब्रह्मवधात्सुरापानात्सुवर्णस्ते
याद्गुरुतल्पगाछुद्ध्येत्।अत्यंतनिर्गुणब्राह्मणासुवर्णहारीअस्यवामस्यपलितस्यहोतुरितिसू
क्तंसकृज्जपेत्।यज्जाग्रतइतिषट्शिवसंकल्पंजपेत्।सुवर्णान्न्यूनपरिमाणस्वर्णस्तेयेत्वेवं।अ
नुग्राहकप्रयोजकादीनांसैवं॥ इतिरहस्यसुवर्णस्तेयप्रायश्चित्तं ॥अथगुरुतल्पगे।तत्रा ९५
मत्यगुरुतल्पगःत्रिरात्रोपोषितःसहस्रशीर्षेत्यनुवाकंचत्वारिंशत्संख्ययाजपंहोमंवावत्सोतेप
यस्विनींगांदत्वाशुद्ध्येत्।सुरापानेसुवर्णस्तेयेप्येवंवा।महागुरुतल्पगोहविष्यांतमजरंस्वर्विदिति

सूक्तं।नतमंहोनदुरितमितिसूक्तंवा।सहस्रशीर्षापुरुषइतिसूक्तंवाप्रत्यहंषोडशकृत्वोजपन्मासेनशु
द्ध्येत्।मत्यावेदेवकृतस्येनसइत्याद्यैर्मंत्रैःशाकलहोमः।महापातकादृतेव्याहृतिभिस्तिलैर्लक्षहोमः।
व्यभिचारिणीगमनेहविष्पांतीयेवापावमानीयंवाकुंताय्ंवालखिल्यंवानिविष्यंत्वाहपाकपिंवाहोत्
न्दद्रान्वासकृज्जप्त्वाशुद्ध्येत्।गुरुतल्पगातिदेशेषुअतिपातकेषुपादोनंयोज्यं।गुरुतल्पगसमेषु
पातकेष्वर्धोनं।सर्वत्रैवं।महापातकिसंसर्गेतुयस्ययेनसहसंसर्गःसतस्येनप्रायश्चित्तव्रतंकुर्यात्।
॥ इत्यादिमहापातकिप्रायश्चित्तं॥ ॥उपपातकानांरहस्याणौंप्राणायामशतं।यद्वा।महा
पातकेप्राणायामाश्चतुःशतं।अतिपातकेत्रिशतं।अनुपातकेसवेद्विशतं।उपपातकेशतं।सर्व
त्राभ्यासेद्विगुणं।मत्याभ्यासेचतुर्गुणं।प्रकीर्णकेषूपपातकेषुचतुर्थांशःप्राणायामाः।यद्वाप्रकाश
पापेयत्रनांदत्रयंतत्रसहस्रप्राणायामाः।तत्रसहस्रेपादोनंत्रिकृच्छ्रेर्ई [illegible] रिकृच्छ्रेपादंसं सप्त
ख्याप्राणायामास्त्रिकाये इत्यादिसर्वत्रयोज्यं।स्त्रीशूद्राणाममंत्रकप्राणायामाः।यद्वा।गायत्र्या
लक्षजपासरा(?)महापापेपादोनमितिपापेर्द्धं।अनुपापेपादमुपपापेतचतुर्थांशं।प्रकीर्णकेषु
चतर्द्धंचरेत्।यद्वागायत्र्याव्याहृतिभिर्वातिलैलक्षहोमोमहापापेतिपापादिषुपादोनादिकं॥
॥ इतिस्मृत्यर्थसारेउपपातकप्रायश्चित्तं॥ ॥अथरहस्याग्निलक्षणं॥ तत्रव्रतांगम्स

स्मृत्य-सा- ताधर्माः यमनियमाश्च। ब्रह्मचर्यं दयाक्षांतिर्दानं सत्यमकौटिल्यं चाहिंसास्तेयं माधुर्यं दमश्चेति दश
९८ यमाः। स्नानं मौनोपवासेज्यास्वाध्यायोपस्थनिग्रहः। गुरुशुश्रूषाक्रोधाप्रमादता इति दश निय
माः। सांतपने कृच्छ्रे पूर्वेद्युरनाहारो गोमूत्रगोमयक्षीरदधिसर्पिःकुशोदकान्येकीकृत्य पीत्वा परे
द्युरुपवसेत्। एषः द्विरात्रः सांतपनकृच्छ्रः। पूर्वेद्युरुपोष्य परेद्युः कृमिमानिसमंत्रकं संयुज्य समंत्रकं
प्राशनं। यदा तदा ब्रह्मकूर्चसंज्ञकं। गोमूत्रं गोमयं क्षीरं दधिसर्पिःकुशोदकं पंचगव्यसंज्ञकं।
तत्र ताम्रवर्णाया गोमूत्रं। श्वेताया गोमयं। पीतायाः क्षीरं नीलायाः दधि कृष्णायाः सर्पिर्ग्राह्यं।
यद्वा सर्वं कापिलमेव। अलाभे सर्ववर्णानां सर्वं ग्राह्यं। गोमूत्रे ष्ट माषाः प्रमाणं। गोमये षो
डश। क्षीरे द्वादश माषाः। दध्नि दश माषाः। कुशोदकं तदर्द्धं॥ गायत्र्यादिना गोमूत्रं गंधद्वारेति गो
मयं। आप्यायस्वेति क्षीरं दधिक्राव्णो थवे दधि। तथा शुक्रमसीत्याज्यं देवस्य त्वेकुशो
दकं॥ एतत्पंचगव्यं सप्तपत्रैरछिन्नाग्रैः सुवर्णेन वा। इरावतीदंविष्णुर्मानस्तोके शंवतीः ए
ताभिरग्नौ हुत्वा हुतशेषं प्रणवेनालोड्य तेनाभिमंत्र्य तेनोद्धृत्य तेनैव पिबेत्। मध्यमेन पलाश ९८
पत्रेणापद्मपत्रेण वा स्वर्णपात्रेण वा ताम्रपात्रेण वा ब्रह्मतीर्थेन वा पिबेत्। ब्रह्मकूर्चं त्रिरात्राभ्यासे
यतिसांतपनं। गोमूत्रं गोमयं क्षीरं दधिसर्पिःकुशोदकं। एकैकं पूर्ववत्प्रत्यहं पीत्वा एकरात्रोप

वासे सांतपनकृच्छ्रः सप्ताहिकः एषु शक्त्याद्यपेक्षया योज्यं। एवमुत्तरत्रापि। महासांतपनं तु। गोमूत्रगोमयक्षी
रदधिसर्पिषामेकैकं त्र्यहमावर्त्य विंपंचदशाहिकं स्यात्। यद्वा। मूत्रगोमयक्षीरदधिसर्पिःकुशोदकानां
षण्णामेकैकं त्र्यहं त्र्यहमावर्त्य त्र्यहोपवासः। एकविंशरात्रे महासांतपनं॥ यतिमहासांतपनं तु। गोमू
त्रादीनां षण्णामेकैकस्य द्व्यहं द्व्यहाभ्यासं स्यात्॥ तप्तक्षीरघृतोदकानामेकैकं प्रत्यहं पीत्वैकरात्रोपवा
से स्यात्। यद्वोष्णजलक्षीरघृतोष्णोदकबाष्पमारुतानां चतुर्णां त्रिरात्राभ्यासे द्वादशरात्रस्तप्तकृ
च्छ्रः स्यात्। तत्र क्षीरादिपरिमाणं त्वेवं। जलं त्रिपलं क्षीरं द्विपलं। घृतमेकपलं। उष्णबाष्पमारुतं त्रि
रात्रस्य पूरणमात्रपादकृच्छ्रः एकभक्तेन नक्तेनायाचितेनोपवासेन चेत्येवं स्यात्। तत्र ग्राससंख्या।
एकभक्ते पंचदश षड्विंशतिर्वा ग्रासाः। नक्ते द्वादश द्वाविंशतिर्वा। अयाचिते चतुर्विंशतिरेव सर्वे ग्रासाः कु ७
क्कुटांडप्रमाणाः। आस्यप्रमाणं वा ग्रासः। अनयोः पक्षयोः शक्त्या विकल्पः। यद्वैवं पादकृच्छ्रः एकभक्ते
त्रयं पादकृच्छ्रः शूद्रदेयः। नक्तत्रयं पादकृच्छ्रो वैश्यदेयः। अयाचितत्रयं पादकृच्छ्रो राज्ञः। उपवासत्रयं पा
दकृच्छ्रो विप्रस्य देयः॥ अर्द्धकृच्छ्रस्त्वयाचितोपवासपादार्ध्यां स्यात्। पादोनकृच्छ्रः एकभक्तायाचि
तोपवासैः स्यात्। प्राजापत्यकृच्छ्रः। एकभक्तनक्तायाचितोपवासैस्त्रिरात्रैः आनुलोम्येन वा।
अतिकृच्छ्रस्त्वेते वा बालवृद्धातुरार्थं स्यात्। एकभक्तत्रयनक्तत्रयायाचितत्रयोपवासत्रयैः प्राजापत्यः स्या
वं-

पाणिपूरणमात्रान्नभोजनेनैकैकह्रासः संख्या एकैकग्रासाशी भोजनदिने स्यात्। एतत्कृच्छ्रेऽपि अतिकृच्छ्रः। शेषं पूर्ववत्।

स्मृ·त्य·सा· त। शक्त्या नोपवासादि प्रातिलोम्येन वा। कृच्छ्रातिकृच्छ्रः पयसैकविंशतिरात्रैः स्यात्। यद्वा द्वादशरात्रमंबुभक्षणे द्वा

९ कृच्छ्रातिकृच्छ्रः॥ शक्तस्य पराको द्वादशरात्रोपवासेन स्यात्। सौम्यकृच्छ्रस्तु पिण्याकमोदनाचामनिःस्रा

वं तक्रमुदकं सक्तून् पंचदिनेषु क्रमात् प्राश्य षष्ठे ह्युपवासे स्यात्। पिण्याकादीनां प्रमाणं प्राणयात्रा

मात्रमेव। पिण्याकसक्तुतक्रैस्त्र्यहं चतुर्थे ह्युपवसेत् सौम्यकृच्छ्रः॥ चांद्रायणं तु शुक्लप्रतिपदादि

दिनेषु मयूरांडप्रमाणग्रासानामेकैकवृद्ध्या पौर्णमास्यां पंचदश ग्रासाः स्युः। ततः कृष्णप्रतिपदादि

दिनेष्वेकैकह्रासश्चेदमावास्यायामुपवासो चांद्रायणं यवमध्यं स्यात्। पिपीलिकामध्यं तु कृष्णप्र

तिपदादिकं पौर्णमास्यंतं स्यात्। सर्वत्र तिथिवृद्धिह्रासे ग्रासवृद्धिह्रासः। यद्वा चत्वारिंशदधिकं श

तद्वयग्रासानां यथा कथंचिदावृत्त्या मासेन चांद्रायणं स्यात्। पंचविंशत्यधिकशतद्वयग्रासानां वा

त्त्रोमासेन चांद्रायणं स्यात्। यतिचांद्रायणं प्रत्यहं द्विवाष्टभिर्ग्रासैर्मासेन स्यात्। शिशुचांद्राय

णं तु प्रत्यहं दिवा चतुर्ग्रासै रात्रौ चतुर्ग्रासैर्मासेन स्यात्। यतिचांद्रादिषु यथा कथंचित् त्रिंशद्दिनं

मासः चंद्रगतिवत्। सोमायनं तु। स्त्रीगोरं स्तनचतुष्टयजं सप्तरात्रं पिबेत्। स्तनत्रयात् सप्तरात्रं। स्त

नद्वयात् सप्तरात्रं। स्तनैकेन षड्रात्रं त्रिरात्रं वायुभक्षणं। चांद्रायणधर्मतान्॥ इति कृच्छ्रचांद्रायण ९

लक्षणं॥ ॥अथ कृच्छ्रचांद्रायणधर्माः। त्रिकालं द्विकालं वा स्नानं। तत्र कृच्छ्रे सकृत्स्नानं। मार्ज

नाघमर्षणतर्पणादि कृत्वोत्तीर्य सौरमंत्रैः सावित्र्या वा सूर्योपस्थानं। ततः पुण्यमंत्रं गायत्रीं वाष्टसहस्रं शतं

वा शक्त्या जपेत्। चतुर्भैक्ष्यं यावकपयोदधिघृतमूलफलकंदादि हविष्यमुच्यते। तद्धविष्यमाप्यायस्वेत्यभिर्मं

त्र्य ग्रासान् गायत्र्याभिमंत्र्येत्॥ अथ प्राजापत्यप्रत्याम्नाया वक्ष्यंते ॥ प्राजापत्ये धेनुदानं। तन्मू

ल्यदानं वा। गोदानं वा तन्मूल्यदानं वा। तत्र गोमूल्यं निष्कं निष्कार्धं। निष्कपादं वा दद्यात्। अत्यशक्तस्त

दर्द्धं। तत्सममूल्यधनधान्यवस्त्रादि दद्यात्। द्वादश ब्राह्मणभोजनं वा। तावद्धनधान्यवस्त्रादिदाने

वा। उपवासो वा। संहितापारायणं वा। गायत्र्ययुतजपो वा। तिलहोमः सहस्रं वा। प्राणायामशतद्वयं वा

शक्त्या कुर्यात्। धेनुभोजनादि शक्त्यपेक्षया द्वित्रिचतुःपंचषड्गुणं वर्धते। उपवासस्थाने एकविप्रभो

जनं। तावद्धनधान्यवस्त्रादिदानं वा शक्त्या द्विगुणा [illegible]। गायत्रीसहस्रजपो वा। द्वादश

शक्त्या कार्याः प्राणायामा वा। चांद्रायणस्थाने पंच प्राजापत्याः तप्तकृच्छ्रे षट्। अतिकृच्छ्रे त्रयः कार्याः। सुखसा मासोपवासस्थानेपं

ध्ये तु पु। चांद्रायणे त्रयः। तप्तकृच्छ्रे सार्द्धं कायद्वयं। अतिकृच्छ्रे महासांतपने च कायद्वयं। पराके पंच

त्रयो वा कार्याः॥ अथ कृच्छ्रस्थाने तीर्थप्रत्याम्नाया वक्ष्यंते। देवतीर्थे च वेदे च देवज्ञे भिषजे गुरौ।

यादृशी भावना यस्य सिद्धिर्भवति तादृशी। सेत्वाग्न्यापः सुरा विप्रो गोर्गुरुस्तीर्थमुच्यते। निवासहो

मस्नाना नित्तोषपापैः पुनाति तत्। अथ पुराणेभ्यः सर्वतीर्थप्रत्याम्नायेभ्यः किंचिन्मूलमुच्यते।

स्मृत्य॰सा॰ ब्रह्मविष्णुशिवादेव्यइंद्राग्नीयमनिरृती। वरुणःश्वसनोयक्षःसोमःसूर्योगुहोगणः। एतेस्वयंतीर्थभूता
९८ स्तीर्थैःसिद्धिमदर्शयन्। मुनयोवसवोरुद्रा आदित्यामरुतोनलाः। विश्वेदेवास्तथासाध्या नागायक्षा
श्चराक्षसाः। एतेस्वयंतीर्थभूतास्तीर्थैःसिद्धिमवाप्नुवन्। भृगवांगिरसोऽगस्त्यविश्वामित्रा
त्रिकश्यपाः। वसिष्ठाद्यामहात्मानस्तीर्थैःसामर्थ्यमाप्नुवन्। हरिश्चंद्रोनळोवैन्यःपुरुकुत्सःपु
रूरवाः। सगरःकार्तवीर्याद्यास्तीर्थैराज्यमवाप्नुवन्। इंद्रश्चैरवरामाद्या गोतमाद्यामहर्षयः
। ब्रह्महत्यादिपापानितीर्थैरेवव्यपोहयन्। विश्वामित्रःसपुत्रस्तु महापापंव्यपोहयत्। सु
तीर्थंतपसाब्रह्मन्प्राप्यवासिष्ठशापतः। त्रिशंकुमपिचंडालंविप्रंकृत्वा[illegible]निजं। नत्कृते ण्य
नैवलोकेनस्वर्गलोकमवेशयत्। अनुपोष्यत्रिरात्रादितीर्थान्यनधिगम्यच। अदत्वाकांच
नंगांचदरिद्रोनामजायते। व्रतोपवासकृच्छ्रादीनकृत्वातीर्थसेवनं। अदत्वान्नाश्ववस्त्रादिद
रिद्रोजायतेध्रुवं। तथोदीच्यपुराणे। पांडवाराज्यलाभाय दुरितोपशमायच। श्रीकृष्णनारदव्या
सश्रीकंठेंद्राजरोमशैः। मार्कंडेयपुलस्त्याजसप्तर्षिप्रमुखैस्तथा। द्वादशाब्दादशाब्दानिक्ल
ष्टाण्यादायसंक्रितः। तीर्थैरकुर्वन्नित्यादिपुराणेश्रूयतेकथा। विश्वनाथेनयतिनानिर्बी ९८
जेनमहात्मना। विंशत्यब्दाकृताब्दांतसर्वदातीर्थसेविना। आद्यःस्मृतिपुराणाद्यबहुभिः

सहनारिणा। कृच्छ्रतीर्थफलंप्रोक्तंयत्नसाध्यमपीयते। मार्कंडेयाजहनुमज्जांबवद्रोमशादिभिः। कृच्छ्रं
तीर्थफलंप्रोक्तंगोदानव्रतसाम्यतः। द्वापरांतेपुराणानिव्यासःस्वल्पायुषांनृणां। हिमांतदक्षिणेदेशे
संकोच्यैवव्यवारयत्। भूतप्रेतपिशाचाश्चपितरोब्रह्मराक्षसाः। अद्यापिप्रवदंत्येतेकृच्छ्रार्थेतीर्थे
मवतु। सूतःश्रूद्रःपुराणज्ञस्तीर्थैर्विप्रोऽभवत्ततः। शिष्यान्नैवक्षेत्रांकानितीर्थानिकुरुतोदितैः। नै
विश्वकर्मणःप्रोक्तुर्विश्वकर्मानसर्वकिलु। शिष्यैःकृच्छ्रांक्षेत्रांकानितीर्थानिसमकारयत्। अद्यापि
कृच्छ्रवर्णाकादृश्यतेतत्रतत्रच।। लिप्यंकानामविज्ञानेप्रकारांतरमुच्यते। पुराणस्मृतिविद्धि
कृत्प्रोक्ततीर्थफलालये। उक्तलोकोपकारार्थं यत्नसाध्यमपीयते। पुराणस्मृतिषुतीर्थफलंगोदा
नसमंदक्षाधेनुसफलं ऽशाधेनुफलंगोसहस्रफलंअग्निहोत्रफलं — मग्निहोत्रफलंपुण्येष्टि
फलंअश्वमेधफलंलभेत। मासोपवासफलंसंवत्सरोपवासफलंलभेत।। नाशानो। उपवास
फलंत्रिरात्रफलंकृच्छ्रफलंचांद्रायणफलं। पराकफलमासोपवासफलंसंवत्सरोपवासफ
लंलभेदित्यादिषुवचनेषुअर्थवादोऽविस्तृत्यसर्वत्रयोग्यतयाकृच्छ्रादिपरिकल्पतीर्थादि
संग्रहकारणापितथैवानिकायिककृच्छ्राचरणाशक्तानांपातित्यपरिहारार्थमस्माभिर
पितथैवोच्यते।। तत्रभागीरथ्याःस्नानंषष्टियोजनगतानांषडब्दकृच्छ्रसमं। तत्रयात्रायोज

स्मृत्य॰सा॰ नवद्वीपे योजनस्यार्द्धकृच्छ्रवृद्धिः। पूर्वं सप्तमातृकाराक्षसभयान्नद्योऽभवन्। भयेगते पुनर्दैत्यअ
९९ भवन्। ततो नदी शुष्काखातेषु भागीरथी सप्तवर्णा सप्तवाहना तासु विष्णुगंगा द्विसप्तमातृका
नाम सप्तगंगासु स्नानं षडब्दकृच्छ्रसमं। प्रयागे द्विगुणं। गंगाद्वारे गंगासागरसंगमे चैवं। एवं वा
राणस्यां गंगातीव दुर्लभा। समुद्रांतं पुण्यं न गण्यते। वाराणस्यां महापातकं न प्रविशति। तत्र
मृतोऽमृतो मुक्त एव। सर्वत्र यात्रादेशांतरं भाषाभेदविशेषे महापर्वतव्यवधाने महानदीव्य
वधाने क्रमेणाद्वादशाष्टचतुर्योजनन्यूनं भवति। भाषाभेदव्यवधाने षट्। चतुर्योजनन्यूनं
भवति। यमुनायां स्नाने षट्शतं कृच्छ्रसमं विंशतियोजनगतस्य। मथुरायां द्विगुणं। सरस्व
त्यां वा षट्कृच्छ्रसमं। चत्वारिंशद्योजनगतस्य। प्रभासे द्वारावत्यां च द्विगुणं। एतयोर्नद्योर्योज
नवृद्धौ पादकृच्छ्रवृद्धिः। दृषद्वती शुतुद्री विपाशा वितस्ता शरावती मरुद्वृधा सिन्धुमधुमतीपय
स्विनी घृतवत्यादिदेवनदीषु स्नानं त्रिंशत्कृच्छ्रसमं पंचदशयोजनगतस्य। चंद्रभागा वेत्रवती
शरयू गोमती देविका कौशिकी नित्यजला मंदाकिनी सरस्वती क्षिप्रा पुनः पुण्या पूर्णपुण्या बाहुदा वा
रुणी गंडक्यादिदेवनदीषु षट्कृच्छ्रसमं। महानदेषु महानद्यर्द्धफलं। शोणमहानदे गंगार्धफलं॥ ९९

नदेषु नद्यर्धफलं। वैरोचने नदे तु महानद्यर्धफलं। पुष्करतीर्थेषु प्रयागसमं। सन्निहत्यां तथैव च। मा
हिष्मत्यां दानिसप्रदक्षाग्न्यो होमे दशगुणः॥ गण्यामहानदी सेतु रामेश्वरं श्रीरंगं पद्मना
भं पुरुषोत्तमं नैमिषं बदर्याश्रमं पुण्यारण्यं कुरुक्षेत्रं श्रीशैलं महालयं केदारं रुद्रकोटिं लं २
पुष्करं नर्मदां आम्रातकेश्वरं कुब्जाभ्रं कम्कामुखं प्रभासं विजयेशपुरींद्रं पंचनदं गोक
र्णं अयोध्यां मथुरां द्वारवतीं गयां कांचीं शालग्रामं शंबलग्रामं एवमादि मोक्षक्षेत्रा
णि संसेव्यानि [illegible] गंगा सर्वत्र [illegible] सर्वेभ्यो विशिष्यते॥ महाप्रयागे [illegible] पितृकृत्ये
च॥ अन्यप्रयागे [illegible]॥ नर्मदायां [illegible] विंशतियोजनगतस्य चत्वारिंशति
कृच्छ्रसमं॥ कुब्जिकायां द्विगुणं॥ [illegible] तीर्थे चतुर्गुणं॥ तापीं दशकृच्छ्रसमं॥ दशयो
जनगतस्य अष्टकृच्छ्रसमं॥ अत्र संगमे द्विगुणं। गोदावर्यां षष्टियोजनगतस्य त्र्यब्दकृच्छ्र
समं॥ विंशद्योजनागतस्य कृष्णा तीर्थे स्नानं प्रातिलोमानुलोमस्नानं षष्टिकृच्छ्रसमं॥
वंजरासंगमे प्रयागे द्विगुणं॥ सप्तगोदावरे भीमेश्वरे त्रिगुणं॥ कुशावर्ते [illegible] वैर्ज्ञ मं
रायां दशयोजनागतस्य द्वादशकृच्छ्रसमं॥ गोदावर्यां विशेषेण समुद्रांतं षड्गुणं॥

स्मृत्य·सा·

१००

हरिहरे त्रिगुणं

प्रतिष्ठितायां चतुः कृच्छ्रसमं ॥ चतुर्योजने ॥ पूर्णायां तदर्धे योजने ॥ कृष्णावेण्यां
पंचदशयोजने पंचदशकृच्छ्रसमं ॥ तुंगभद्रायां विंशति कृच्छ्रसमं ॥ पंपायां तद्द्विगु
णं ॥ भीमरथ्यां दशकृच्छ्रसमं ॥ दशयोजनमतस्य ॥ ककुद्मिनी संगमे पंचदशकृच्छ्र
समं ॥ तुंगभद्रायां वरदासंगमे पंचविंशति कृच्छ्रसमं मलापहारिण्यामष्टकृच्छ्र
समं ॥ अष्टयोजनगतस्य निरत्यां पूर्वकृच्छ्रसमं षड्योजनगतस्य ॥ गोदावर्यां
यात्रा दशयोजने पादकृच्छ्रः सिंहस्थे गुरौ सर्वत्र जाह्नवी समं ॥ तुंगभद्रायां तु
लास्थे ॥ गुरौ जाह्नव्यर्धसमं ॥ कन्यास्थे गुरौ कृष्णावेण्यायां सर्वत्र जाह्नव्यर्धस
मं ॥ कर्कटस्थे च कृष्णावेण्यायां मलापहारिणी संगमे प्रयागे त्रिंशद्यो
जनगतस्य त्रिंशत्कृच्छ्रसमं भीमरथ्याः संगमे प्रयागे द्विगुणं ॥ पाताळगंगा
यां मल्लिकार्जुने षड्गुणं ॥ ततः पूर्वे षष्टि कृच्छ्रं ॥ हिमालये द्विगुणं ॥ समुद्रसंग
मे चैवं ॥ कावेर्यां महानद्यां च पंचदशकृच्छ्रसमं ॥ दशयोजनगतस्य ॥ ताम्रप
र्ण्यां कृतमालापयस्विनी शुद्धा दशयोजने द्वादशकृच्छ्र समं ॥ सह्यपाद

स॰२

१००

द्भूतारेवादिपादोद्भवाश्च वेदादिपादोद्भवा नद्यः स्वदैर्घ्याद्वंशे सारे पा एक द्वित्रि
कृच्छ्र फलप्रदाः ॥ विंध्याद्री येषु ळोद्भवा द्विगुणाः ॥ हिवमवदुद्भूता ॥ त्रिगुणाः ॥
स्मृतौ पुराणे च यथा कथंचित् दृष्टा कौकुल्या स्तिनात्र फलदाः ॥ अल्पनद्यः कृ
च्छ्रसीः ॥ महानद्यस्त्रिकृच्छ्रदाः ॥ सर्वत्र यात्रासु कृच्छ्रसंख्यया योजने संख्या स्यात् ॥
एकयोजनसीमादि षड्योजनेगाता नद्यः ॥ चतुर्विंशतियोजनाधिकगा महानद्यः ॥
समुद्रगाश्च महानद्यः ॥ यत्र महानदी समाख्यास्ति ताश्च महानद्यः ॥ उपवास
सहितं नदीस्नानं कृच्छ्रसमं योजनादर्वागपि ॥ क्षौनी गर्दभी चांडाली शूद्रिका
द्विनद्यः पापनदीश्च वर्ज्याः ॥ सर्वत्र समुद्रस्नानं दर्शे कार्यं देवतासमीपसंस्थ
सरिन्नदीसंगमेषु सर्वदा कार्यं ॥ समुद्रस्नानं पंचदशयोजनगतस्य प्रख्यातदे
वतासमीपे द्विगुणं तत्र स्नात्वा तद्देवतादर्शने च त्रिगुणं ॥ सेतौ गमनं त्रिंशत्कृ
च्छ्रसमं त्रिंशद्योजनगतस्य स्नात्वा रामेश्वरदर्शने षष्टिकृच्छ्रसमं ॥ विंध्यादर्वाचीया
नां सेतुरामेश्वरे षड्गुणं ॥ जाह्नव्यां त्रिगुणं फलं ॥ जाह्नवी केदार योश्च तथैतद्द

१११ क्षिणदेशीयानां त्राक्र यां षड्गुणं ॥ गंगादेशीयानां सेतुरामेश्वरं षड्गुणं ॥ स्कंद
दर्शने त्रिंशत्कृच्छ्र समं ॥ त्रिंशद्योजनगतस्यैव यत्र गंगासंगस्तित्तत्र च सर्वत्र श्री
बाभद पर्वतादीनां यात्रा ॥ शोभवत्येव ॥ श्रीरंगपद्मनाभपुरुषोत्तम चक्रकोटम
हालक्ष्मीदर्शने नृसिंहस्थाने लो रस्थाने त्रिंशद्योजनगस्यैत त्रिंशत्कृच्छ्र समं के
दारत्रिगुणं सर्वे वैष्णव माहेश्वर सौर शाक्तेय दिपीठेषु दर्शने पंचदश
कृच्छ्र समं ॥ प्रख्याते द्विगुणं ॥ अहोबल श्रीशैल प्रदक्षिणं षाष्ठिकृच्छ्र समं
॥ श्रीशैल एकैक द्वार दर्शनं चाद्यकृच्छ्र समं ॥ अन्येषु प्रख्यातवीर्य देव
दर्शनेषु षट्कृच्छ्र फलं ॥ सिद्धक्षेत्रे स्वयंभुदर्शनं अन्य क्षेत्र स्वयंभु दर्शनं
च त्रिंशत्कृच्छ्र समं त्रिंशद्योजनगतस्य सर्वत्र कृच्छ्र संख्यया यात्रा यात्रा ११२
योजनसंख्या धिकया ॥ यत्र यत्र विशेषतः दृष्टं तत्र ग्राह्यं सर्वत्र देवता
८० विशेष देश काल विशेषेण फल विशेषो स्त्येव ॥ सर्वत्र उक्त दशांश फलं ती

तीरस्थस्य योजनार्द्धर्वाग्भवति ॥ तत्रापि क्रोशसंख्यया तारतम्यंमस्ति ॥
सर्वत्र यात्रा द्वैयात्रा फलं योजने उपवास ४ ॥ प्राजापत्य इति कल्पना
भवति ॥ यैत्तिर्यग्यवोदराण्यष्टावूर्ध्वा व्रीहयस्त्रयः ॥ प्रमाणमंगुलक
स्योक्तं वितस्तिर्द्वादशांगुलं ॥ वितस्तिर्द्विगुणारत्निः किष्कुस्तत्तो धनुः ॥ धनुः
सेद्वे क्रोश ॥ ८ नरः क्रोशैर्योजनं परिचक्षते गव्यूतिः पंचसाहस्र धनुर्भिः प्र
ततं विदुः ॥ यात्रासु नियमो एकभक्ताधःशयने अस्तेयो ब्रह्मचर्यमित्या
द्याः ॥ तीर्थस्नानजपतर्पणादिकार्यं ॥ देवेऽर्घ्यपाद्याक्षतगंधपुष्प दिनानि
कार्यं ॥ ॥ इत्यादि तीर्थप्रत्याम्नाय योज्याः ॥ ॥ एवं स्थिते यथा मनःपूतं भवति
तथा कर्णपूर्ण तीर्थयात्रा चोड वाल लभते ॥ प्रसंगेन गंगाधर्तीर्थ फलं ॥ आ
नुषंगेण तीर्थप्राप्य स्नानस्नानफलं सर्वनयात्रा फलं ॥ पितृपिता मित्रात्मजो मातामहमा
तुल गुरुपापुत्रार्थे गुणो नोर्थया भ्या यार्थे निधां पत्न्यर्थे मातृष स्पिसर स्वसर्थे
वैरन्याचास्य मत्यमाश लभते ॥ साक्षात् स्त्रियो कुर्वन्स्तुन तीर्थशां लभते दं पत्नीचस्य

...मलभंते धर्मिष्यःफलं॥ अर्थिनां निष्फलं का सं...पापफलमीदृशं॥ कर्कटः कोटौ
१०२ मासद्वये निरंतरं रजस्वला महानद्यः समुद्रगास्ताश्च विभागीरथी गोमती चंद्रभागा।
सरस्वती सिंधुर्नर्मदा [illegible] त्रिरात्रं रजस्वलाः॥ भुष्यंति या [illegible] कुसरित्[illegible]ग्रीष्मे क
के नवोदके॥ पर्यंते चैव वर्षा सुदशाहं ता रजस्वलाः॥ कुल्याल्पा नद्यो नद्यश्च
सप्ताहं पक्षं मासांतरं रजस्वलाः॥ वापीकूपतडागादिषु स्वल्पादवेषु
पुराणादि[illegible]तेषु त्रिरात्रं रजस्वलात्वं॥ अतोत्र स्नानतर्पणादिकर्माप्रशस्तं [illegible] का
र्यं॥ तीरवासिनां स्नाननिषेधः॥ सरस्वती गंगा यमुना च सर्वा नद्यः कदाचिदपि न रजस्व
लाः तत्र रजोदोषो नास्ति [illegible] तीरवासिनामपि॥ उपाकर्मणि चोत्सर्गे [illegible]
ग्रहे तथा॥ प्रेतस्नाने च सर्वेषां रजोदोषो न विद्यते॥ क्षुद्रनद्यः सर्वा न रजस्वलाः
स्युः॥ ॥इत्यादि तीर्थविधिः॥ ॥अथ महापातकेषु द्वादशवार्षिकादिव्रतस्था
नेषु प्राजापत्यादयस्तत्प्रत्याम्नाया [illegible]यो ज्यंते॥ तत्र द्वादशवार्षिके द्वादशदिनेषु एकैकं १०२
प्राजापत्यं परिकल्प्य मन्यमाने षष्ट्यधिकशतत्रयप्राजापत्या द्वादशा। वार्षिके

[illegible]भवंति॥ तस्मान्महापातके त्वमत्यास[illegible]करणे षष्ट्यधिकत्रिशतकार्यं [illegible]॥ द्व्यभ्यासे द्वि
गुणी त्रिरभ्यासे त्रिगुणं॥ तदशक्तौ षष्ट्यधिकत्रिशतानि निष्काणि निष्कार्धं निष्कपादं वा तत्रा
प्यशक्तौ तावंत उपवासाः कार्याः॥ तत्राप्यशक्तौ एकैकस्य प्राजापत्यस्य स्थाने [illegible] गायत्रीजप
[illegible] तावंति तिलहोम
संख्यया [illegible] जपः कार्यः॥ तावंति वेदपारायणानि वा कार्याणि [illegible]
[illegible] शतप्राणायामा वा [illegible] प्रत्याम्नायत्वेन षष्ट्यधिकश
[illegible] वार्षिके [illegible]
[illegible] महापातकेषु योज्यं॥ अतिपातकेषु पादन्यूनषष्ट्यधिक [illegible] त्रैवार्षिकी
[illegible] कार्याः॥ [illegible] उपपातके बहुले त्रैवार्षिकी
[illegible] संख्याः कार्याः॥ एकैकोपपातके [illegible] मासिकव्रतमेकं॥ [illegible]
[illegible] कार्याः॥ प्रत्याम्नायाः [illegible] संख्याकाः कार्याः॥ [illegible]
[illegible] कार्याः॥ [illegible]
[illegible]॥ मासपर्यायव्रते सार्धे कार्यद्वयं॥ प्रत्याम्नाय [illegible]
[illegible]॥ प्रत्याम्नाय [illegible]॥ सप्ताहसांतपने [illegible]
दि [illegible] प्राजापत्यं पापादि [illegible]॥ ॥अथ सर्वत्र [illegible] वक्ष्यंते॥

स्मृ० सा०
१०३॥

तत्र महापातकादर्वाचीनपापेषु बहुषु विविधेष्वज्ञानात्कृतेषु अत्यंतगुणवानत्यंतवि
रक्तः प्रतिनिमित्तं कल्मषशक्तौ सर्वप्रायश्चित्तं षडब्दकृच्छ्रं ॥ साशीतित्रिशतसंख्याकप्राजा
पत्यं चरेत् धेन्वादिप्रत्याम्नायं वा तत्संख्यया कुर्यात् ॥ अभ्यासे द्विगुणं ॥ मत्या त्रि
गुणं ॥ मत्याभ्यासे चतुर्गुणं ॥ अत्यंताभ्यासे निरंतराभ्यासे वा पंचगुणं ॥ तथा बहु
कालाभ्यासे षड्गुणं ॥ अथोपपातकादिउपपातकुमाराभ्यां वा त्रिनेषु पापेष्वज्ञानात्कृ
तेष्वत्यंतगुणवानत्यंतविरक्तः प्रतिनिमित्तं कल्मषशक्तौ सर्वप्रायश्चित्तं द्विवर्षकृच्छ्रं
षष्टिसंख्याकप्राजापत्यं चरेत् ॥ धेन्वादिप्रत्याम्नायं वा तत्संख्यं कुर्यात् ॥ अभ्या या
से द्विगुणं ॥ मत्या त्रिगुणं ॥ मत्याभ्यासे चतुर्गुणं ॥ अत्यंताभ्यासे निरंतरा से
भ्यासे वा पंचगुणं ॥ तथा बहुकालाभ्यासे षड्गुणं ॥ प्रकीर्णकेषु क्षुद्रपापेषु बहु
षु ज्ञानकृतेषु प्रतिनिमित्तं प्रायश्चित्ताशक्तौ सर्वप्रायश्चित्तं कृच्छ्राशी १०३॥
छ तिरशीप्रौयणं कुर्यात् ॥ तत्स्थाने द्वादशप्राजापत्यान्वा चरेत् ॥ धेन्वा
दिप्रत्याम्नायं वा कृच्छ्रस्थाने तत्संख्यया कुर्यात् ॥ अभ्यासे द्विगुणं ॥ मत्या त्रिगुणं ॥ मत्या
भ्यासे चतुर्गुणं ॥ अत्यंताभ्यासे निरंतराभ्यासे पंचगुणं ॥ तथा बहुकालाभ्यासे षड्गुणं ॥

इदं प्रायश्चित्तं चतुरस्य मुत्तमस्य ॥ मध्यमस्य द्विगुणं ॥ त्रुघनस्य त्रिगुणं ॥ दृष्टास्तेशुभाशुभ
महाकर्मस्वनुपहतानाम् पित्रृत्विगाचार्ययजमानादीनां कृच्छ्रातिकृच्छ्रचांद्रायणाख्यां सर्व
प्रायश्चित्तं तत्स्थाने द्वादशप्राजापत्यान्वा तत्पूर्वं वदंति ॥ ॥ इत्यादि स्मरत्यसारिसर्वप्राय र्व
श्चित्तविधिः ॥ ॥ सर्वत्रानुक्तनिष्कृतौ कृच्छ्रातिकृच्छ्रचांद्रायणादिसमस्तव्यस्तरूपेणायो
ग्यतया ज्ञेयानि ॥ क्षुद्रेषु पापेषु पथ्वासत्रियात्रकायाः योग्यतया योज्याः ॥ अतिक्ष
द्रेषु द्वादशपदृत्रिंशत्प्राणायामा योग्यतया योज्याः ॥ स्त्रीशूद्राणाममंत्रप्राणायामाः ॥
पुरुषाहारहीतकायपक्वान्नानि योज्यानि ॥ तावद्धनधान्यदानं वा योज्यं ॥ लोपे छर्दिव
अपाकृतिर्वा॰ स्वस्वाध्यायो चनामा तयोत्तयोय त्रक्रिया दिषु ॥ न्यूनं संपूर्णतां याति सद्यो वंदे तमच्यु
तं ॥ प्रज्ञानाद्यथवा लोभात्प्रच्यवेत ध्वरेषु यत् ॥ स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति
श्रुतिः ॥ अज्ञात्वा धर्मशास्त्रार्थं प्रायश्चित्तं ददाति यः ॥ सोपतत्पापमाप्नोति नर
कं चैव गच्छति ॥ ॥ ॥ इति प्रायश्चित्तप्रकरणं समाप्तं ॥ ॥ ॥ ॥
इदं स्मरसयसारं तु स्मृत्या स्मरणहेतुना ॥ नावमानं सतां मत्वा पश्यं सेवबहुश्रु
ताः ॥
कार्यो कृष्णार्पणं … भूर्भुवःस्वरिति जपः कार्यः सम्यग्मलोपे विष्णुस्मरणं वा अज्ञानन्यूनसर्वार्थसमत

तिविदाकृतं॥ ॥ इतिश्वरसर्थसारःसमाप्तः॥ ॥ ७॥ श्रीत्र्यंबकार्पणमस्तु॥ ७

१०४ ॥ ॥ ७॥ श्रीवंदीनाथार्पणमस्तु॥ ७॥ ॥ ७॥ श्रीरामकृष्णार्पणमस्तु

॥ ७॥ ॥ श्रीशिवार्पणं॥ ७॥ ॥ ७॥ ॥ ७॥ यदक्षरपदभ्रष्टंस्वरव्यंजनवर्जि

तं॥ तत्सर्वंक्षम्यतांदेवप्रसीदपरमेश्वर॥ ७॥ ॥ ७॥ ॥ ७॥ स्वस्तिश्री

शके १७ वर्षे नामसंवत्सरे श्रावणमासेएकादश्यांपुण्यतिथौतद्दिने

दीनान्नपूर्णालयसत्यपत्तासंपूर्णं॥ श्वरुक॥ तेल्लद्रक्षेस्थलाद्रक्षेद्रक्षेतदबंध

नात्॥ म्रखहस्तेनदत्तव्यं एवंवदंतिपुस्तके॥ हस्तपुस्तकदिग्रीवस्तबद्ध दृष्टिरधो

मुखः॥ कष्टेनलिखितंग्रंथंयत्नेनप्रतिपालितं॥ छ ॥

१०४